य रक्तचंदनं २२ एभिरक्षमितैर्भागैस्तैलप्रस्थं विपाचयेत् अभ्यंगाद्राजपत्नीनां येचान्ये धनिनो नराः २३
तिलकाः पिडिकाव्यंगाः नीलिका मुखदूषिकाः नश्यंत्यनेन देहस्य दुःछाया च विवर्णताः २४ नैश्यित्वा च
जनयेद्रूपं चातिमनोहरं पद्मकेसरवर्णाभं मुखं भवति कांतिमत् २५ इति कुंकुमाद्यं तैलं वैद्यालंकारात
ॐ इति योगतरंगिण्यां मुखरोगचिकित्साकथनं नाम पंचपंचाशत्तरंगः ॐ अथ कर्णरोगः करोति वि
गुणो वायुर्मलेसं गृह्य कर्णयोः सपूयं पाकबाधिर्यां सत्वश्रावादिकान्गदान् १ तैलं कांतिकवीरपूरकर।
सक्षौद्रैः सम्रत्रैः श्रृतं स्यात्क्षौद्राईकशिग्रुमूलकदलीकंदद्रवैर्वा समैः शृंगीतुंबुरुहिंगुभिः श्रृतमथ स्यात्कार्ण
शूलापहं सिद्धं बिल्वगणेन साजपयसा मूत्रेणवा बाधिर्यजित् २ हिंग्वद्दारु मिसिमूलकभस्मभूर्जेत्वक्।
क्षारसिंधुरुचकोद्भिदशिग्रुविश्वैः सत्वर्जिकाविडवचांजनमातुलुंगरंभारसैः समधुसुक्तमिदं विपक्वं ३

पोदंतानांपीडाकृमिविनाशनः ९ फलान्यम्लानिशीतांवुरूक्षान्नंदंतधावनं तथातिकठिनंभक्ष्यंदंतरोगीविवर्ज
येत् १० मनःशिलायवक्षारोहरितालंससैंधवं दार्वीत्वक्तेजिसंचूर्णंमाक्षिकेनसमन्वितं ११ मूर्छितेद्धृतमंडेन
कंठरोगेषुधारयेत् मुखरोगेषुचश्रेष्ठंपीतकंनामकीर्तितं १२ इतिपीतकंचूर्णं जीवंतिकामदनतुल्यकचित्र
वल्लीमेदायुतंकमलशालिसमन्वितंवा दुग्धंसृतंशमयतिस्फुरितोपसर्गमालेपनाद्धरसंश्रवमाशुहन्या
त् १३ सद्धृतफाणितंतैलविमिश्रतंकनकगैरिकसर्जंसमन्वितं सलवणंमदनंविनिवारयत्यधरजांस्फु
रितांश्चमहाव्रणान् १४ जातीपत्रपुनर्नवातिलकणाकोरंडकुष्ठंवचाशुंठीदीप्यहरीतकीसमकृतंचूर्णंमु
खेधारितं वातश्लेष्मकृमिदंतशूलशमनंदुर्गंधदोषापहंशैथिल्यंक्षयकारिदंतपड़तावीजंचजात्यादिकं १५ इ
तिजात्यादिकवल्कःयोगरत्नावल्यात् कांचनारत्वचःक्वाथःप्रातर्गंडूषकैर्धृतः जिह्वादरदरंहंतिस्फोटानपिह
जाकरान् १६ वंशात् कुष्ठैलवालुकैलासमधुकधान्याकयष्टिमधुकवलः हरतिमुखपूतिगंधंरसोनमदि
राहिंगंधंच १७ प्रियंगुकाश्मीरजकोलमज्जाह्रीवेरकेशरचंदनभागयुक्तैः पिष्टैःप्रलेपोविहितोमुखस्य
द्युतिंसशोकादधिकांविदधत्ते १८ तांबूलमध्यस्थितचूर्णकेनदग्धंमुखंयस्यभवेत्कथंचित् तैलेनगंडू

चिकित्साकथनंनामचतुःपंचाशत्तरंगः ॐ अथमुखरोगः सरक्तःकुपितश्लेष्माकरोत्यास्यगदान्बहू।
न् दोर्गंध्यपिडिकापाकोपजिह्वादीन्समासतः १ अ दूराणादिरिमेदवल्कलशतात्क्वाथेचतुर्थांशकेगोदुग्धे
सजतुद्रवेणाविपचेदेभिश्चकल्कीकृतैः पत्तंगागुरुगैरिकैःसखदिरैःकंकोलजातीफलन्यग्रोधैःसलवंगा।
पुष्यजतुभिःकर्पूरलोध्रान्वितैः २ मंजिष्ठामधुकाद्रूपद्मकत्रुटित्वग्धातकीकेसरैः तैलंकट्फलसंयुतैरिति
कृतंवक्त्रेणधार्यंनरैःभिः शीतादादिषुदंतजेषुमुखजेष्वन्येषुरोगेषुचप्रोक्तंयज्ज्ञनकात्मजेनतदिदंरोगापहं
प्राणिनां ३ इतिखदिराद्यंतैलं रोगेषुवक्त्रगलतालुसमुत्थितेषुक्वाथःफलत्रिककटुत्रयकट्फलानां स्या
त्पाथपर्पटककट्फलविश्वभार्गीभूतीकधान्यघनदारुवचाभयानां ४ इतिचिकित्सानः संचर्वितैर्वेश्रांथ
तैःप्रशांतिंवक्त्रामयोगच्छतिजातिपत्रैः दंताश्चवीजैर्वकुलद्रुमस्यस्यान्नच्युताश्चप्पचलाभवंति ५ माक्षि
कंपिप्पलीसर्पिर्विमिश्रंधारयेन्मुखे दंतशूलहरंप्रोक्तंप्रधानमिदमौषधं ६ दंतचालेषुगंडूषोवं बुलत्व
कृतोहितः गृहधूमयवक्षारपाठाव्योषरसांजनैः ७ तेजोह्वात्रिफलालोध्रश्चित्रकश्चेतिचूर्णितः सक्षौद्रं।
धारयेदास्यगलरोगविनाशनं ८ इतिकालकचूर्णं सिंधूत्थंकेवलंधार्यंदंतशूलविनाशनं जेपालले।

दूषिका २३ लेपयेत्परितः कल्कैः तैलमभ्यंजने हितं कुंदंन शिखीजातीकरंजकसतुल्यकैः २४ हरिद्राद
यमंजिष्ठात्रिफलारिष्टचंदनैः एतत्तैलमरूषीणांसिद्धमभ्यंजने हितं २५ इतिहरिद्रादितैलं इंद्रलुप्ते
शिरांविध्वाशिलाकासीसतुल्यकैः लेपयेत्परितः कल्कैस्तैलमभ्यंजने हितं २६ कुंदंनशिखीजाती
करंजकरवीरकैः अवगाढंपदं चापि प्रच्छायच पुनः पुनः २७ गुंजाफलैश्चिरलिपेत्केशाभूमिंसमंततः
इंद्रलुप्तापहोलेपोमधुनाच हतीरसः २८ हस्तिदंतमषींकृत्वामुख्यैचैवरसांजनं रोमाण्यनेनजायंते छागक्षीरं ५
लेपात्पाणितलेष्वपि २९ लोहमलामलकल्कैः सजपाकुसुमैर्नरः सदालापयी पलितानीहनपश्यतिगो।
॥ गात्नायौवनरकाणि ३० मंजिष्ठामधुकंलाक्षामातुलुंगचयष्टिका कर्षप्रमाणैरेतैस्तु तैलस्यकुडवंतथा
३१ आजंपयस्तद्विगुणंशनैर्मृदग्निनापचेत् नीलिकापिडिकाव्यंगमभ्यंगादेवनाशयेत् ३२ मुखप्रसा
दोपचितंनीलकार्कस्यवर्जितं सप्तरात्रप्रयोगेनभवेत्कनकसुंदरं ३३ इतिमंजिष्ठाद्यंतैलं कोमलंपद्मि।
नीपत्रंयः खादेच्छर्करान्वितं एतन्निश्चित्यनिर्दिष्टंनतस्यगुदनिर्गमः ३४ वंगात मूषिकानांवसाभि
र्वागुदेसम्यक्प्रलेपनं स्विन्नमूषकमांसैर्वास्वेदाच्चगुदनिर्गमः ३५ ॥ इतियोगतरंगिणांक्षुद्ररोग। रामः

द्रवयोश्चूर्णं मधुच्छिष्टयुतं निर्मथ्य कटुतैलाक्तं हितं पादप्रमार्जनं १० करंजबीजं रजनी कासीसं मधुकं मधुः
रोचना हरिताल चलेपो यमलसे हितः ११ दहेत्कदरमुद्धृत्य तैलेन दहनेन वा चिप्पमुष्णांबुना स्विन्नमाक्ष
ष्याभ्यंज्य तं व्रणं १२ दत्वा सर्जरसं चूर्णं बध्वा व्रणं वशाचरेत् स्वरसेन हरिद्रायाः पात्रे कृष्णायसे भयां १३ संस्था
प्य तन्नवकल्केन लिंपेच्चिप्पं मुहुर्मुहुः निंबोदकेन वमनं पद्मिनीकंटके हितं १४ निंबोदकाक्तं सर्पिःसक्षौद्रं पानमि
ष्यते अहिपूतनके धात्र्याः पूर्वं स्तन्यं विशोधयेत् १५ प्रदिग्धं स्वेदयेच्चापि वृद्धं गोफणया दृढं कोमलं पद्मि
नीपत्रं यः खादेच्छर्करान्वितं १६ एतन्निश्चित्य निर्दिष्टं नतस्य गुदनिर्गमः चर्मकीलं जतुमणिं माषकं तिलका
लकं १७ उद्धृत्य शस्त्रेण दहेत्क्षाराग्निभ्यामशेषतः युवान्यपिडिकान्यच्छ नीलिका व्यंगशर्कराः १८ शिरा
व्यधैः प्रलेपैश्च जयेदभ्यंजनैस्तथा लोध्रधान्यवचालेपस्तारुण्यपिडिकापहः १९ व्यंगेषु चार्जुनत्वग्वा
मंजिष्ठा वृषमाक्षिकैः लेपः सनवनीतो वा श्वेताश्वखुरजा मसी २० रक्तचंदनमंजिष्ठाकुष्ठं लोध्रं तथैव च
वटांकुराश्च व्यंगघ्ना वह्नकांतिप्रदास्तथा २१ केवलान्ययमापिष्टानीक्षणान्रशाल्मलिकंटकान् आलिप्ते
व्यहमेतेन भवेत्पद्मोपमं मुखं २२ पुराणमथ पिण्याकं परीषं कुक्कुटस्य च मूत्रपिष्टं प्रलेपोयं शीघ्रं हन्या

तेनैव विधिना जयेत् साधयेत्कुष्ठिनानन्या नृणां पान्दोष
समुद्भवान् अंधालजीं कच्छिपिकां ७

यो॰त॰ तथैव धात्रीखदिरेण संयुतं पिबेज्जलं सुक्वथितं सुशीतं मसूरिकारोगविनाशनं परं ८ यस्तु कोद्रवकोनामकफ
मारुतकोपजः सप्ताहाद्वादशाहाद्वा स्वयमेवोपशाम्यति ९ द्विर्भेरेकविंशत्या शाम्यंति च मसूरिकाः स्तोत्रपाठ
ग्रहजपैर्धर्मपावनकर्मभिः १० शीतलाराधनैश्चंडीपाठैश्चेताउपाचरेत् ॥ इति योगतरंगिण्यां मसूरिकाचि
कित्साकथनं नाम त्रिपंचाशस्तरंगः ॥ अथ क्षुद्ररोगाः क्षुद्ररोगाः समासेन चतुस्त्रिंशत्प्रकीर्तिताः ग्रंथ
भूयस्त्वभीत्या च वक्ष्यामि क्रियतोऽत्र तान् १ तत्राजगल्लिकामामां जलौकाभिः समाचरेत् विवृतामिंद्रवृद्धां
चगर्दभीं जालगर्दभीं २ इरिवेल्लीगंधनाम्नीं जयेत्पित्तविसर्पवत् मधुरौषधिसिद्धेन सर्पिषा च जयेद्बुधः
३ रक्तावशेषैर्बहुभिः स्वेदनैरपतर्पणैः जयेद्विदारिकां लेपैः शिग्रुदेवद्रुमोद्भवैः ४ पनसिकां कच्छपिकां तु
या पाषाणगर्दभीं सुरदारुशिलाकुष्ठैः स्वेदयित्वा प्रलेपयेत् ५ कफमारुतसंभूते लेपः पाषाणगर्दभे श
स्त्रेणोत्कृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत् ६ मनःशिलालमंजिष्ठातगरैलागुरुचंदनैः जातीपल्लवयु
क्तैश्च निंबतैलं विपाचयेत् ७ वल्मीकं नाशयेत्तद्वीवहुच्छिद्रं वहुद्रवं शिरांश्च पादहारीश्च वेधयेत्तलशोधनीं
८ स्नेहस्वेदोपपन्नां तु पादावालेपयेन्मुहुः मधूच्छिष्टवसामज्जाद्यं तस्त्रैरैर्विमिश्रितैः ९ सर्ज्जालुसिंधु

स्फोटनाशनः ५ ॥ पटोलसप्तच्छदनिंबवासाफलत्रिकच्छिन्नरुहाविपक्वं तत्पंचतिक्तं घृतमाशु हन्यात्त्रिदोष।
विस्फोटविसर्पकंडूः ३ पटोलामृतभूनिंबवासकारिष्टपर्पटैः खदिराब्दयुतैः क्वाथो विस्फोटज्वरशांतये ४ चं
दनं नागपुष्पं च नंदुलीयकवारिणा शिरीषवल्कलेजातीलेपः स्याद्दाहनाशनः ५ ॥ इति योनिविस्फोटचि
कित्साकथनं नाम द्विपंचाशत्तरंगः ॥ अथ स्नायुकः शाखासु कुपितो दोषः शोफं कृत्वा विसर्पवत् कुर्यात्
तु निर्भान्कीयान् स्नायव स्ते निरूपिताः १ कुष्ठरामठसुंठीभिः कल्कैः शिग्रुसमन्वितं पानलेपनयोगेन तंतु
कीटविनाशनं २ गव्यं सर्पिस्त्र्यहं पीत्वा निर्गुंडीस्वरसं त्र्यहं पिबेत्स्नायुकमत्युग्रं निहंत्येव न संशयः ३ शि
ग्रुमूलदलैः पिष्टैः कांजिकेन ससैंधवैः लेपनं स्नायुरोगाणां शमनं परमुच्यते ४ इति स्नायुचिकित्सा अथ
मसूरिका मसूराकृतिसंस्थाना पिडिकास्तु मसूरिकाः आसां पूर्वं ज्वरः कंडूर्गात्रभंगो रतिभ्रमः ५ अमृ
तविषपटोलं मुस्तकं सप्तपर्णी खदिरमसितवेत्रं निंबपत्रं हरिद्रे विविधविषविसर्पी कुष्ठविस्फोटकंडूरपन
यति मसूरीः शीतपित्तं ज्वरं च ६ इत्यमृतादिः कपीतनन्दीतकरात्रियुग्ममांसीनतैलामयवारिशीतैः ले
पः ससर्पिः प्रशु हन्त्यवश्यं विस्फोटदाहज्वरकान्विसर्पान् ७ इति दशांगलेपः पटोलमूलारुणतंडुलानो

शतावरीमूलकल्केघृतंसिद्धंपयोन्वितं पचेन्मृद्वग्निनाभाव्यंक्षीरंदत्वाचतुर्गुणं २७ नाशयेदम्लपित्तंचवातपि
त्तभवान्गदान् रक्तपित्तंतृषांमूर्छांश्वाससंतापमेवच २८ इतिशतावरीघृतं योगरत्नावल्यात् यवकृष्णापटोला
नांक्वाथंक्षौद्रयुतंपिबेत् नाशयेदम्लपित्तंचवमिंचारुचिमेवच २९ अम्लपित्तेप्रयोक्तव्यः कफपित्तहरोविधिः गु
डकूष्मांडकंचैवतथाखंडामलक्यपि ३० गुडक्षीरकणासिद्धंसर्पिर्वात्रप्रयोजयेत् ॥ इतियोग तरंगिण्यांअम्ल
पित्तचिकित्साकथनंनामपंचाशत्तरंगः ॥ अथविसर्पः क्षुद्रपामाकृतिर्देहेपरितःपरिस र्पणात् विसर्पो
जायतेजंतोस्तोदश्यावरुजाकरः १ विरेकवमनालेपसेवनास्रविमोक्षणात् उपाचरेद्यथादोषंविसर्पानविद
ग्धिभिः २ शिरीषयष्टीनतचंदनैलामांसीहरिद्राद्वयकुष्ठवालैः लेपोदशांगःसघृतःप्रयोज्योविसर्पकुष्ठज्वरशो
थहारी ३ इतिदशांगः वृषखदिरपटोलपत्रनिंबत्वगमृतामलकीकषायकल्कैः घृतमभिनवमेतदाशुपक्वं
जयतिसदाश्वविसर्पकुष्ठगुल्मान् ४ ॥ इतियोगतरंगिण्यांविसर्पचिकित्साकथनंनामैकपंचाशत्तरंगः ॥
अथविस्फोटः अग्निदग्धइवस्फोटाः विस्फोटाः सज्वराननाः क्वचित्सर्वत्रदेहेषुरक्तपित्तसमुद्भवाः १ कि
राततिक्तकारिष्टयष्ट्याह्वंवृषवासकं पटोलपर्पटोशीरत्रिफलाकौटजान्वितं २ किरातादिरयंप्रोक्तोगणोवि

नापचेत्तावद्यावद्दवतिर्पिण्डितं धात्रीतुल्यासितायोज्यापलार्द्धंलेहयेदनु १४ अम्लपित्तंवातपित्तंमूर्छांश्वासंच
नाशयेत् १५ इतिकूष्मांडावलेहः रसरत्नप्रदीपात् पिप्पल्याकुडवंचूर्णांघृतस्यकुडवद्वयं पलषोडशकंखंडाच्छता
वर्याःपलाष्टकं १६ शिवायाःस्वरसस्यापिपलषोडशकंमतं क्षीरप्रस्थद्वयेसाध्यंलेहीभूतेत्रनिक्षिपेत् १७ त्रि
जातकाभयाजाजीधान्यमुस्तशिवातुगाः एतेषांकार्षिकंचूर्णंकर्षार्द्धंकृष्णजीरकं १८ नागरंनागकंजातीफलं
समरिचंहिमं दत्वापलत्रयंक्षौद्रंस्निग्धभांडेनिधापयेत् १९ प्रातर्यथावलंलिह्यादम्लपित्तप्रशांतये हृल्लासा
रोचकछर्दिपिपासादाहनाशनं २० शूलहृद्रोगशमनंहृद्यंचेदंरसायनं इतिखंडपिप्पलीयोगरत्नावल्यात्
क्षौद्रंपथ्यैसमेकृत्वातयोस्तुल्यांसितांक्षिपेत् संकुट्याक्षद्वयीमितांनत्पिंडींश्चयेद्भिषक् २१ तांखादेदम्लपि
त्तार्तोहृत्कंठदहनापहां तन्द्रामूर्छाभ्रममदाग्निनाशिनीमामवातहाम् २२ इतिद्राक्षादिगुटिका अत्रापिचंद्र
कलारसः त्रिकटुत्रिफलामुस्तविडंगदहनाःसमाः एतेषांचूर्णितानांचप्रत्येकंचपलंभवेत् २३ कर्षद्वयंगंध
कस्यतदर्द्धंपारदस्यच विडालपदमात्रंतुलिह्यात्समधुसर्पिषा २४ शीतोदकंचानुपिवेत्क्रमाद्यूषंपयस्तथा
अम्लपित्तंचाग्निमांद्यपरिणामरुजंतथा २५ कामलांपांडुरोगंचहन्यादत्रनसंशयः २६ इतिरसामृतंचूर्णं

यो॰त॰

कारयेत सम्यग्वांतविरक्तस्य सुस्निग्धस्यानुवासनं ३ तिक्तभूयिष्ठमाहारं पाचने चापि कल्पयेत यवगोधूमवि
कृतीस्तीक्ष्णासंस्कारवर्जितं ४ यथाम्लं लाजसक्तूंश्च सितामधुयुतान्लिहेत निस्तुषयववृषधात्रीकाथस्त्रिसुगंधि
मधुयुतः पीतः अपनयति चाम्लपित्तं यदि भुंक्ते मुद्गयूषेण ५ एलातुगाचोचसिवाभयानोत्वग्ग्रंथिपादीरदला
न्वकानां चूर्णं सितातुल्यमपाकरोति प्रौढाम्लपित्तं दिवशाष्टभुक्तं ६ बीजं सर्वस्वात कुडवमितमिह स्यान्नालिके
रस्य पिष्टं पलपरिमितसर्पिः पाचितं खंडतुल्ये निजपयसि तदेतत्प्रस्यमात्रे विपक्वं गुडवदथ सुशीते शाणमात्रं
क्षिपेच्च ७ धान्याकपिप्पलिपयोदतुगाद्विजीरैः साकं त्रिजात मिभकेशरवह्निचूर्णं हंत्यम्लपित्तमरुचिंक्ष
यमस्रपित्तं शूलं वमिं सकलपौरुषकारि पुंसां ८ इति नालिकेरखंडः योगरत्नावल्यात सुद्धसूतसमं गंधं मृता
ताम्राभ्ररूप्यकं तुल्यांशं मर्दयेद्यामं रुध्वा गजपुटे पचेत ९ अक्षधात्रीहरीतक्याः क्रमवृध्या विपाचयेत जलो
नाष्टगुणेनैव ग्राह्यमष्टावशेषकं १० अनेन भावयेत्पूर्वं भस्म सम्यक् ततः पुनः पुनः पंचविंशतिवारं तु तावत्ताम्भ्रंग
जैर्द्रवैः ११ शुष्कं तच्चूर्णितं खादेत् पंचगुंजं मधुप्लुतं रसो लीलाविलासोयमम्लपित्तं नियच्छति १२ इति लीला
विलासो रसः कूष्मांडस्य रसो ग्राह्यः पलानां शतमात्रकं रसतुल्यं गवां क्षीरं धात्रीचूर्णं पलाष्टकं १३ लवंग्नि

यस्तामम्र गुग्गुलं त्रिफलाच महानिंबश्चित्रकश्च शिलाजतु ८० इत्येतच्चूर्णितं कुर्यात प्रत्येकं शाणषोडशः चतुः
षष्टिकरंजस्यबीजचूर्णं प्रकल्पयेत ८१ चतुःषष्टिमत्तं चाभ्रं मध्वाज्याभ्यां विलोडयेत स्निग्धभांडे घृतं खादेद्द्वि
निष्कं सर्वकुष्टनुत ८२ रसः कुष्टकुठारोयं गलत्कुष्टविनाशनः इति कुष्टकुठारोरसः मांसेक्षुतैलं बुकुलत्था
माषविदाह्यभिष्यंदपयोदधीनि निष्पावपिष्टाध्यशनादिनिशात्वगोषवान्स्त्रीलवणं चजह्यात ८३ ॐ इति
योगतरंगिण्यां कुष्टचिकित्साकथनं नाम अष्टचत्वारिंशत्तरंगः ॐ अथशीतपित्तोदर्दोत्कोठः वरटीदंशवद्दद्दे
कं ह्रुलः शीतपित्तकैः उदर्दः सएवतुप्रोक्तः उत्कोठोभ्मरितोदवान १ गैरिकं सैंधवं चैव कुस्तुंभं कुंकुमेस्समं घृतलिप्ता
अमीच्छं निशीतपित्तमुदर्दकं २ सगुडां पिप्पलीं यत्तु खादेत्सप्थान्नभुङ्नरः तस्यनश्यतिसप्ताहादुदर्दः स
र्वदेहजाः ३ सिद्धार्थरजनीकल्कैः प्रपुन्नाटतिलैः सह कटुतैलेनसंमिश्रमेतदुद्वर्तनं हितं ४ शीतपित्तउदर्दोत्
उत्कोठेचविशेषतः ॐ इतियोगतरंगिण्यां शीतपित्तोदर्दोत्कोठचिकित्साकथनं नाम ऊनपंचाशत्तरंगः ॐ अ
थाम्लपित्ते अत्यम्लकटुकाहारदंतकाष्ठानिधर्षणात दिवास्वप्नाद्रसोतिक्तोम्लोह्यास्याद्द्रवतेबलात १ अ
विपाकक्लमोत्क्लेदतिक्ताम्लोद्गार गौरवैः हृत्कंठदाहविमिश्रमम्लपित्तंवदेद्भिषक २ वमनानंतरंतत्रविरेकं मधु

न्तुल्यां वह्निंभक्तवदर्पयेत ७६ स्वांगशीतं समुद्धृत्य संचूर्ण्य नटमंडनं हिमकुंदेंदुसंकाशं निर्द्धूमं कृष्णवर्त्मनि ७७
रक्तिकास्य प्रदातव्या पुराणगुडयोगतः पथ्यं चच शाकस्योक्तेरोरिका षष्टिको दनं ७८ निर्द्धोर्णगं किंचनाप्यन्नरवादे दे
कविंशतिः दिवानि वीतगानिकः सर्वव्यापारवर्जितः ७९ गलत्कुष्टं पुंडरीकं श्वित्रं पौंकोलिकं तथा औदुंवरं कृक्षजिह्वं
काकणांस्फोटमुत्ववर्ती ८० वातरक्तं पांडुरोगं दद्रूयामां विचर्चिकां विसर्पमर्शांसि तथा विपादींच भगंदरं ८१
सर्वथाक्रमशो हंति शोधितेह रितालकं अन्यानपि व्रणान्सर्वान्नेष कारमिवांशुमान ८२ इतिताले अवनो।
गोपि तालनाप्यशिलाहृतं शुद्धं सैंधवटंकणं समांसंचूर्णयेत्तल्वेसूताहिगुणागंधकं ८३ गंधतुल्यमृतं
ताम्रं जंवीररैर्दिनपंचकं मर्दितं षट्पुटैः पाच्यं भूधरे संपुटोदरे ८४ पुटे पुटे द्रवै मर्द्यं सर्वमेतत्तु षट्पलं
द्विपलं मारितं ताम्रं लोहभस्म चतुःपलं ८५ जंवीराम्लेन तत्सर्वं दिनमर्द्यं पुटेल्लघु त्रिंशांदशांविषं चास्य क्षि
प्त्वा सर्वं विचूर्णयेत ८६ माहिषाज्येन संमिश्रा निष्कार्द्धं भक्षयेत्सदा मध्वाज्यैर्वा कुचीचूर्णं कर्षमात्रं लि
हेत्तु ८७ सर्वकुष्टं निहंत्याशु महातालेश्वरो रसः ८८ इति महातालेश्वरो रसः गुंजाफलानि चूर्णानि
लेपयेत्श्वेतकुष्टनुत शिला – पामार्गभस्मापि लिप्ता श्वित्रं विनाशयेत ८९ भस्मसूतसमो गंधो मृता

निसर्वाणि योयैर्नैतैलमात्रया अभ्यंजनेप्रयुंजीत सर्वंकुष्ठानिनाशयेत ६४ पामाविचर्चिकाकच्छूवि
सर्पादिहरंपरं रक्तपित्तोत्थितान्हंति रोगानेवंविधान्बहून ६५ इतिबृहत्सिंदूराद्यंतैलं सैंधवंमदनंरा
लंमधुसर्पिःपुरोगुडं गैरिकंस्फुटितौपादौलिप्तौपंकजसन्निभौ ६६ इतिसैंधवाद्यंघृतं कर्पासिकापत्र
विमिश्रकाकजंघाकृतोमूलकबीजयुक्तः तक्रेणलेपः क्षितिपुत्रवारे सिध्मानिसद्योनयतिप्रणाशं ६७
उन्मत्तकस्यबीजानिमानकक्षारवारिणा कटुतैलंविपक्वंच्यंशीघ्रंहंतिविपादिकां ६८ जंबीरद्रवमध्येतु
प्रक्षाल्यनटमंडनं दशांशंटंकणंदत्वाखंडशः परिमेलयेत ६९ चतुर्गुणोगाढपटेनिबध्यप्रहरद्वयं दोला
यंत्रेणसंस्वेद्यप्रदीपप्रमितेनले ७० चूर्णातोयेकांजिकेचकूष्मांडं बुनितैलके त्रिफलांबुनितत्पश्चात्क्षाल
यित्वाम्लवारिणा ७१ ततःपलाशमूलत्वग्वारिपिष्टंप्रशोषयेत महिषीमूत्रसंपिष्टंपुनस्तंपरिशोषयेत ७२
तंगोलकंसरावाभ्यांसंपुटीकृत्ययत्नतः खातेगजपुटेपक्त्वास्वांगशीतंसमुद्धरेत ७३ अजादुग्धैःपुनःपिष्ट्वाशो
षयेत्तगोलकीकृतं आढकंभस्मपार्श्वेलोहंडिकायांदृढंक्षिपेत ७४ सम्यक्चूर्णस्यकुडवंदत्वातत्रविचक्ष
णः स्थापयेद्गोलकंतत्रपुनश्चूर्णंचभस्मच ७५ यथाधूमोवहिर्यातिनतथातांविमुद्रयेत द्वात्रिंशत्प्रहरा

श्रीगुरुः

६६

यो-त-

ष्ठुमंजिष्ठादिः प्रशस्यते ५१ इतिबृहन्मंजिष्ठादिः पिबतिसकटुतैलंगंधपाषाणचूर्णेरविकिरणास्तप्तःपामलोयःप
लार्द्धं त्रिदिवसमभिषिक्तःक्षीरभोजीचशीघ्रंभवतिकनकदीप्तःकामयुक्तोमनुष्यः ५२ क्षारास्त्रयःस्त्रिकटुकंपंचै
वलवणानिच वचाकुष्ठंहरिद्रेद्वेविडंगंचित्रकंविषं ५३ हरितालंशिलागंधंसिंदूरंतुत्थखर्परं रामठंचरसोन
श्चमदनंचरसांजनं ५४ भल्लातकंवाकुचिकाचोकंकर्पूरकंतथा लांगलीचपयेलीचहंसपादीतथैवच तेज
नीमुरमांसीचकंपिल्लंखदिरोनरं एतच्चूर्णसमांसेनवज्रार्कपयसाप्लुतं ५५ षड्गुणंसार्षपंतैलंकारंजंवावि
शेषतः तैलंगंधर्वजंवापितिलतैलंतथैवच ५६ तैलाच्चतुर्गुणंमूत्रंगोमहिष्यश्वसंभवं हस्तिगर्दभजंवा
पितथोष्ट्राजाविजंक्षिपेत् ५७ सर्वमेकत्रसंपक्वंकटाहेमंदवह्निना तैलावशेषंसंगृह्यहन्यामभ्यंगमात्र
तः ५८ वातरक्तंविनाशाययद्रूकंडूविचर्चिकाः अष्टादशानिकुष्ठानिमांसमेदोगतानिच ६० दुष्टव्रणा
निसर्वाणिजीर्णानाडीव्रणानिच भगंदरंचदुर्नामलूतागर्दभजालकं ६१ एतत्तैलंसदाभ्यंगात्सर्वंकुष्ठं
व्यपोहति इतिकुष्ठकालानलतैलं सिंदूरंचंदनंमांसीविडंगंरजनीद्वयं प्रियंगुंपद्मकंकुष्ठंमंजिष्ठाखदि
रंवचा ६२ जात्यर्कत्वक्तानिंबाःकरंजोविषमेवच कृष्णचित्रकलोध्रंचप्रपुन्नाटंचसंहरेत् ६३ श्लक्ष्णांपिष्टा रामः

२९

दत्वालेहवत्साधयेद्भिषक् ४० भल्लातकसहस्राणांमज्ज्ञानंतत्रदापयेत् त्रिकटुत्रिफलामुस्तंसैंधवानांपलं
पलं ४१ विडंगंचित्रकंकुष्ठंचंदनंचपलंपलं सौगंधिकस्यदातव्यंचूर्णंपलचतुष्टयं ४२ टिप्पकस्यपलंचैववचा
तुर्जातंपलंपलं समेसुप्रक्षिपेत्कोलेघृतभांडेनिधापयेत् ४३ महाभल्लातकोह्येषमहादेवेननिर्मितः प्रा।
णिनांतुहितार्थायव्याधेःप्रशमनायच ४४ चित्रमौडुंबरंदद्रुमत्स्यजिह्वसकाकणं पुंडरीकंचचर्माख्यंविस्फोटं र
क्तमंडलं ४५ कच्छूंकापालिकंकुष्ठंपामांचापिविपादिकां वातरक्तमुदावर्त्तपांडुरोगंवमीन्कृमीन् ४६ अर्शांसि
षट्प्रकाराणिग्म्बासंकासंभगंदरं अन्नपानेनदातव्यंछिन्नातोयेनवाभिषक् ४७ भोजनेनसदायोज्यमुष्णं
चाम्लंविशेषतः ४८ इतिमहाभल्लातकः मुंडीरसेनसंसिक्तंघृतंहंतिविपादिकां मंजिष्ठाकुटजोद्धनाम्रत
वचाशुंठीहरिद्राद्वयंक्षुद्रारिष्टपटोलकुष्ठकटुकाभार्गीविडंगाग्निकं म- वींदारुकलिंगभंगमगधात्रायं
तिपाटावरीगायत्रीत्रिफलाकिरातकमहानिंवासनारग्वधं ४९ श्यामावल्गुजचंदनंसवरुणंपतीक षा
खोटकंवासापर्पटंसारिवाप्रतिविषानंताविशालाजले मंजिष्ठादिरयंकषायविधिनानित्यंप्रमान्यःपिवे
त्त्वग्दोषान्वचिरेणयांतिविलयंकुष्ठानिचाष्टादश ५० वातरक्तेप्रसुप्तौचविसर्पेविद्रधौतथा सर्वेषुरक्तदोषे

रिष्टमरिष्टामलकानिच २७ सजयेत्सर्वकुष्टानिमासादूर्ध्वंनसंशयः वंशात कुडवोवल्गुजवीजाद्धरितालचतु
र्थभागसंमिश्रः मूत्रेणगवांपिष्टस्सवर्णकरणःपरश्चित्रे २८ चत्वारोवल्गुभागाःस्युर्द्वौभागौतुकुलिंजनात म
स्तकीचैकभागास्याद्यवानीपोट्टलीयुते २९ जलेसमुचितेहंसांबुर्ममध्येदिनत्रये संस्थाप्यतज्जलंलेपाद्धंति
दद्रूनसंशयः ३० इतिवोलजलं चंद्रसूर्याख्यवीजानिप्रपुन्नाटस्यतानिच कंकत्यात्र्यपिवीजानिसमांशंत्रितयं
क्षिपेत ३१ सर्वंद्विगुणतक्रेणसूक्ष्मंसंपिष्यसाधयेत् दिनत्रयंततोवन्यगोमयेनप्रघर्षयेत ३२ तंकल्कंले
पयेन्पश्चाद्दद्रुर्गच्छतिनिश्चितं निंवगोपारुणाकट्वीत्रायंतीत्रिफलाघनं ३३ पर्पटवल्गुजानंतावचारग्वधिरखं
दनं पाठाशुंठीसठीभार्गीवासाभूनिंववत्सकं ३४ श्यामेंद्रवारुणीमूर्वाविडंगेंद्रविषानलं हस्तिकर्णीमृता
डेष्कापटोलंरजनीद्वयं ३५ करणारग्वधस्नाह्वंकुष्माम्लोच्चटाफलं मंजिष्टालांगलीरास्नानक्तमालःपुनर्न
वा ३६ दंतीवीजकसारश्चभृंगराजेकुटैरकं एषांद्विपलिकान्भागान्जलद्रोणेविपाचयेत ३७ अष्टभागा
वशिष्टंचकषायमवतारयेत् भल्लातकसहस्राणिक्षिप्त्वात्रीणयमेतोंभसि ३८ चतुर्भागावशिष्टंचकषायमवा
तारयेत तौकषायौसमाहायवस्त्रपूतौचकारयेत ३९ एकीकृत्यकषायौतौपुनरग्नावधिश्रयेत गुडस्यैकतुला

द्रनिशा गोदंतोषणानागरं डगजिकावाकुचिकासर्पिषा लोहेलोहविमर्दितेदृढतरं माहेश्वराख्यंघृतंकंडूकुष्ठ
विचर्चिकादिशामनेपामाहरंस्वेदनात् १६ इतिमाहेश्वरोघृतः खदिरत्रिफलानिंबपटोलामृतवासकैः अष्ट
कोयंजयेत्कुष्ठंकंडूविस्फोटकानिच १७ विसर्पपामाकिटिभरोमांतिकमसूरिकाः इतिखदिराष्टकं अर्कप
त्ररसेपक्वंहरिद्राकल्कसंयुतं नाशयेत्सर्षपंतैलं पामाकंडुविचर्चिकां १८ इत्यर्कतैलं मंजिष्ठात्रिफलाला
क्षाशिलागंधकराजिभिः तैलमादित्यसंपक्वंपामाकंडूविचर्चिकां १९ इत्यादित्यपाकतैलं हरितालशिला
ह्वार्कपयोश्वारिजयांत्वचं शाक्रकुसविशालारुग्निशायुग्मारुचंदनैः २० कटुतैलंपचेत्तस्य अभ्यंगोविषपा
लान्वितैः सगोमूत्रंतदभ्यंगाद्दद्रुकुष्ठविनाशकृत् २१ सर्वेष्वपिचकुष्ठेषुतैलमेतत्प्रयोजयेत् २२ इतिलघु
मरीचाद्यंतैलं धात्रीखदिरयोःक्वाथंपीत्वावल्गुजसंयुतं शंखेंदुधवलंश्वित्रंहंतिचूर्णेनसंशयः २३ म
ध्वितेनपिबेच्चूर्णंकाकोडुंवरिवल्गुजं तैलाक्तोघर्मसेवीस्यात्काशीश्वित्रमुद्धरेत् २४ इंद्रासनंसमादाय
प्रशस्तेहनिचोद्धृतं तच्चूर्णंमधुसर्पिर्भ्यांलिहेत्स्त्रीरघृतांशनः २५ हत्वासमसर्वकुष्ठानिजीवेद्वर्षशतत्रयं
तिलाज्यत्रिफलाक्षौद्रव्योषभल्लातशर्कराः २६ वृष्यःसप्तसमोमेध्यःकुष्ठहाकामचारिणः यःखादेदभया

श्रीगुरुः

८७

यो.त.

द्रा.क्षा
शम्याकगायत्रीभार्गीवासकचेहनैः ४ व्याघ्रत्ताकरगाश्रुंठीसटीद्वीक्षानिशाख्यैः वत्सकत्वक्पलानंतामूर्वा
त्रायंतिवल्गुजैः ५ ऐंद्रीगोपारुणाकट्वीकपद्मकम्पारिपर्पटैः कल्कचूर्णैःकषायाणांक्षौद्रयुक्तैस्तपाचरेत ६ क्रमःपित्तः
विसर्पोक्तःउष्करीमूढयोर्हितः त्वक्पाकेस्पर्शहानौचसेचयेन्मर्दितंउनः ७ वत्सातैलेनकोष्णेनमधुरैश्चोपनाहयेत
रसविद्यातरव्योलेख्ययोशास्त्रनयोनके महाकषायोगोमूत्रेणसर्वकुष्ठांतकोकीर्त ८ इतिमहाकषायः दूर्वाभया
सैंधवचक्रमर्दकुटेरकाःकांजिकतक्रपिष्टाः त्रिभिःप्रलेपैरपिवद्धमूलांदद्रूंचकंडूंचनिवारयेति ९ गोमूत्रवारि
संपिष्टैःशिलातालांशतुल्यकैः लेपंकिटिभचीसर्पंकुष्ठनाशायपूजितः १० आरग्वधस्यपत्राणिकांजिकेनप्र।
लेपयेत दद्रूकिटिभकुष्ठानिहंतिसिध्मानमेवच ११ स्योणायहल्कनिशादूर्वाःसमवारप्रलेपनात धत्तूररसपिष्टा
श्चकौद्रसैंधैर्नाशिनः १२ कासमर्दकमूलंतुसौवीरेणप्रपेषितं दद्रूकिटिभकुष्ठानिजयेदेतत्प्रलेपनात १३
एडगजत्तिलसर्षपकुष्ठंमागधिकारजनीद्वयमुस्तं पूतिकृतंद्विवसत्रयमेतन्नहंतिसकुष्ठविसर्पककंडूं १४
सिंदूरगुग्गुलरसांजनसिक्थजैस्तैस्तुल्यांशकैःकटुकतैलमिदंविपक्वं कच्छुश्चवल्पिंडकिनीमथवापिश्चु
ष्कामभ्यंजनेनसहसाहरतिप्रसह्य १५ इतिसिंदूराद्यंतैलं कृत्वाकञ्जलिकोरगोचकुनटीदृजीरके

रामः

८७

धः शोधनं तथा पाको रक्ष्यः प्रयत्नेन शिश्नक्षयकरश्च सः २४ पटोलनिंबत्रिफलागुडूचीक्वाथं पिबेत्खदिरास
नाभ्यां सगुग्गुलुं वा त्रिफलायुतं वा सर्वोपदंशापहरः प्रयोगः २५ त्रिफलायाः कषायेण भृंगराजरसेन वा व्रणप्र
क्षालनं कुर्यात् उपदंशप्रशांतये २६ दग्ध्वा कटाहे त्रिफलां समांशां मधुसंयुतां उपदंशप्रलेपोयं सद्यो रोपयति व्रणं
२७ जंबुजात्यम्रमालार्कशम्याकानां दलैः पृथक् कृतं प्रक्षालने क्वाथं मेढ्रपाके प्रयोजयेत् २८ करंजनिंबार्जुनसा
लजंबूखदिरादिभिः कल्ककषायसिद्धं सर्पिर्निहन्यादुपदंशदोषं सदाहपाकं श्रुतिरागयुक्तं २९ अथ शूकदोषाः अ
क्रमाद्धो फलो वृद्धिं यो भिवांछति मूढधीः व्याधयस्तस्य जायंते दशचाष्टौ च शूकजाः ३० हितं च सर्पिषः पानं पथ्यं
वापि विरेचनं हितः शोणितमोक्षश्च यच्चापि लघुभोजनं ३१ शूकदोषे हरेद्रक्तं पक्वे शोधनरोपणं तिंदुकत्रिफला
लोध्रैर्लेपस्तैलं च रोपणं ३२ ॥ इति योगतरंगिण्यां भगंदरोपदंशशूकदोषचिकित्साकथनं नाम सप्तचत्वारिंश
त्तरंगः ॥ अथ कुष्ठानि अत्युग्रपानकाहाराद्घर्मश्रमविरेकिनो कुष्ठान्यष्टादश नॄणां जायंते चोग्रकर्मणां
१ वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं शस्तं २ एलाकुष्ठविडंगाग्नि नि
शा ह्रा चित्रको वला दंतीरसांजनं चेति लेपः कुष्ठविनाशनः ३ निंबभूनिंबपाठाब्दपटोलत्रिफलानलैः श्यामा

स्याद्भगंदरमहागदात् १२ इतिरूपराजोरसः त्रिफलापुरकृष्णानां त्रिपंचैकभागयोजिता गुटिका कुष्ठभगंदर
नाडीदुष्टव्रणविशोधिनी कथिता १३ नवकार्षिको गुग्गुलः तिलाभयालोध्रमरिष्टपत्रं निशावचाकुष्ठमगारधू
मः भगंदरे नाशु पदंशयोश्च दुष्टव्रणे शोधनरोपणोयं १४ त्रिफलारससंयुक्तं बिडालास्थिप्रलेपनं भगंदरं नि
हंत्याशु दुष्टव्रणविशोधनं १५ चित्रकार्कौ त्रिवृत्पाठे मलयूहयमारकौ सुधां वचां लांगलीं च हरितालं मनः
शिलां १६ ज्योतिष्मतीं च संहृत्य तैले धीरो विपाचयेत् एतद्विष्यंदनं नाम तैलं दद्याद्भगंदरे १७ शोधनं रोपणं चैव दुष्ट
नाडीविशोधयेत् इतिचित्रकाद्यं तैलं करवीरनिशादंतीलांगलीलवणाग्निभिः मातुलुंगार्कपयसा पक्वं तैलं
भगंदरे १८ इतिकरवीराद्यं तैलं भागो रसस्य गंधस्य द्वौ कन्याद्रिर्विम[illegible]र्दयेत् कृत्वा गोलं ताम्रपात्रं तावत्तस्यो
परिक्षिपेत् १९ भस्मना पूर्य तद्भांडं वह्निं कुर्याद्दिनं तले शीतमुद्धृत्य जंबीरद्रावैस्तत्सप्तधा पुटेत् २० गुंजास्य मधु
सर्पिर्भ्यां हंति सद्यो भगंदरं तालमूलीं सलवणां पिबेदुष्णकांजिकां २१ इतिरवितांडवोरसः व्यायामं मैथु
नं युद्धं पृष्ठयानं गुरूणि च संवत्सरं परिहरेदुपरूढव्रणो नरः २२ अथोपदंशः हस्ताभिघातान्नखदंतघाताद
धावनादत्युपसेवनाद्वा योनिप्रदोषाच्च भवंति शिश्ने पंचोपदंशा विविधोपचारैः २३ जलौकापातनं चैव स्यादूर्ध्वा

रसंहरेत् तेनसिद्धंसमंतैलंनाडीदुष्टव्रणापहं ९२ ॥ इतियोगतरंगिण्यांशोथव्रणसद्योव्रणभग्ननाडीव्रणक
थनंनामषट्चत्वारिंशस्तरंगः ॥ अथभगंदरं गुदस्यद्व्यंगुलेक्षेत्रेपार्श्वतःपिडकार्तिकृत् भिन्नाभगंदरोज्ञेयः
सचपंचविधोमतः १ वातपित्तकफैस्त्रेधाश्चतुर्थःसन्निपाततः उन्मार्गगःपंचमस्यादेवंपंचविधोमतः २ गुदस्य
श्वयथुंदृष्ट्वाविशोष्यादौविशोधयेत् रक्तावसेचनंकार्यंयथापाकंनगच्छति ३ खररसस्विरसमेतेभूर्तैलेमाःशारी
रंदपदिसहितमस्थ्नांसारमेयस्यपिष्टं भवतिसमुपलेपाद्दग्धभागंदरीणाम[illegible]पिविषमतराणामापदोंना
शहेतुः ४ वटपत्रेष्टिकासौंठीगुडूच्यःसपुनर्नवाः सुपिष्टाःपिडकावस्थेलेपःशस्तोभगंदरे ५ पिडिकानामपक्वा
नामपतर्पणपूर्वकं कर्मकुर्याद्विरेकांतंभिन्नानांवक्ष्यतेक्रिया ६ स्नुह्यर्कदुग्धदार्वीभिःवर्तिंकृत्वाविचक्षणः भ
गंदरगतिंज्ञात्वादद्याद्दुष्टविशोधिनीं ७ दुष्टांसर्वशरीरस्थांनाडींहन्यादसंशयं रसेंद्रभागद्वितयंमल्लस्ससास्च
तुष्टयं ८ काकजंघारसेमर्दैखल्वेदिवसपंचकं ताम्रस्यसंपुटेरुध्वामर्द्विदेहेंडिकांतरे ९ निवेश्यवालु
कांदत्वादेयोग्निःप्रहराष्टकं स्वांगशीतेसमुद्धृत्यमधुटंकणसंयुतं १० धमेन्मूषागतंतावद्यावद्भ्रमतितार
वत् रूपराजरसःसोयंभगंदरविनाशनः ११ वल्लमात्रमिमंखादेत्त्रिफलामनुपाययेत् मुक्तःस्वल्पैरहोभिः।

रसेनतु तच्चूर्णीकृत्यसप्ताहादस्थिभंगंव्यपोहति ४९ आमाचूर्णंमधुयुतमस्थिभंगेत्र्यहंपिबेत पीत्वाचास्थिभ
वेत्सम्यक्वज्रसारनिभंदृढं ५० लवणंकटुकंक्षारमम्लंमैथुनमातपं व्यायामंचनसेवेतभग्नोरूक्षान्नमेवच ५१
अथनाडीव्रणः नाडीनांगतिमन्विष्यशस्त्रेणोत्पाद्यकर्मवित् सर्वव्रणक्रमंकुर्याच्छोधनंरोपणादिकं ५२ नाडीं
वातकृतांसाधुपाटितांलेपयेद्भिषक् प्रत्यक्पुष्पीफलयुतैःतिलैःपिष्टैःप्रलेपयेत ५३ पैत्तिकींतिलमंजिष्ठानागदं तिलैः ४
तीनिशाद्वयैः श्लैष्मिकींतिलयष्ट्याह्वनिकुंभारिष्टसैंधवैः ५४ शल्यजांतिलमध्वाज्यैर्लेपयेत्सूयशोधनैः आर
ग्वधनिशाकालाचूर्णाज्यक्षौद्रसंयुताः ५५ सूत्रवर्तिर्व्रणोयोज्याशोधिनीगतिनाशिनी घोषाफलत्वक्मद
नाफलानिपूगस्यचत्वग्लशुनेचमुख्यं स्नुह्यर्कदुग्धेनसहैषकल्कोवर्तीकृतोहन्त्यचिरेणनाडीं ५७ वर्तीकृतंमाक्षि
कसंप्रयुक्तंनाडीघ्नयुक्तंलवणोत्तमंच दुष्टव्रणोयःक्षितितंचतैलंतत्सेव्यमानंगतिमाशुहंति ५८ जात्यर्कसंपाकक
रंजदंतीसिंधूत्थसौवर्चलयावसूकैः वर्त्तिःकृताहंत्यचिरेणनाडींस्नुक्क्षीरलिप्तासहसैंधवेन ५९ कृष्णादुर्वेल
भीरूणांनाडीमर्माश्रिताचया क्षारसूत्रेणतांछिंद्यात्नशस्त्रेणकदाचन ६० गुग्गुलुस्त्रिफलाव्योषैःसमांशैरा
ज्ययोजितैः नाडीदुष्टव्रणंचापिजयेदपिभगंदरं ६१ इतिसप्तांगगुग्गुलं समूलपत्रांनिर्गुंडींपीडयित्वा रामः

क्षतंव्रणंवैद्यःसशूलंपरिषेचयेत् यष्टीमधुकयुक्तेनकिंचिदुष्णेनसर्पिषा ३७ बुध्वागंतुंव्रणंवैद्योघृतक्षौद्रसमन्वि
तां शीतांक्रियांप्रयुंजीतरक्तपित्तोष्मनाशिनीं ३८ आमाशयस्थेरुधिरेवमनंपथ्यमुच्यते पक्वाशयेस्थेदातव्यंस्व
नंचसमासतः ३९ क्वाथोवंशत्वगेरंडश्वदंष्ट्राश्मभिदाकृतः सहिंगुसैंधवःपीतःकोष्ठस्थंस्रावयेदसृक् ४० यव
कोलकुलत्थानांनिस्नेहेनरसेनवा भुंजीतान्नंयवागूंवापिबेत्सैंधवसंयुतां ४१ इतिसप्ताहिकःप्रोक्तःसद्योव्रण
हितोविधिः सप्ताहात्परतःकार्याःशारीरव्रणवत्क्रिया ४२ व्रणोश्वपत्रयायासात्स्वरागश्चजागरात् नोचरु
कुच्चदिवास्वापान्नाश्वमत्पुश्चमैथुनात् ४३ सिंदूरकुष्ठविषहिंगुरसोनचित्रवाणांघ्रिलांगलिककल्कविप
क्वतैले - प्रासादमंत्रयुतर्हृकृतजुन्नफेनःक्लिन्नव्रणप्रशमनोविपरीतमल्लः ४४ खड्गाभिघातगुरुगंडमहोपदं
शनाडीव्रणव्रणविचर्चिककुष्ठपामाः एतानिहंतिविपरीतकमल्लनामतैलंयथेष्टशयनाशनभोजनस्य ४५ इ
तिविपरीतमल्लतैलंचक्रदत्तात् अथभग्नानि आदौभग्नंविदित्वातुसेचयेच्छीतवारिणा पंकेनालेपनंकुर्यात्
बंधनंचकुशान्वितं ४६ आलेपनार्थेमंजिष्ठामधुकंरक्तचंदनं शतधौतघृतेमिश्रंशालिपिष्टंचलेपनं ४७ न्यग्रो
धादिकषायस्तुशीतःपरिषेचने पंचमूलीविपक्वंचक्षीरंदद्यात्सवेदने ४८ मूलंसृगालछिन्नायाःपीत्वामांस

धवंधोव्रणामहोतःस्नरुजःसशोथाः प्रयांतितेगुग्गुलुमिश्रितेनपीतेनशांतिस्त्रिफलारसेन २७ इतित्रिफलागुग्गु
लुः अमृतापटोलमूलत्रिफलाकटुकाभिप्लानां समभागानिरजांसिकौशिकभागःसमःसर्वैः २८ गोधृतवद्ध्दां
गुटिकांखादेदनुवासरंसदक्षमितां जेतुंव्रणावातास्रगुल्मोदरश्वयथुपांडुरोगान्वितैः २९ इत्यमृतायोगुग्गु
लुः जातीनिंबपटोलपत्रकटुकादार्वीनिशासारिवामंजिष्ठाभयसिक्थतुत्थमधुकैर्नक्ताह्वबीजैःसमैः सर्पिः
सिद्धमनेनसूक्ष्मवदनामर्माश्रिताःश्राविणोगंभीराःसरुजोव्रणाःसगतिकाशुध्यंतिशुष्यंतिच ३० इतिजा
त्याद्यंघृतं स्वर्जिकाचयवक्षारःकंपिल्लमहिरंदरिका टंकणांश्वेतखदिरंतुल्यंचूर्णंचगोघृते ३१ सर्वैसमांशं
संचूर्ण्यमर्दयेद्व्रहरंदृढं स्वर्जिकाद्यघृतंचैवसर्वव्रणविशोधनं ३२ पूरणंकृमिकंदूघ्नंशीघ्रंपादवक्रूतया इ
तिस्वर्जिकाद्यंघृतं मनःशिलासमंजिष्ठासलाक्षारजनीद्वयं प्रलेपःसघृतक्षौद्रस्त्वग्विशुद्धिकरःपरः ३३ पुन
र्नवानिंबपटोलशुंठीतिक्तानिशादार्व्यभयाकषायः सर्वांगसोफोदरकासशूलश्वासान्वितंपांडुगदंनिहंति
३४ पुनर्नवाष्टकं अयोरजःसकासीसंत्रिफलाकुसुमानिच प्रलेपःकुरुतेकार्ष्ण्यंसद्यएवनवत्वचि ३५
कालीयकफलास्थास्थिहेमकालारसोत्तमैः लेपःसगोमयरसःत्वक्सवर्णीकरःपरः ३६ अथसद्योव्रणाः सद्यः

त्पक्षवेतसवल्कलैः १३ ससर्पिष्कैः प्रलेपः स्याच्छोथनिर्वारणः परः नरणाश्चो लेपनं दद्यात् दत्तं च पतितं तथा १४ न
च पर्युषितं शष्पन्नवा संधारयेत् क्वचित् सतिलाः सातसीवीजाः दध्यम्लसक्तुपिंडिकाः १५ सकिराव कुष्ठलवणाः
शास्तास्युरुपनाहने शाराम्लकशिग्रूणां फलान्यसितसर्षपाः १६ सक्तवः किण्वमुस्तानि द्रव्याण्येतानि पा
चने हस्तिदंतं जले छष्टं विंदुमात्रप्र- लेपनात् अत्यर्थकठिने चापि शोथे पाचनभेदकं चिरविल्वाग्निकौ
दंती चित्रकोहयमारकः १८ कपोतकंकगृध्राणां पुरीषाणि च दारणे ततः प्रक्षालने क्वाथः पटोली निंवपत्रा
जः १९ अविश्रुद्धे विशुद्धे वान्य गोधादित्वगुद्भवः आलेपः पूति मांसानां मांसस्यानामरोहणः २० कल्क
कः संरोहणः कार्यस्तिलानां मधुनान्वितः निंवपत्रमधुभ्यां तु युक्तः संशोधनः परः २१ निंवपत्रे तिलादंती त्रवृत
सैंधवमाक्षि कं दुष्टव्रणप्रशमनो लेपः शोधनकेसरी २२ निंवपत्र वचा हिंगु सर्पिर्लवणसैंधवैः धूपनं क्षि
मिरक्षोघ्नं व्रणकंड्रुजापहं २३ अग्निदग्धो व्रणो सम्यक् प्रयुंजीत चिकित्सितं पित्तविद्रधिवीसर्पशमनं
लेपनादिकं २४ वातादिभूतान आवान्धूपयेदुग्रवेदनान् यवाज्यभूर्जमदनश्रीवेष्टकसुराह्वयैः २५
करंजारिष्टनिर्गुंडीरसो हन्याद्व्रणकृमीन् लशुनेनाथवा दद्याल्लेपनं कृमिनाशनं २६ येऽक्लेदपाकस्रुतिगं

श्रीवासगुग्गुल्वगुरुशाल निर्यासधूपिताः कठि
नत्वं व्रणा यांति नश्यत्याश्वाववेदनाः २३पि

तरंगिएयांविद्रधिचिकित्साकथनंनामपंचचत्वारिंशस्तरंगः ॥ अथव्रणशोथः एकदेशोत्थितःशोथोव्रणा
नांपूर्वलक्षणं दोषैःपृथक्समस्तैस्तैःरक्तजागंतुजोचषट् १ हृग्विनिश्चयात आदौविस्रावनंकुर्याद्द्वितीयंतुप्र
सेचनं तृतीयमुपनाहंचचतुर्थंपाटनक्रियां २ पंचमंशोधनंचैवषष्ठंरोपणमिष्यते एतेक्रमाव्रणस्योक्ताःसप्त
मंवैकृतापहं ३ अभ्यज्यस्वेदयित्वातुवेणुनाह्यानतःशनैः विस्रावनार्थंगृह्णीयात्तलेनांगुष्ठकेनवा ४ शोथे
महतिसंरब्धेवेदनावतिवाव्रणे योनयातिसमंलेपस्वेदसेकापतर्पणैः ५ सोपिनाशंव्रजत्याशुशोथःशो
णितमोक्षणात एकतश्चक्रियाःसर्वाःरक्तमोक्षणमेकतः ६ रक्तंहिविक्रियांयातितन्मोक्षेयातिविक्रियां हर
त्यष्टांगुलंतुंवीश्टंगंचदशांगुलं ७ शिरासर्वांगजेरक्तेजलौकाग्रेथिश्छैतं तुंबीकफोत्थवातोत्थेश्टंगी
पित्तेजलौकसः ८ संनिपातोत्थितेनाडीवद्दोषेप्रयोजयेत मातलुंगाग्निमंथौचसुरदारुमहौषधं ९ अ
हिंस्राचैवरास्नाचप्रलेपोनाशुशोथजित दूर्वानलकमूलंचमधुकंचंदनंतथा १० शीतलैश्चगणैःसर्वैः
प्रलेपःपित्तशोथहा अजगंधाश्वगंधाचकालासरलयासह ११ एकैषिकाचसंगीचप्रलेपःश्लेष्मशोथहा
हा आलेपप्रतिमांसानोमांसस्थानमरोहतो १२ लेपःसंरोपणःकार्यःतिलजोमधुसंयुतः न्यग्रोधोदुंबराश्व

वेद्यापिश्लीपदानांनिवृत्तये ९ इतिविडंगाद्यंतैलं यवान्नंकटुतैलंच कूर्ममांसंचयोजयेत् श्लीपदानांप्रशांत्यर्थमाशो
तेदाहमग्निना ९ वंदात् ॥ इतियोगतरंगिण्यांश्लीपदचिकित्साकथनंनामचतुश्चत्वारिंशत्तरंगः ॥ अ
थविद्रधिः पृथग्दोषैःसमस्तैश्चक्षतेनक्षतजेनच गुल्मवद्विद्रधिर्ज्ञेयःस्त्रीस्तनेरक्तविद्रधिः १ जलौकापातनंश
स्तंसर्वस्मिन्नेवविद्रधौ मृदुर्विरेकोलघ्वन्नःस्वेदःपित्तोत्तरंविना २ वातघ्नौषधिकल्कैस्तुवसातैलघृतप्लुतैः सुखो
ष्णोवहुलोलेपःप्रयोज्योवातविद्रधौ ३ स्वेदोपनाहाःकर्त्तव्याःशिग्रुमूलसमन्विताः यवगोधूममुद्गैश्चस्विन्न
पिष्टैःप्रलेपयेत् ४ विलीयतेक्षणेनैवमपक्वश्चैवविद्रधिः पैत्तिकंसर्करालाजामधुकैःसारिवायुतैः ५ प्रदिह्या
क्षीरपिष्टैर्वावयस्योशीरचंदनैः पिवेद्वात्रिफलाक्वाथंत्रिवृताकल्कसंयुतं ६ इष्टिकासिकतालोहगोशकृत्तुषा
पांशुभिः गोमूत्रपिष्टैःसततंस्वेदयेत्श्लेष्मविद्रधिं ७ सौभांजनस्यनिर्यूहोहिंगुसैंधवसंयुतः अचिराद्विद्र
धिंहंतिप्रातःप्रातर्निषेवितः ८ श्वेतवर्षाभुवोमूलंमूलंवरुणकस्यच जलेनक्वथितंपीतमपक्वंविद्रधिंजा
येत् ९ कासीससैंधवशिलाजतुहिंगुचूर्णोमिश्रीकृतोवरुणकल्कजःकषायः अभ्यंतरस्थितमपक्वमा
निप्रमाणोन्नतमयंजयतिविद्रधिमुग्रसोफं १० अपक्वेत्वेतदुद्दिष्टंपक्वेतुव्रणवत्क्रिया ॥ इतियोग

दर्द्रुदंशाम्यतिनान्यथैतत २१ राजमार्तंडात वातार्बुदेक्षीरघृतांबुसिद्धैर्हत्कैःसतैलैरुपनाहयेत्तु कुर्याज्जमुखान्यु
पनाहनानिसिद्धैश्च मांसैरथवेसवारैः २२ स्वेदंविदध्यात्कुशलश्चनाड्यास्वंगेणास्रृक्चैवहुणोहरेच्च वातप्रतिघ्नैरुप ध२
योम्लवर्गैःसिद्धसिताख्यांतघृतांपिवेद्धा २३ स्वेदोपनाहाम्लद्रवस्तुपथ्याःपित्तार्बुदेकायविरेचनंच विम्लाप्यसोदुंबरा
शाकगोजीपत्रैर्भृशंक्षौद्रयुतैःप्रलिंपेत २४ शुद्धस्यजंतोःकफजेर्बुदेरक्तंचसिक्तेश्रवतेर्बुदंयत मेदःकृतेमांसकृते
पिकार्यैव्रणोदितंसर्वचिकित्सितंच २५ ॐ इतियोगतरंगिण्यांगंडमालापचीगलगंडग्रंथ्यर्बुदचिकित्साकथनं
नामत्रिचत्वारिंशस्तरंगः ॐ अथश्लीपदः श्लीपदःपादशोथस्यान्मेदःकफसमुद्भवः नासाकर्णाक्षिहस्ताग्र
वप्योष्ठःकेप्यसंपुनः धत्तूरैरंडवर्षाभ्रूनिर्गुंडीशिग्रुशर्षपैः प्रलेपःश्लीपदंहंतिचिरोत्थमपिदारुणं २ कल्लाचित्रकदं
तीनांकर्षमर्द्धपलंपलं विंशतिश्चहरीतक्याःगुडस्यचपलद्वयं ३ मधुनामोदकंखादेत्श्लीपदंहंतिदुस्तरं संपिष्टमा
रनालेनरूपिकामूलवल्कलं ४ प्रलेपात्श्लीपदंहंतिवद्धमूलमपिदृढं पिंडारक तरुसंभववसिफाजयतिसार्षपेषा
पीता श्लीपदमुग्र्यंनियतंवध्वास्त्रेराजंधायां ५ हितश्चलेपनेनित्यंचित्रकोदेवदारुच सिद्धार्थशिग्रुकल्कोवा
सुखोष्णोमूत्रपेषितः ६ विडंगमरिचार्कैश्चनागरैश्चित्रकेतथा भद्रदार्व्येलकाख्यैश्चसर्वैश्चलवणोश्चच तैलंपक्वंपिवे रामः

याशिराश्च व्रणोन्नतं ग्रंथिमसृक् सशोफं कुर्वंत्यतो ग्रंथिरिति प्रदिष्टः ११ हिंस्रा सरोहिरायस्ताश्च भार्गी श्योना
कबिल्वा गुरुजातिगंधा गोजीवपिष्टा सहतालपत्र्या ग्रंथौ विधेयो निलजे प्रलेपः १२ जलाबुकाभिः पित्तकृते हितास्तु
क्षीरोदकाभ्यां परिषेचनं च द्राक्षारसेनेक्षुरसेन वापि चूर्णं पिवेद्वापि हरीतकीनां १३ मधूक जंबवर्ज्जुन वेतसानां
त्वग्भिः प्रदेहानवचारयेच्च हितेषु दोषेषु यथानपूर्वं ग्रंथौ भिषक् श्लेष्मसमुत्थितेषु १४ अमर्मजातं समम
प्रयातं तत्पक्वमेवापहरेद्विचार्य देहस्थिते वा ससिसिद्धकर्मा स घःक्षतोक्तं च विधिं विदध्यात् १५ शास्त्रेण चो
त्याघसपक्वमाशु प्रक्षालयेत्पथ्यतमैः कषायैः संशोधनैस्तत्तु विशोधयेत्तु क्षारोत्तरैःसौद्रघृतःप्रगाढैः
१६ सिद्धं च तैलं त्ववतीर्णतोयं विडंगपाठारजनीविपक्वं मेदःसमुत्थे किलु कल्कदिग्धे कृतोपरिष्टाद्विगु
रांदीतं १७ हुताशतप्तेन मुहुःप्रमृज्यास्त्रोहेन धीमान्नवच्छिन्नतायां प्रविष्टदर्व्यां च पलाशपाचापनप्रया
स्विन्नमस्यकार्यैः १८ प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः सुवर्चलाद्यैर्हरितालमिश्रैः ससैंधवैः क्षारघृतप्र
गाढैः क्षारोत्तरैरेनमभिप्रशोध्य १९ तैलं विदध्याद्धि करंजगुंजावंशावलेखं गुदमूत्रसिद्धं यथिरेचार्द्धं
दोषापकी लिप्तेयवाक्षारविडंगबीजगोधोपलैः स्यान्मसृणीकृतेर्यत २० रक्तेन मिश्रैःसरसस्यसद्यस्त
निपान्ययासस्त्रमपोह्यमेदोदहेत्तुपक्वं त्वथवा विदार्य

श्रीराघः
९१
यो॰त॰

तोयमथितैश्चूर्णीकृतं वृध्रजित १ भ्रष्टश्चैरंडतैलेन कल्कः पथ्यासमुद्भवः कृष्णासैंधवसंयुक्तो वृध्ररोगह
रः परः २ ॥ इति यो॰ वृध्नचिकित्सा यां द्वात्रिंशस्तरंगः ॥ अथ गंडमाला गंडमालोहन्मिर्गंडैः कंठदेशसमुद्भ
वैः एषैव चिरवृद्धास्यादपचीत्रणसंज्ञिका १ माक्षिका व्योसकृत्पीतः कांचोवरुणमूलजः गंडमालां निहंत्या।
शु चिरकालानुवंधिनी २ विडंगामैलसिंधूत्थदारुलोग्राक्षारदारुभिः तैलं चतुर्गुणोत्तिदंकटुतुंबीरसेशुभे ३
गंडमालाहरश्रेष्ठं गलगंडे पिशस्यते इति तुंबीतैलं व्योषंविडंगमधुकंसैंधवंदेवदारुच तैलमेभिः शृतं सम्य
क्छ्रुमप्यपचीं जयेत् ४ व्योषाद्यंतैलं छुछुंदर्यांविपक्वंतुसर्पणोतैलंवरंध्रुवं अभ्यंगान्नाशयेन्नृणां गंडमा
लांसुदारुणाम् ५ छुछुंदरीतैलं सोभांजनं देवदारुकांजिकेन प्रयोपितं कोष्णप्रलेपनोहन्यादपचीं दुस्तरा
मपि ६ शोभांजनं अथ गलगंडः निबद्धःश्वयथुर्यस्यमुष्कवल्लंबते गले महान्वायदिवाह्रस्वो गलगंडं
तमादिशेत् ७ जीर्णकर्कारुकरसो विडसैंधवसंयुतः नस्येन तरुणां हंति गलगंडं न संशयः ८ श्वेतापराजि
तामूलं प्रातः पिष्ट्वा पिवेन्नरः सर्पिषा नियताहारो गलगंडप्रशांतये ९ तिक्तालाबुफलेपक्वे सप्ताहमुषितं जलं
गलगंडं निहंत्याशु पानात्पथ्यानुशीलितम् १० अथ ग्रंथिः वातादयोमांसमसृक्प्रदुष्टाः प्रदूष्यमेदश्चतत राम

शोथचिकित्साकथनं नामैकत्रिंशत्तरंगः अथमुष्कवृद्धिः अधोगतिर्वंक्षणतोमुष्कौ प्राप्य करोति हि दोषाश्च
मेदोमूत्रांत्रैः सप्तधां ऽठोन्नतिमरुत् १ यः पित्तदोषेणाकुरंडरोगो भवेद्धि शोदे क्षिणमुष्कभागे ततोर्द्धभागेश्रवणा
स्यवेधं वा मस्य कुर्यात्परतोपरत्र २ यष्ट्याक्षवीजश्च शुंठी निर्गुंडीनां मिथः संमिश्रचूर्णैः घृतमधुसहिता पिंडीनस्य
मतेमुष्कवृद्धिकथं ३ त्रिफलाक्वाथगोमूत्रं पिबेत्प्रातरतंद्रितः कोष्ठवातोद्भवं शूलं हंति न्याक्षणतोद्भवं ४
कषायलेपयोः प्रायो युज्यते रक्तचंदनं चंदनं मधुकं पद्मं उशीरं नीलमुत्पलं ५ क्षीरपिष्टैः प्रलेपः स्याद्दाहशो
थव्रणापहः पंचवल्कलकल्केन सघृतेन प्रलेपनं ६ सर्वं पित्तहरं कार्यं रक्तजे रक्तमोक्षणं वचासर्षपतैले
नप्रलेपः शोथनाशनः ७ तैलमेरंडजं पीतं बलासिद्धपयोन्वितं आध्मानशूलोपचितां मंत्रवृद्धिं जयेन्न
रः ८ गोमूत्रसिद्धां रुबुतैलभृष्टां हरीतकीं सैंधवचूर्णयुक्तां खादेन्नरः कोष्णजलानुपानान्निहंति कूरंडम
तिप्रवृद्धं ९ ॐ इतियोगतरंगिण्यां अंत्रवृद्धिचिकित्साकथनंनाम द्वात्रिंशत्तरंगः ॐ अथवृध्नः
वंक्षणोदोषजः शोथो वृध्न इत्यभिधीयते मूलं विल्वकपित्थयो ररलुकस्याग्नेर्बृहत्योर्द्वयोः श्यामापूति
करंजशिग्रुकतरु विश्वौषधास्करं कल्पाग्रंथिकचव्यपंचलवणक्षाराजमोदान्वितं पीतं कांजिककोष्ण।

त रसेन्द्रदारिरसः अष्टटंकणातुल्यं तु मरिचं च रसं समः गंधकं पिप्पली शुंठी द्वौ द्वौ भागौ विचूर्णयेत् २९ स
र्वतुल्यं क्षिपेद्दंतीबीजं सर्वमकल्मषं द्विगुंजं रेचनं चैतदुदराण्यपोहति ३० इति नाराचः ॥ इति योगतरंगिण्यां
उदरचिकित्साकथनं नाम त्रिंशस्तरंगः ॥ अथ श्वयथुः रक्तपित्तकफान्वायुः शिराः प्राप्य प्रवाहगाः शोथं करो
ति नवधा तेषु स्वेदाभिधानतः १ शुंठी पुनर्नवैरंडपंचमूलीसृतं जलं वातिके श्वयथौ शस्तं पानाहारपरिग्रहे २
पटोलत्रिफलारिष्टदार्वीक्वाथः सगुग्गुलुः हंति पित्तभवं शोथं तृष्णाज्वरसमन्वितं ३ पुनर्नवाविश्वतवक्रदुद्वी
शम्पाकपथ्यामरदारुकल्कं शोथे कफोत्थे महिषाख्यमूत्रं पिवेत्सलिलं तथैव ४ कफे तु रूक्षाम्लसिकतापुरा
णापिण्याकशिग्रुत्वगभिप्रलेपः गुडार्द्रकं वा गुडपिप्पलीं वा गुडाभयां वा गुडनागरं वा ५ कर्षाभिवृद्ध्या त्रिप्र
लप्रमाणां खादेन्नरः पक्षमथापि मासं शोथप्रतिश्यायगलास्यरोगान्सश्वासकासारुचिपीनसादीन् ६ जी
र्णज्वरार्शोग्रहणीविकारान्हन्यात्तथान्यान्पित्तवातरोगान् कृष्णाग्निविश्वघनजीरककंटकारीपाठानिशा
करिकणामगधाजरानां ७ चूर्णं कवोष्णसलिलेन विलोड्य पीतं नानाप्रकारश्वयथुरोगहरं नराणां स्त्रीतैल
घृतमद्यानि गुर्वम्ललवणानि च जांगलं च दिवास्वापं शोथवान् – वर्जयेन्नरः ८ ॥ इति योगतरंगिण्यां

भागत्रयंतथा त्वचि हिशालि हिगुरोसीतलांस्याच्चतुर्गुणा १५ एषनारायणोनामचूर्णो रोगगणापहः
तक्रेणोदराभिःपेयोगुल्मिभिर्वदराम्बुना १६ आनद्धवातेसुरयावातरोगेप्रसन्नया दधिमंडेनविट्सङ्गेदाडिमां
बुभिरर्शसि १७ परिकर्तिषुवृक्षाम्लैरुष्णाम्बुभिरजीर्णके भगंदरेपांडुरोगेकासेश्वासेगलग्रहे १८ हृद्रोगेग्रह
णीदोषेकुष्ठेमंदानलेज्वरे दंष्ट्राविषेमूलविषेगरलेकृत्रिमेविषे १९ यथार्हंस्निग्धकोष्ठेनपेयमेतद्विरेचनं इ
तिनारायणचूर्णं त्वचनात्रिफलापाठादंतीकटुकरोहिणी २० चतुरंगुलमज्जाचतथाचकटुकत्रयं चित्रकं
चव्यहस्त्यौचतथाचगजपिप्पली २१ एलाहीसीरंपलंस्यात्सुतस्याष्टौप्रदापयेत् यावत्पिबतितद्विंदून्तावद्वेगाः
न्निरिच्यते २२ एतद्विंदुघृतंसिद्धमृषिभिःसमुदाहृतं २३ इतिविंदुघृतं रोहीतकाभयाशुंठीपिबेन्मूत्रेणशान्ति
तः सर्वोदरहरःप्लीहमेहार्शःकृमिगुल्मनुत् २४ ०पातव्योयुक्तितःक्षारक्षीरेणोदधिसुक्तिजः पयसाचप्रा
योज्यःपिप्पल्यःप्लीहशांतये २५ श्रोहकानूपजंमांसंशाकंपिष्टतिलान्कृताः व्यायामाध्वदिवास्वापपानानि
णीविवर्जयेत् २६ अत्रक्रव्यादोरसोहितः सूतगंधकणापथ्यात्रयारग्वधकानहः २७ मर्दयेद्धन्त्रिदुग्धेन
तन्माषंखादयेद्धितं न्त्रणांजलोदरंहंतिपथ्यंशाल्योदनंदधि २८ चिंचाफलरसंचात्रपानमात्रप्रयोजये

न्मूत्रेणवा समन्वितं ज्योतिष्मत्याः पिबेत्तैलं पयसा च विरेचनं ३ सर्वेभ्यो जठरेभ्यस्तु शीघ्रं मुच्येत मानवः वातो
दरी पिबेत्तक्रं पिप्पलीलवणान्वितं ४ शार्करामरिचोपेतं स्वादु पित्तोदरी पिबेत् यवानीसैंधवाजाजीव्योषयु
क्तं कफोदरी ५ सन्निपातोदरी [redacted] तक्रं त्रिकटुक्षारसैंधवैः त्रिभिरथ परिवृद्धं पंचभिः सप्तभिर्वा दशभिर
थ विवृद्धं पिप्पलीवर्द्धमानं इति पिबति पुमान्यस्तस्य न स्वाः कास ज्वर जठर गुदार्शो वातरक्तक्षयाः स्युः
६ स्नुहीपयोभाविता [redacted] नां पिप्पलीनां पयोश्नतः सहस्रं तु पयुंजीत शक्तितो जठरामयी ७ पटोलमू
लं रजनी विडंगं त्रिफलात्वचं कंपिल्लकं नीलिनीं च त्रिवृतां चेति चूर्णयेत् ८ षडाद्यान्कार्षिकान्भागा
नंत्याद्वित्रिचतुर्गुणान् श्लक्ष्णचूर्णितं ततो मुष्टिं गवां मूत्रेण वा पिबेत् ९ विरिक्तो जांगलरसै र्भुंजी
त मृदु मोदनं मंडं पेयां च पीत्वा वा सव्योषं षडहं पयः १० त्र्यहं पिबेत्ततश्चूर्णं पिबेदेवं ततः पुनः हंति सर्वो
दराण्येतच्चूर्णं जातोदकान्यपि ११ कामलां पांडुरोगं च श्वयथुं चापकर्षति १२ इति पटोलाद्यं चूर्णं
यवानी हपुषा धान्यं त्रिफला सोपकुंचिका कारवी पिप्पलीमूलमजगंधा सठी वचा १३ शताह्वा
जीरकं व्योषं स्वर्णक्षीरी सचित्रकं द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपंचकं १४ विडंगं च समांशानि दंती

श्वरोरसः एलासकर्पूरस्तिनासधात्रीजातीफलंगोक्षुरशाल्मलीत्वक् सूताभ्रवंगायसमस्मसर्वमेता।
त्समानंपरिमर्दनीयं २८ निष्कार्द्धमात्रोमधुनावलीढोहंतिसर्वामयमेहजातं २९ इतिप्रमेहकुठारोर
सः रसरत्नप्रदीपात् ॥ इतियोगतरंगिण्यांप्रमेहचिकित्साकथनंनामअष्टत्रिंशस्तरंगः ॥ अथमेदः
अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः मधुरान्नरसाप्रायः स्नेहान्मेदोविवर्द्धते १ मेदोमांसविवृद्धि।
त्वात्स्थूलस्थिगुदास्तनः अयथोपचयोत्साहोनरोतिस्थूलउच्यते २ हरिद्रानिशाद्वयात प्रातर्मधुयुतंवारि
सेवितंस्थौल्यनाशनं केवलंवारजन्यं तेपीतंमेदस्विनांहितं ३ सच्चव्यजीरकव्योषहिंगुसौवर्चलाभ्न
याः सक्तुनाशक्रवःपीता मेदोवृद्धिविनाशनाः ४ क्षारंवातालपत्रस्यहिंगुयुक्तंपिवेन्नरः मेदोवृद्धिवि
नाशायभक्तमंडसमन्विते ५ वासादलरसोपेतः शंखचूर्णेनसंयुतः बिल्वपत्ररसोवापिगात्रदोर्गंधि।
नाशनः ६ ॥ इतियोगतरंगिण्यांमेदश्चिकित्साकथनंनामऊनचत्वारिंशस्तरंगः ॥ अथोदरम् रु
ध्वास्वेदांबुवाहीनि दोषाःस्रोतांसिसंयुताः प्राणाग्न्यपानान्संदूष्यजनयंत्युदरंनृणां १ वंद्रात स्नेहाश
लिर्यवामुद्गाजांगलाश्चरसाहिताः विरेकास्थापनंसस्तं सर्वेषुजठरेष्वच २ क्षीरेरोगरंडजंतैलंपिवे

युक्तं वंगभ्योमपलार्द्धकं तुतुलया खंडेन पाकीकृतं १९ भुक्तं प्रातरिदं प्रमेहपवनाध्मानानिश्लानि चक्षेराग दैन्यमसृक्
श्रुतिसुखगुदस्त्रोत्राक्षिलोमोद्भवां हन्याद्रोगजराविपन्निशमनं मेधाग्निहृद् हर्षणं वल्यं वृष्टिकरं प्रमोदजनकं पूगेन
किं सेव्यते २० इति पूगीपाकः सारसंग्रहात दंतीदारुसदीशिलाह्व दहनैः भल्लातकाकाभयाह्लुकुवषांभ्रकरंज
युग्मवरुणोर्युक्तं पंचमल्लीयुतैः इत्येभिर्दशपालिकैः स्रुतमपां द्रोणे ष्टपक्वप्राप्ये वैरभिश्राभिकुलत्थकोलक
यवैः पादावशेषीकृते २१ अस्मिन्नोपकिसलनतोलिषकणां कपित्थविश्वोषधैभार्गीचव्यगजाह्वपिप्पलियुतैरे
भिश्चसिद्धं धृतं एतन्मेहहरं क्षयक्षयकरं हिक्कापहं गुल्मजित्पांडुत्वप्रतिघातिहृदुदरजः प्रध्वंसि धान्वंतरं २२
तिधान्वंतरं धृतं चिकित्सातः सूतं कांतं गंधतीक्ष्णोताप्यव्योषे फलत्रिकं शिलाजतु शिला कोलवीजं तालिकं कपि
त्थजं २३ त्रिःसप्तकृत्वो भृंगाद्भिर्भावयेच्चित्रकसंत्तकः मेघनादाख्यसूतश्च सर्वमेहान् प्रणाशयेत् २४ महा
निंबस्य बीजानि पेषयेत् तंडुलनांभुना सघृतान्यचिराद्धन्युः पानान्मेहान् चिरंतनान् २५ इति मेघनादो रसः
सूताभ्रमामलजलैः सप्ताहं भावयेद्रसं हरिशंकरसंज्ञः स्यात् भुक्तः सर्वप्रमेहजित् २६ इति हरिशंकरो रसः
रसस्य भस्मनातुल्यं वंगभस्म प्रकल्पयेत् अस्य गुंजाद्वयं हंति मेहानक्षौद्रसमन्वितं २७ इति वंगे।

दरंसपिडिकागुल्मप्रमेहारुचीरेतोदोषमुरक्षतंकफमरुत्पित्तार्तिमुग्रांजयेत् १४ वृंहंसंजनयेद्युवानमसमौ
जस्कंवलंवर्द्धयेदेतस्यानिनिषिद्धमन्नमसकृन्नाध्वागमंमैथुनं विख्यातागुडिकेयमर्चिततराचंद्रप्रभानाम
तःसांद्रानंदकरीतनोनिचरुचिंचंद्रेणतुल्यांतनो इतिचंद्रप्रभागुडिकायोगरत्नावल्यात् हेमांभोधरचंदनं
त्रिकटुकंधात्रीप्रियालंकुहूमज्जानस्त्रिसुगंधिजीरककयुगंश्रृंगाटकंवंशजं जातीकोशलवंगधान्यकयुतंप्र
त्येककर्षद्वयंपूगस्याष्टपलंविचूर्णपंचपयःप्रस्थत्रयेसर्पिषः १६ दद्याद्गोःकुडवंसितार्द्धकतुलांधात्रीव
रीद्वंजल्लीमंदाग्नौविपचेद्विषक्शुभदिनेसुस्निग्धभांडेक्षिपेत् यःखादेद्धिनिशाप्रभातसमयेमेहांश्चजी।
र्णाज्वरंपित्तंसाम्लमसृक्शुतिंगुददशोर्वक्राक्षिनासास्रुच १७ मंदाग्निंचविजित्यपुष्टिमतुलांकुर्याच्च
शुक्रप्रदंपूगंगर्भकरंपरंगदहरंस्त्रीणांमसृग्दोषजित् इतिपूगीपाकयोगरत्नावल्यात् श्रीखंडंत्रिसु
गंधिकेसरकणाशुंठीवरीचांबुदंश्रृंगाटंजलजंप्रियालवदरीधात्र्युन्नवीजंतुगा द्राक्षाजीरकधान्यकंसमु
मंनःपुष्पंचजातीदलंशुद्धारंदरदंपलार्द्धकमिदंसन्नारिकेरांत्रमत् १८ पूगंचाष्टपलंचसौरभपयःप्र।
स्थत्रयेसंपचेत्पश्चादामलकीवरीजलशरावार्द्धंश्चपिष्टीकृतं शुष्कीकृत्यकटाहकेचसद्घृतेमंदाग्निनाचूर्णी

हेषुसमुत्थितेषु ४ योगशतात न्यग्रोधोदुंबराश्वत्थश्योनाकारग्वधासनं आम्रंकपित्थंजंबूंचप्रियालंककुभंकेधवं
५ मधूकंमधुकंलोध्रंवरुणंपारिभद्रकं पटोलंमेषश्रृंगींचदंतीचित्रकमानकं ६ करंजंत्रिफलाशाकंभल्ला
तकफलानिच एतानिसमभागानिसूक्ष्मंचूर्णानिकारयेत ७ न्यग्रोधाद्यमिदंचूर्णंमधुनासहलेहयेत
फलत्रयंचानुपिवेत्तेनमूत्रंविसुध्यति ८ एतेनविंशतिर्मेहान्मूत्रकृछ्राणियानिच प्रशमंयांतियोगेनपिडि
काश्चनजायते ९ इतिन्यग्रोधाद्यंचूर्णं॥ दाता शिलाजतुनरःपीत्वाप्रातःक्षीररसितायुतं मुच्यतेसर्वमेहे।
भ्यश्चिसम्प्रदिवसैर्नरः १० सरावकाद्याःपिडिकाशोधयेच्छोथवद्भिषक् पक्वाचिकित्सेद्व्रणवत्तेऽधिमर्मस
मुद्भवाः ११ वेल्लव्योषफलत्रयत्रिलवणाढिक्षारश्चव्यानलश्यामापिप्पलिमूलमुस्तकसटीमाक्षीकधातु
त्वचः षड्ग्रंथामरदारुवारुणकणाभूनिंबदंतीनिर्विषापत्रैलातिविषापिचुप्रमितयोलोहस्यकर्षाष्टकं १२
त्वक्क्षीरीपलिकापुरादशपलान्छोषिलाजन्मनोमीनाश्याःकुडवःकृतेतिगुडिकासंयोज्यसर्वंभिषक्
तत्रैकांप्रतिवासरंहिमद्धतक्षौद्रेणालिह्याद्रिमोतक्रंमस्तुपयोघृतंमधुरसंपश्चात्पिबेन्मात्रया १३ अर्शां
सिप्रदरंज्वरंचविषमंनाडीव्रणान्अश्मरीं कुष्ठंविद्रधिमग्निमांद्यमुदरंपांडुंआमयंकामलां यस्मात्तांसमगं

वैःकृतः कषायःक्षीरसंयुक्तःशार्करांप्रभिनत्त्यरं ७ क्षारोनिपीतस्तिलनालजातःसमाक्षिकःक्षीरयुतस्त्रिरा
त्रात् हंत्यश्मरींसिंधुविमिश्रितंवानिपीयमानंरुचकंप्रयत्नात् ८ गोपालकर्कटीमूलंपिष्टंपर्युषितांभसा
पीयमानंत्रिरात्रेणपातयेद्वाश्मरींहठात् ९ राजमार्तंडात् एलोपकुल्यामधुकाश्मभेदकौंतीश्वदंष्ट्रावृषा
कोरुबूकैः शृतंपिबेदश्मजतुप्रगाढं सशर्करेसाश्मरिमूत्रकृच्छ्रे १० योगशतात् हरीतकीगोक्षुरराजवृक्षा
षोपाषाणभिद्धन्वयवासकानां क्वाथंपिबेच्छर्करयावगाढं सशर्करेसाश्मरिमूत्रकृच्छ्रे ११ निर्गुंडिकाभि
र्वेलिस्कृततनाम्रंविमर्द्यगोलंसिकताख्ययंत्रे पक्वास्यबद्धःकिलमातुलुंगीजलेननिहंत्यश्मरितोगमुग्रं १२
इतित्रिविक्रमोरसःरसरत्नप्रदीपात् अत्रापिचैडकलेवरसोयोज्यः ॥ इतियोगतरंगिण्यामश्मरीचि
कित्साकथनंनामसप्तत्रिंशत्तरंगः ॥ अथप्रमेहाः दशषट्चापिचत्वारःकफपित्तसमीरजाः साध्याःया
प्याश्चसाध्यास्तेप्रमेहाःक्रमशोन्नृणां १ यवामालकवोरवोद्दालगोधूमचणकाढकी कुलत्थाश्चहिताभोज्ये
मेहिनांदेहिनांसदा २ सौवीरकंसुरांतक्रंतैलंक्षीरंगुडंघृतं अम्लेक्षुरसपिष्टान्नंमेहेहितानिवर्जयेत् ३
वंशात् फलत्रिकंदारुनिशाविशालामुस्तांचनिःक्वाथ्यनिशांसकल्कं पिबेत्कषायंमधुसंयुतंचसर्वप्रमे

पिबेत्काले यथादोषं यथाबलं ९ वातरेताः पित्तरेताः श्लेष्मरेताश्च ये नराः रक्तरेताः ग्रंथिरेताः पिबेयुरिद्ध
न्नरोगतो सर्पिरेतत्प्रयुंजीत स्त्रीगर्भं लभते चिरात् अप्रस्रवो बीजदोषो निर्दोषमूत्रदोषि तथैव च ११ प्रयोक्त
व्यमिदं सर्पिः चित्रकाद्यं सपुत्रवृधैः इति चित्रकाद्यं घृतं चरकात् अत्रापि चेन्द्रकलारसः प्रशस्यते ःःः ३
तियोगतरंगिण्यां मूत्राघातचिकित्साकथनं नाम षड्विंशस्तरंगः ःःः अथाश्मरी निरुध्य मूत्रमा
र्गं यायातन्नोजनयेद्रुजं कटिबस्तिप्रदेशेषु साश्मरीति निगद्यते १ रसस्यमश्मरीपात् विशोषयेद्ब
स्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा यदा तदाश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचनागोः २
रुग्विनिश्च्याति वरुणास्य त्वचं श्रेष्ठां शुंठीगोक्षुरसंयुतां यवक्षारगुडं दत्वा क्वाथयित्वा तु तं पिबेत्
३ अश्मरीं वातजां हंति चिरकालानुबंधिनीं वीरतरुसहचरदर्भवृक्षादनी गुंद्रानलकुशकाशा
अग्निमंथमोरटावसुकव सिरभल्लूककुरंटकेदीवरकपोतवंकाश्वदंष्ट्राचेति ४ वीरतर्वादिरि
त्येषगणो मारुतनाशनः अश्मरीर्कशराकृच्छ्रमूत्राघातरुजापहः ५ सुश्रुतात् वीरतर्वादिके क्वाथे
तरुणाः पंचसमन्वितैः भिनत्ति पित्तसंभूतामश्मरीं क्षिप्रमेव तु ६ वरुणात्वक्शिलाभेदशुंठीगोक्षुर

महाचंद्रकलानाम्नारसेंद्रोयंनिरूपितः १५ अम्लपित्तप्रशमनःप्रदरध्वंसकारकः अंतर्दाहमहादाहविध्वंस
नघनाघनः १६ ग्रीष्मकालेशरत्कालेविशेषेणप्रशस्यते रक्तमूर्छारक्तपित्ततापज्वरवनानलः १७ मूत्रकृच्छ्रा
णिसर्वाणिप्रमेहानपिदुस्तरान् हरत्येषरसोनूनंमहाचंद्रकलाभिधः १८ सारसंग्रहात् ॥ इतियोगतरंगि
णयांमूत्रकृच्छ्रचिकित्साकथनंनामपंचत्रिंशत्तरंगः ॥ अथमूत्राघातः मूत्रनाडीगतेदोषैरल्पमल्पंसवेद
नं यदाप्रवर्त्ततेमूत्रंमूत्राघातःसउच्यते १ तेऽष्टौवातकुंडलिकादयः १२ पटोलात्तयावसुकाच्चपारिभद्रा
न्निलादपि क्षारोदकेनमदिरांत्वगेलोषणसंयुतं २ पिबेद्गुडोदकंसम्यक्लिह्यात्तान्यथापृथक् त्रिफले
कल्कसंयुक्तंलवणंचापियःपिबेत् ३ निदिग्धिकायाःस्वरसंपिबेद्वातांतवस्त्रुतं जलेकुंकुमक[illegible]ल्कंवास
क्षौद्रमुषितंनिशि स्त्रीणामतिप्रसंगेनशोणितंयस्यसिच्यते मैथुनोपरमस्तस्यबृंहणीयोविधिर्हितः ५
चित्रकंसारिवाचैवबलाकालापिसारिवा द्राक्षाविशालापिप्पल्यस्तथाचत्रिफलाभवेत् ६ तथैवमधुकं
दद्यात्पुष्यान्यामलकानिच घृताढकंपचेदेतैःकल्कैरक्षसमन्वितैः ७ क्षीरद्रोणेजलद्रोणेतत्सिद्धमव
तारयेत् शीतेपरिस्रुतंचैवशर्कराप्रस्थसंयुतं ८ तुगाक्षीर्याश्चतत्सर्वंमतिमान्परिमिश्रयेत् ततोमिते

स्वरसैर्द्धृतं च कृच्छ्रेषु पित्तप्रभवेषु कार्यं ४ कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवं पित्तकृच्छ्रहरं पंचमूलं व
स्तिविशोधनं ५ एतत्सिद्धं पयः पीतं मेढ्रगं हंति शोणितं मूत्रेणास्रयावापि कदलीस्वरसेन वा ६ कफकृ
च्छ्रविनाशाय सूक्ष्मां पिष्ट्वा त्रुटिं पिबेत् यवक्षारसमायुक्तं पिबेत्तक्रं प्रकामतः ७ मूत्रकृच्छ्रविनाश
नाय तथैवाश्मरिनाशने तत्राभिघातजे कुर्यात्सद्योव्रणचिकित्सितं ८ लेहं शुक्रविबंधोत्थे
शिलाजतु समाक्षिकं मूत्राश्मभेदकशिलाजतुपिप्पलीनां चूर्णानि तंडुलजलैर्लुलितानि पीत्वा
द्राक्षागुडेन सहितान्यवलेह्य धीमान्नासन्नमृत्युरपि जीवति मूत्रकृच्छ्री ९ निदिग्धिकारसो वा
पि सक्षौद्रः कृच्छ्रनाशनः सितातुल्यो यवक्षारः सर्वकृच्छ्रविनाशनः १० वंशात प्रत्येकं कोला
मात्रया सूतेतामस्रे तथाभ्रके द्विगुणं गंधकं चैव कृत्वा कज्जलिकां शुभां ११ मुस्तादाडिमतोयेन।
केतकीपुष्पवारिणा सह देयाः कुमार्याश्च पर्पटोशीरयोरपि १२ तालमूल्याश्च वर्याश्च भावयि
त्वा दिने दिने त्रिफलागुडूचीकासत्वपर्पटोशीरमागधी १३ श्रीखंडसारिवा चैषां समानं चूर्णकं
क्षिपेत् द्राक्षाफलकषायेन सप्तधा परिभावयेत् १४ छायाशुष्कं विधायाथ वटीः कार्याश्चणोपमा

इति योगतरंगिण्यां गुल्मचिकित्साकथनं नाम त्रयस्त्रिंशस्तरंगः ॥ अथ हृद्रोगः शोषयित्वा रसं दोषा वि-
गुणा हृदयं गताः हृदि बाधां प्रकुर्वंति हृद्रोगं तं प्रचक्षते १ घृतेन दुग्धेन गुडांभसा वा पिबंति चूर्णं ककुभ-
त्वचो ये हृद्रोगजीर्णज्वररक्तपित्तं हत्वा भवेयुश्चिरजीविनस्ते २ हिंगूग्रगंधाविडविश्वकृष्णाकुष्ठाभया-
चित्रकयावशूकं पिबेच्च सौवर्चलपौष्कराढ्यं यवांभसा शूलहृदामयघ्नं ३ कृमिजे च पिबेन्मूत्रं विडंगा-
मयसंयुतं हृदि स्थिता पतंत्येवमधःस्याः कृमयो नृणां ४ वैद्यात बाल्हीकविश्वदहनाभयायावशूकपथ्या-
वचाविडकणात्वचैकेनिहंन्यात स्वतः सपुष्करजपेययववारिपीतो हृद्रोगमग्निविकलत्वमतिप्रवृद्धं ५ रस-
त्नमरीपात ॥ इति योगतरंगिण्यां हृद्रोगचिकित्साकथनं नाम चतुस्त्रिंशस्तरंगः ॥ अथ मूत्रकृच्छ्रं
पृथक्समस्तैस्तैः शुक्रविड्भ्यां धाभिघाततः अश्मर्या चाष्टधेति स्यान्मूत्रकृच्छ्रो हृजाकरः १ मूत्रकृच्छ्रः।
सपक्षकृच्छ्रान्मूत्रयेद्वस्तिरोधकृत् अभ्यंजनस्नेहनिरूहवस्तिस्वेदोपनाहोत्तरवस्तिसेकान् स्थिरादिभि-
र्वातहरैश्च सिद्धान्दद्यादसांश्चानिलमूत्रकृच्छ्रे २ अमृतानागरंधात्रीवाजिगंधात्रिकंटकं प्रपिबेद्वात-
रोगार्तः शूलवान्मूत्रकृच्छ्रवान् ३ सेकावगाहाः शिशिराः प्रदेहाः ग्रैष्मो विधिर्वस्तिपयोविकाराः द्राक्षाविदारी

यो॰त॰ तैस्तुल्यं स्थापयेत वज्रक्षारमिदं निहंति सकलान्गुल्मानुदरयान्व्रणांपीतंतक्रयुतं प्रभातसमये कर्षप्रमाणंक्रमा
न् १४ मंदाग्निं सविसूचिकामरुचितामापांडुतांहीनतां श्वासंकासमजीर्णशैत्यपवनव्याधीन्चलाशोरुवान्
वज्रक्षारमिदं निवार्यभिषजां कीर्तिंविधत्तेतरां मोसंप्रवयति स्फुटं त्वरितयो ऽर्हे ऽकिमन्यंपुनः १५ इतिवज्रक्षा
रं हिंगुग्रंथिकधान्यजीरकवचाचव्याग्निपाठासठीवृक्षाम्लंलवणत्रयंत्रिकटुजेक्षारद्वयंदाडिमं पथ्या
पोष्करवेतसाम्लहपुषाजाज्यस्तदेभिः कृतंचूर्णंभावितमेतदार्द्रकरसेस्याद्वीजपूरस्यच १६ आध्मानगु
ह्रणीविकारगुदजान्गुल्मान्हृदाबर्तिकानंत्र्यत्याध्मानमहोदराश्मरियुतोस्तूणींहृद्यारोचकान् उरुस्तंभा
मतिभ्रमंच मनसोबाधिर्यमष्ठीलिकांप्रत्यष्ठीकिलिकामयापहरते प्राकीतमुष्णांभसा १७ हृत्कुक्षिवं
क्षणकटीजठरांतरेषु वस्तिस्तनोत्थफलकेषुच पार्श्वयोश्च शूलानिनाशयतिवातबलासजानिहिंग्वादिमाद्य
मिदमाश्विनसंहितायां १८ इतिहिंग्वाद्यंचूर्णं खर्जूरंमूलकंमत्स्यान्शुष्कशाकानिवैदलं नखादेद्दालुकंगु
ल्मीमधुराणिफलानिच १९ विश्वाहिंगुविडैः सार्धंक्व्याद्रोमक्षितोरसः गुल्मानशेषान्हीहांश्चविद्रधीनपि
नाशयेत २० शंखद्रावोजयत्याशुपथ्यासैंधवसंयुतः दुःसाध्यानपिगुल्मांश्चपथ्यलोपद्रवान्कृतान् २१ ॥ॐ॥

खो ह्लं जांगलरसः स्नुह्लिग्धो व्यक्तसैंधवः ४ कटुत्रिकसमायुक्तो हितः पानेषु गुल्मिनः काकोल्यादि सुसिद्धेना
सर्पिषा पित्तगुल्मकं ५ जयेच्च शीतलैर्वोपचारैः पित्तनाशनैः त्रिफलात्रवृतादंतीदशमूलपलोन्मितं ६ जले
चतुर्गुणे पक्वाच्चतुर्भागस्थिते रसे सर्पिरैरंडजं तैलं क्षीरं चैकत्र साधयेत ७ संसिद्धो मिश्रकः स्नेहः सक्षौद्रः
कफगुल्मजित कफवातविकारेषु कुष्ठप्लीहोदरेषु च ८ प्रयोज्यो मिश्रकस्नेहो योनिशूलेषु चाधिकं इति मिश्र
कस्नेहः क्षारत्र्यानलव्योषनीलीलवणपंचकं चूर्णितं सर्पिषा पेयं सर्वगुल्मोदरापहं ९ तिलक्काथो गुड
व्योषहिंगुभार्गीयुतो भवेत पीतो रक्तभवे गुल्मे नष्टे पुष्पे च योषितां १० सक्षारस्त्र्यूषणो मद्यं प्रपिबेदस्त्रगुल्म
जित पलाशक्षारतोयेन सिद्धं सर्पिः पिबेच्च सा ११ नादेईकुरजार्कशिग्रुबृहतीस्नुक् बिल्वभल्लातकव्याघ्री
किंशुकपारिभद्रकजयापामार्गनीपाग्निकान वासामुष्ककपाटलासलवणान्दग्ध्वा रसं पाचितं हिंग्वादिप्र
तिवापमेतदुदितं गुल्मोदराष्ठीलिषु १२ इति नादेईरसः क्षीरं वज्रतरुद्भवं दशपलं तावत्ययो प्यर्कजं प्रत्ये
कं पलपंचकं चलवणांक्षारं च पंचात्मकं त्रिंशत्यार्कदलैर्युतं पवितरो भिर्जैश्चतुर्भिः पलैर्मंदाग्नौ गुरुमार्गतो
गजपुटे वह्नौ विपक्वीकृतं १३ संचूर्ण्यापि च कटुत्रयं त्रिफलमप्येकं पलं रामठं सर्वं वस्त्रपूनीतमेतदमलेपा

सोश्रुजे कार्यैः स्निग्धस्वेदप्रयत्नतः ९ स्रवजेसूत्रवर्त्याच आग्गाचर्यानयेत्स्रवं उद्गारजे क्रमश्चात्र स्नैहिकं धूम
माचरेत १० छर्दिघाते यथादोषं नालस्नेहादिभिर्जयेत शुक्रोदावर्तिनं वैद्यो रमयेत्सहकांतया ११ क्षुद्विघातेहि
संस्निग्धं उष्णमल्पं च भोजनं तृष्णाघाते पिबेन्मद्यं यवागूं स्वादुशीतलां १२ रसेनाघातुविश्रांतः श्रमस्वासार्दि
तो नरः निद्राघाते पिबेत्क्षीरं माहिषं रजनीमुखे १३ तिलतैलेन संम्रज्य पत्तन्निशायनं चरेत् गाढधूमविधव्यो
षगुड्मूत्रैर्विपाचिता १४ गुदेंगुष्ठसमां वर्तिर्वि॰ वंधानाहशूलनुत् आमासयेश्मलेष्मा गुरुत्वे हृल्लासउद्ग
रविघाते नेच स्तंभः कटीपृष्ठपुरीषमूत्रे शूलो पमर्दा शाहृतो वमिश्च १६ श्वासश्चापकासयजेम वेतित्त
थालसोक्तानिचलक्षणानि तृष्णार्दितं परिक्लिष्टं क्षीणं शूलेरुपद्रुतं शकृद्वमित्वं मतिमानुदावर्तिनमुत्सृ
जेत् अत्रक्रव्यारोरसोदेयः १७ ॐ इति योगतरंगिण्यां उदावर्तचिकित्साकथनं नाम द्वात्रिंशस्तरंगः ॐ अ
थगुल्मः हृद्बस्त्योरंतरे ग्रंथिर्जायते यश्चलाचलः नाभेरधस्तात्संजातः संचारी यदि वाचलः १ स गुल्मः
पंचधा दोषैः सर्वैश्चास्रक्रमवोपिसः लंघनं दीपनं स्निग्धमुष्णं वातानुलोमनं २ बृंहणं च भवेदन्नं तद्धि
ते सर्वगुल्मिनां त्व जिंकाकुष्ठसहितः क्षारः केतकिजोपिवा ३ पीतस्तैलेन समयेद्गुल्मं पवनसंभवं सु

हिंगुचैवढयंढयं पलाष्टकंपट्नोचविंचाक्षारेपलाष्टकं सप्तवारंशोषभस्मन्नंवीराम्लेनसेवयेत् १२ पलाष्ट
कंचसंयोज्यंतत्सर्वंनिंबुकद्रवैः दिनंमर्द्यकोलमात्रंभक्षयेत्सर्वंशूलजित् १३ अजीर्णोदरमंदाग्निमसाध्य
मपिनाशयेत् शूलदावानलाख्योयंरसोजीर्णशिरोग्रहात् १४ इतिशूलदावानलाख्योरसः साररसंग्रहात्
॥ इतियोगतरंगिण्यांपरिणामशूलचिकित्साकथनंनामैकत्रिंशत्तरंगः ॥ अथोदावर्त्तः वातविण्मूत्र
जृंभाश्रुक्षवोद्गारवमींद्रियैः क्षुत्तृष्णाश्वासनिद्राणां धृत्योदावर्त्तसंभवः १ हरीतकीयवक्षारपीलुनी
त्रिवृतातथा साज्यंचूर्णंपिबेदेषामुदावर्त्तनिवर्त्तकं २ हिंगुकुष्ठवचास्वर्जिविडंचेतिद्विरुत्तरं पीतंमद्येनतच्चू
र्णमुदावर्त्तहरंपरं ३ मदनंपिप्पलीकुष्टंवचागौरश्चसर्षपाः गुडक्षारसमायुक्ताफलवर्त्तिःप्रशस्यते ४ खंड
पलंत्रिवृतासममुपकुल्याकर्षचूर्णितंश्लक्ष्णं प्राग्भोजनस्यसमधुविडालपदकंलिहेत्प्राज्ञः ५ एतद्गाढपु
रीषेपित्तेचकफेचविनियोज्यं स्वादुर्न्नपयोग्योयंचूर्णोनाराचकोनाम्ना ६ इतिनाराचकंचूर्णंवृंदात् सुतं
सौवर्चलवतींमूत्रैर्व्विभिर्हतेपिबेत् पंचमूलीशृतंक्षीरेद्राक्षारसमथापिवा ७ मूत्रजेकृच्छ्राश्मरीविधिंप्रयुंजी
तमिषुवरः स्नेहस्वेदैरुदावर्त्तं जृंभाजंसमुपाचरेत् ८ मरिचाद्यंजनैर्धूमैर्न्निर्निमेषावलोकनैः अश्रुमो

व्यायामं मैथुनं मद्यं लवणं कटुकानि च वेगरोधं श्रमं क्रोधं वर्जयेच्छूलवान्नरः ३९ ॥ इति योगतरंगि
ण्यां शूलचिकित्साकथनं नाम त्रिंशत्तरंगः ॥ अन्ने जीर्यति यच्छूलं तदेव परिणामजं साधमान्नाटोपविराम्
त्रवेंधमसृष्टविधेतया १ अन्नकाले लंघनं प्रथमं कुर्याद्वमनं सविरेचनं वस्तिकर्मापरं चात्र पंक्तिशूले प्रशस्यते २
नागरं तिलगुडं कल्कं पयसा संसाध्य यः पुमान् खादेत् उग्रं परिणामशूलं सप्ताहान्नाशमायाति ३ शंबूकजं भ
स्म पीतं जलेनोष्णेन तत्क्षणात् पंक्तिजं विनिहंत्येव शूलं विष्णुरिवासुरान् ४ लोहकिट्टपलान्यष्टौ गोमूत्रा
द्धाढके पचेत् क्षीरप्रस्थे च तत्सिद्धं पंक्तिशूलहरं परं ५ इति क्षीरमंडूरः शंखनाभ्या लोहचूर्णं लिह्यात्समधु
शर्करं परिणामभवं शूलं सद्यो हंति न संशयः ६ विडंगचित्रकं चव्यं त्रिफलाव्योषणानि च नवभागानि चैव।
तानि लोहकिट्टसमानि च ७ गोमूत्रेऽष्टगुणे दत्वा मूत्राद्द्विगुणकोऽगुडः शनैर्मृद्वग्निना पक्त्वा सुसिद्धं पिं
डीगतं ८ स्निग्धभांडे विनिक्षिप्य भक्षयेत्कोलमात्रया प्राग्भक्ष्य पीते क्रमेणैव भोजनस्य प्रयोजितः ९
योगोयं समस्त्याशु पंक्तिशूलं सुदारुणं कामलां पांडुरोगं च शोफं मेदोऽनिलार्शसां १० शूलानां नाशकृया
हेतोस्तारयाप्रकटीकृतः इति तारामंडूरः वृंदात् शुद्धसूतं विषं गंधं पलांशं मर्दयेद्दृढं मरिचं पिप्पली शुंठी

माषो मध्वाज्यसंयुक्तो देयो स्यपरिणामजे अन्येषेरंडतैलेन हिंगुत्रययुतो हितः ३० इति त्रिपुरभैरवो रसः हिंगुस्त्राजं।
वरिश्री पटुजरणाजगन्धकसमभागयार्यावह्निश्रीदीप्यचूर्णां प्रथमतउपरिष्टाद्भावनाभिः शृंगं सेव्यंतत्प्रो भसैतहिंगु
णगुडयुतं हंति वातार्शसी हृत्पीडां शूलप्रमेहाहविगरलहृत्कुष्ठगुल्मौश्वकासं ३१ सेयं माईल गुडिकाधन्वंतरिका
ताहरेत रक्षःपिशाचादिभयं श्लेष्मश्वासामपांडुता ३२ शूलगजकेशरी शिवावचाहिंगुविषाकलिंगहचिकं।
समं कर्षप्रमाणं भुनापेयमनुपानं हि शूललिभिः ३३ क्षारंकपर्द्दाद्धिषसैंधवौच व्योषंच संमर्द्य भुंजेगवल्ल्याः रसे
न गुंजाप्रमितः प्रदिष्टः समीरशूले महदिः प्रचंडः ३४ इति शूलगजकेशरी रसः रसवल्लि गगनार्कं वेतसाम्लं वि
षं स्यात समभिति पथ्यगेत द्भावयेत अत्र मेतैः कनकभुजगवल्लीकैटकारीजयाद्भिः सकमलतिलवासामृ
षिता छिन्नपूरैः अहणा सहशा शाकैर्मातुलान्याप योज्यः पटुगणा रसवल्ल्या भावयेद्दावर्कैर्द्विः दहनवदन
संज्ञो वल्लमात्रो निहंति प्रबलपवनशूलं तद्विकारानशेषान इत्यग्निमुखो रसः रसरत्नप्रदीपात व्योषग्रं
थिवचाग्नि हिंगु जरणा टंकं विषं भिंबकंद्रावे राईकजे रसे विर्मिश्रितं तुल्यं मरीचोपमा कर्त्तव्या गुटिका घ।
सादिन सवे सलाक वोगनाश्वनाशूलं लवष्ट विधं निहंति सहसा सूर्यप्रभा नामतः ३७ इति सूर्यप्रभो प्रवटी

त्योपेतं सद्यः शूलनिवारणं ६ वामयेत्पित्तशूलार्त्तं पटोलेक्षुरसादिभिः पश्चाद्विरेचयेत्सम्यक्पीतहृद्विविरेच
नैः ७ गुडशालियवाक्षीरं सर्पिर्दुग्धं विरेचनं जांगलानि च मांसानि भेषजं पित्तशूलिनः ८ धात्र्या रसं विदा
र्या वा त्रायंतीगोस्तनांबुना पिबेत्सशर्करं सद्यः पित्तशूलनिवारणं ९ श्लेष्मशूलहरी पेया पंचकोलेन सा
धिता विदारीदाडिमरसः सव्योषलवणान्वितः १० क्षौद्रयुक्तो निहंत्याशु शूलं दोषत्रयोद्भवं आमशूले प्रदात
व्यं लघुवैश्वानरचकं ११ खंडात कणाचूर्णस्य कुडवं षट्पलं हविषस्तथा पलषोडशकं खंडं शतावर्याः पला
ष्टकं १२ पलषोडशकं चैव शिवायाः स्वरसस्य च क्षीरप्रस्थद्वये सार्द्धं लेहीभूतं तदुद्धरेत् १३ त्रिजातमुस्त
धान्याकं शृंगीमोसी द्विजीरकं अभयामलकं चैव चूर्णीकृत्य दशकार्षिकं १४ तदर्द्धं मरिचं भागं सारं खदिरमेव
च मधुत्रिफलसंयुक्तं खादेत्सिद्धं यथाबलं १५ शूलारोचकहृल्लासछर्दिपित्ताम्लरोगनुत् अग्निसंदीपनी
ह्यात्खंडपिप्पलिकामता १६ इति खंडपिप्पलिका भागो रस—स्य भागश्च हेम्नः पिष्टिं विधाय च तया द्वादश
भागानि ताम्रपत्राणि लेपयेत् १७ अर्द्धांशो गंधकं दत्वा पलमात्रं समंततः क्षारस्य मृगशृंगस्य चूर्णीयो
ज्यं समंततः १८ सिंचेन्मत्स्याक्षिनीरेण पक्त्वा यामचतुष्टयं पिबेच्छूलहरः सूतो भवेत्त्रिपुरभैरवः १९

गुलः आमवातं कटीपृष्ठं जानुजंघग्रहं जयेत् २७ आपिवातनासनो रसो योज्यः दधिमत्स्यगुडक्षीरपोतकी
माषपिष्टकं वर्जयेदामवातार्त्तौ मांसमानूपजं च यत् २८ अभिष्यंदकरा ये च ये चान्ये गुरुपिच्छलाः वर्जनी
याः प्रयत्नेन ह्यामवातार्दितैर्नरैः २९ हितं यूषं च कौलत्थं कलायपहरिमंथयोः यवान्नं कोरदूषान्नं पुराणंशा
लिषष्टिकं ३० लावकानां तथा मांसं हितं तक्रेण संस्कृतं पटोलं गोक्षुरं चैव वरुणं कारवेल्लकं ३१ वास्तू
कं शाकमारीषं शाकं पौनर्नवं हितं ॥ इति योगतरंगिण्यां आमवातचिकित्साकथनं नाम ऊनत्रिंशस्तरंगः
॥ अथ शूलं दोषैः पृथक्समस्तामद्वंद्वैः शूलोष्टधा भवेत् सर्वेष्वेतेषु शूलेषु प्रायेण पवनो बली १
वेदनात् भवेद्धींवीधान्यातिशयभजनाच्छूलमनिलप्रधानं तान्यष्टौ त्रिभिरथ समस्तैश्च युगलैः अजीर्णो
न्नेत्यस्मिन्भवति जठरे कुक्षियुगले हृदि प्रोद्धाटोपो हृगति न मलानां विसरणं २ वमनं लंघनं स्वेदः पाच
नं फलवर्त्तयः क्षारचूर्णानि गुटिकाः शस्यन्ते शूलशांतये ३ आशुकारी हि पवनस्तस्मात्तं त्वरया जयेत्
वातस्यानु जयेत्पित्तं पित्तस्यानु जयेत्कफं ४ वातात्मकं हंत्यचिरेण शूलं स्नेहेन युक्तस्तु कुलत्थयूषः ससैंध
वव्योषयुतः सलावः सहिंगुसौवर्चलदाडिमाढ्यः ५ विश्वमेरंडजं मूलं क्वाथयित्वा जलं पिवेत् हिंगुसौवर्च

ह्विबलेचविपुलंतथा आमवातंशिरोवातंकटिवातंभगंदरं १५ जानुजंघाश्रितंवातंसकटिग्रहमेवच अश्म
रीं मूत्रकृच्छ्रंच साध्मानंतिमिरंतथा १६ सिंहनादइतिख्यातोरोगवारणदर्पहा इतिसिंहनादगुग्गुलः
वेधात तुलासुगुणांरसोनस्यतदर्द्धंलुंचितात्विलाः पात्रेगुगव्यतत्रास्यापिष्टद्रवैःसमंक्षिपेत १७ अयगो
धान्यकंचव्यंचित्रकंगजपिप्पली अजमोदात्वगेलाचग्रंथिकंचपलांशकं १८ शर्करायाःपलान्यष्टौपा
चाजाज्याःपलानिच कृष्णाजाज्याश्चचत्वारिराजिकायास्तथैवच १९ पलप्रमाणंदातव्यंहिंगुलोरमानि
पंचच आर्द्रकस्यचचत्वारिसर्पि■सोष्टौपलानिच २० तिलतैलस्यतावंतिसुक्तस्यापिचविंशति सि
द्धार्थकस्यचत्वारिद्विगुणंमधुनस्तथा २१ एकीकृत्यदृढेभांडेधान्यमध्येविनिक्षिपेत द्वादशाहात्समुद्
त्यप्रातःखादेद्यथाबलं २२ सुरासौवीरकंचापिमधुंवापिपिवेत्ततः नीरोगायथेप्सितंभोज्यंदधिपिष्ट
कंवर्जितं २३ एषमाषोपयोगेनसर्वव्याधिहरोभवेत् अशीतिवातरोगांश्चचत्वारिंशांश्चपित्तजान्२४
विंशतिश्लेष्मजांस्तद्वन्नश्यंतेतस्यसेवनात योनिशूलेप्रमेहांश्चकुष्ठोदरभगंदरान २५ अर्शोगुल्म
क्षयांश्चापिजयेद्वलरुचिप्रदः २६ महारसोनपिंडःयोगरत्नावल्यात महारास्नादिनाजग्धोयोगराजोहि

श्यामम्मा हन्ते रुक्षःस्वेदोविधातव्योवालुकापुटकैस्तथा ३ उपनाहाश्चकर्त्तव्यास्तेपिस्नेहविवर्जिताः सटीशुंठ्यभया
चोग्रा देवदारु विषामृता ४ कषायमामवातस्य पाचनं रूक्षभोजनं चित्रकं कटुका पाठा कलिंगातिविषामृता
५ देवदारु वचा मुस्ता नागरातिविषाभया पिबेद्दशांबुनानित्यमामवातस्य भेषजं ६ रास्नां गुडूचीमेरंडदेवा
दारुमहौषधं पिबेत्सर्वांगगेवाते सामेसंध्यस्थिमज्जगे ७ रास्नादिपंचकं रास्नामृतारग्वधदेवदारुत्रिकंट
कैरंडपुनर्नवानां क्वाथंपिबेन्नागरचूर्णमिश्रंजंघोरुपृष्ठत्रिकपार्श्वशूली ८ रास्नादिसप्तकं रास्नैरंड
शतावरी सहचराढुस्पर्शव्योसामृता देवाह्वातिविषाभयाघनवचाशुंठीकषायःकृतः पीतःसोरुवुतैल
एषविहितःसामेसशूलेनिले कट्यूरुत्रिकपार्श्वपृष्ठिजठरे कोष्ठेषुवातार्तिजित ९ इतिरास्नादिः वंश्य
त पिंडितंगुग्गुलोःप्रस्थं कटुतैलंपलाष्टकं प्रत्येकंत्रिफलंप्रस्थंसार्द्धद्रोणाजलेपचेत १० पादशेषंततःपूतंपुनर
ग्नावधिश्रयेत त्रिकटुत्रिफलामुस्तंविडंगंसुरदारु च ११ गुडूच्यग्नित्रिवृद्दंतीवचासूरणमाणकं पारदंगंधकं
चैवप्रत्येकंशुक्तिसंमितं १२ शुद्धसहस्रंप्रत्यग्रं कनकस्यफलंबुधः त्वगंकुरविनिर्मुक्तंसिद्धेसंचूर्णपनिक्षि
पेत १३ ततोमाषद्वयंजग्ध्वापिबेतप्रजलाधिकं अग्निंचकुरुतेदीप्तंप्रलयानलसन्निभं १४ धातुवृद्धिंवयोवृ

दंत्यपलं पलं ३३ सुवर्णं रजतं चैव प्रत्येकं दशनिष्ककं माषिकं मृतवज्रं च तालसत्वं पलद्वये ३४ जंबीरो
न्मत्तवासाभिः स्नुह्यर्कविषमुष्टिभिः मर्द्दं हयारिजैर्द्रावैः प्रत्येकेन दिनं दिनं ३५ एवं सप्त दिनं मर्द्दित
गोलं वस्त्रवेष्टितं वालुकायंत्रगं स्वेद्य त्रिदिनं लघुवह्निना ३६ आदाय चूर्णयेत् श्लक्ष्णं पलिकं योज
येद्विषं द्विपलं पिप्पलीचूर्णं मिश्रः सर्वेश्वरो रसः ३७ द्विगुंजो लिह्यते क्षौद्रैः सुप्तिमंडलकुष्ठनुत वाकु
ची देवकाष्ठं च कर्षमात्रं सुचूर्णयेत् ३८ लिहेद्दरं ड तैलाक्तं मनुपानं सुखावहं इति सर्वेश्वरो रसः॥ अ
डूषरात कनकभुजगवल्लीमालतीपत्रमूर्वारसगदकुनटीभिर्मर्द्दितं तैलयोगात अपहरति रसेंद्रः
कुष्ठकंडूविसर्पस्फुटितचरणरंध्रान् स्यामलत्वं त्वचायाः ३९ अस्य तैलस्य लेपेन वातरक्तं प्रशाम्यति ४०
रसेन्द्रचिंतामणेः दिवास्वप्नाग्निसंतापं व्यायामं मैथुनं तथा कटूष्णगुर्वभिष्यंदि लवणाम्लानि वर्जयेत
४१ इति योगतरंगिण्यां वातरक्तचिकित्साकथनं नाम षट्त्रिंशस्तरंगः ॥ अथामवात॰ युक्तेन वायुनान्
न — आमो याति कफाशयं लभेत सच्च नाडीभिरामवातो यमीरितः १ कटूरू
हज्जानुजंघासु पृष्ठशोथरुजाकरः लंघनं स्वेदनं तिक्तदीपनानि कटूनि च २ विरेचनं स्नेहपानं बस्तय

नानिक्ताभीरुफलत्रिकप्रतिविषामूर्वाविशालाजलैः पाठापर्पटसारिवाद्वयनिशायुग्मपिप्पलिकापद्मकैः
सोशीरैः सपटोलचंदनवचाशम्याकसप्तच्छदैः २४ इत्येभिर्गदितैर्जलाढकगुणितैः प्रस्थं पचेत्सर्पिषो ग
व्यं सामलकीरसद्विगुणितं नाम्ना महातिक्तकं हंत्येतद्बलगंडमंडलरुजः कंडूंसपांडूामयं शोफस्लीपदवा
तरक्तविकृतीः कुष्टानिचाष्टादश २५ इतिमहातिक्तकंघृतं सारसंग्रहात मस्विंत्रिवृतांदंतीक्षीरमार्क
सकुद्भवः देवदारुहरिद्रेद्वे मांसीकुष्ठंसचंदनं २६ विशालाकरवीरंच हरितालंमनःशिला चित्रकंलां
गलीचापिविडंगंचक्रमर्दकं २७ शिरीषंकुटजोनिंबः सप्तपर्णस्नुतार्कजे शम्याकोनक्तमालश्च खदिरं
पिप्पलीवचा २८ ज्योतिष्मतीचपलिकाविषस्यद्विपलंमतं आढकंकटुतैलस्य गोमूत्रंचचतुर्गुणं २९
मृत्पात्रेलोहपात्रेवाशनैर्मृद्वग्निनापचेत एततैलंविशेषेणनाशयेत्कुष्ठजान्व्रणान ३० वातरक्तभ
वान्व्याधीन्पामांविस्फोटचर्चिकाः नश्यंत्यभ्यंजनादेववलीपलितमेवच ३१ इतिवृहन्मरीच्याद्यंतै
लंयोगरत्नावल्यात सारिवासर्जमंजिष्ठायष्टीसिक्थैःपयोन्वितैः तैलेपक्वप्रयोक्तव्यंपिंडाख्यंवातशो
णिते ३२ पिंडतैलंवंगात अथरसः शुद्धंसूतंचतुर्गंधंपलंयामंविचूर्णयेत मृततांम्राभ्रलोहानांदर

१३ सततं निषेवमाणाः कालवशात्सकलसर्वरोगान् अभिभूय जरादोषविनिर्गतिकैशोरकं रूपं १४ इति कैशोरको
गुग्गुलुः ॥ वृंदात् मंजिष्ठामुस्तकुटजगुडूचीकुष्ठनागरैः भार्गीक्षुद्रावचानिंबनिशाद्वयफलत्रिकैः १५ पटोलक
टुकामूर्वाविडंगासनचित्रकैः शतावरीत्रायमाणाकृष्णेन्द्रयववासकैः १६ भृंगराजमहादारुपाठाखदिरचंद
नैः त्रिवृद्वरुणकैरातवाकुचीकृतमालकैः १७ शाखोटकमहानिंबकरंजातिविषाग्निभिः इन्द्रवारुणिकानंता
सारिवापर्पटैः समैः १८ एभिः कृतं पिबेत्क्वाथं कणागुग्गुलसं - युतं अष्टादशसुकुष्ठेषु वातरक्तार्दितेतथा
१९ उपदंशे श्लीपदे च प्रसुप्तौ पक्षघातके मेदोदोषे नेत्ररोगे मंजिष्ठादिः प्रशस्यते २० इति वृहन्मंजिष्ठादिः ॥ शा
र्ङ्गधरात् मंजिष्ठोग्रावरातिक्तानिशानिंबामृतामरैः सतत्वं खदिरैः क्वाथः सर्वकुष्ठनिलाश्रजित् २१ इति ल
घु मंजिष्ठादिः मंजिष्ठारिष्टवासात्रिफलदहनकं देहरिद्रे गुडूची भूनिंबो रक्तसारः सखदिरकटुकावाकुचीव्या
घ्रिघातः ० मूर्वादंती विशालाक्रिमिरिपुजटिलावायसीरासपाठाश्यामानंतापटोलैः सममिश्रमगधैः साधि
तोयं कषायः पीतो हन्यात्समस्तान्सकलतनुगतान् रक्तजातान्विकारान्कंडुविस्फोटकादीन्सकलविषमपु
श्वित्रयामादिदोषान् २२ इत्यपरो मंजिष्ठादिः योगरत्नावल्यात् भूनिंबो वृहन्निंबवत्सककणात्रायं त्यनंताम

कुष्टंभवतिदुर्द्धरं २ रसरत्नप्रदीपात वातशोणितिनोरक्तैःस्निग्धस्यवहुसोहरेत अल्पाल्पंरक्षतायुक्तंतथा
दोषंतथावलं ३ वृंदात वासागुडूचीचतुरंगुलानामेरंडतैलेनपिवेत्कषायं क्रमेणसर्वांगजमप्यशेषं
जयेदसृग्वातभवंविकारं ४ त्रिफलानिंवमंजिष्टावचाकटुकरोहिणी वत्सादनीदारुनिशाकषायेन
वकार्षिकं ५ वातरक्तंतथाकुष्टंपामामानंरक्तमंडलं कृच्छ्रंकापालिकंकुष्टंपान्नादेवापकर्षति ६ इतिनवका
र्षिकःकाथः वृंदात वनमहिषलोचनोदरसन्निभवर्णस्यगुग्गुलोःप्रस्थं प्रक्षिप्यतोयराशौत्रिफलां
चयथोक्तपरिमाणं ७ द्वात्रिंशच्छिन्नरुहापलानियानियल्लतोविबुधैः मृदग्निनाथविपचेद्दर्व्या।
संघट्टयेन्मुहुर्यावत ८ अर्द्धक्वथितंतोयंजातंज्वलनस्यसंपर्कात अवतार्यवस्त्रपूतंपुनरपिसंपाच
येदयःपात्रे ९ सांद्रीभूतेतस्मिन्नवतार्यहिमोपलप्रस्थे त्रिफलाचूर्णार्द्धपलंत्रिकुटोश्चूर्णोषड्क्षप
रिमाणं १० कृमिरिपुचूर्णार्द्धपलंकर्षंकर्षं सुगंधिसलिलेच इच्छाहारविहारीभेषजमुपयुज्यात्सर्वका
लमिदं ११ तनुरोहितवातशोणितमेकजमपद्वंद्वजंचचिरोत्थं जयतिश्रुतंपरिशुष्कंस्फुटितमाजान
गंचापि १२ व्रणकासगुल्मकुष्टश्वयथूदरपांडुमेहांश्च मंदाग्निंचचिरोत्थंप्रमेहपिडिकांश्चनाशयत्याशु

तदहंत्यौः पलमेकंतु गुडूच्यारत्वासंचूर्णयत्नेन उपयुंज्याच्चानुपानंयथं ३

पक्षाघातापबाहुके १२५ गृध्रस्यामामवातेषु श्लीपदे चापतानके अंत्रवृद्धौ तथाध्माने जंघाजानुगतेऽर्दिते
१२६ शुक्रामये मेढ्ररोगे वंध्यायोन्यामयेषु च महाराल्नादिराख्यातो ब्रह्मणा गर्भकारणं १२७ इति महारा
स्नादि शार्ङ्गधरात् अथ रसः सूतहाटकवज्राणि ताम्रं लोहं च माक्षिकं तालं नीलांजनं तुत्थमब्धिफेनं समां
शकं १२८ पंचानां लवणानां च भागमेकं विमर्दयेत् वज्रीक्षीरैर्दिनैकं तु रुध्वाधो भूधरे पचेत् १२९ माषैकमा
र्द्रकद्रावैर्लेहयेद्वातनाशनं पिप्पलीमूलजं क्वाथं सकृष्णमनुपाययेत् १३० सर्वान्वातविकारांश्च निहंत्याक्षे
पकारिकान् इति वातनाशनो रसः शुद्धसूतं मृतं लोहं ताप्यं गंधकतालकं पथ्याग्निमंथनिर्गुंडीत्र्यूषणं टं
कणं क्षिपेत् १३१ तुल्यांशं मर्दयेत्खल्वे दिनं निर्गुंडिकाद्रवैः मुंडीद्रवैर्दिनैकं तु द्विगुंजो वटकीकृतः १३२
भक्षयेद्वातरोगार्तो नाम्ना स्वच्छंदभैरवः रास्नामृतादेवदारुशुंठीवातारिजं शृतं १३३ सगुग्गुलं पिबेच्चास
मनुपानं सुखावहं १३४ इति स्वच्छंदभैरवो रसः ॐ इति श्रीयोगतरंगिण्यां वातरोगचिकित्साकथनं ना
म सप्तत्रिंशस्तरंगः ॐ अथ वातरक्तचिकित्सा वाहनाभिरतस्याश्च कदूषयित्वानिलो बली स्वर्शो।
त्वचं मेढ्रलानि स्फोटकानि विसूचिकां १ करोत्यंगुलिवेकल्यं वातरक्तमिदं स्मृतं कालातिक्रांतमेतत्तु

गंस्वर्जिकासटी दंतीगुडूचीहपुषावाजिगंधाशतावरी ११३ प्रत्येकं कर्षमात्रंस्याच्चतुःकर्षमयोमृतं एतानिसु
भिषक्पष्टेसूक्ष्मचूर्णानिकारयेत् ११४ यावंत्येतानिचूर्णानितावन्मात्रोहिगुग्गुलः संमर्द्यसर्पिषागाढंस्नि
ग्धभांडेनिधापयेत ११५ ततोमात्रांप्रयुंजीतयथेष्टाहारवानपि योगराजइतिख्यातोयोगोयममृतोपमः ११६
आमवातादिवातादीन्कृमीन्दुष्टव्रणान्यपि प्लीहगुल्मोदरानाहदुर्नामानिविनाशयेत ११७ अग्निंचकु
रुतेदीप्तंतेजोबृद्धिंबलंतथा वातरोगंजयत्याशुसंधिमज्जागतानपि ११८ पादग्रहंक्रोष्टुशीर्षंम न्यास्तं
भंगलग्रहं बाहुग्रहंपक्षवातंहृद्ग्रहंचकटिग्रहं ११९ दुष्टशुक्रंचदुष्टाश्रंगृध्रशीमक्षिनिग्रहं कर्णग्रहं
कर्णीश्लूलंशिरःशूलेमहत्कृतं १२० रास्नाक्वाथेनहंत्येषकेवलोवामशास्यते इतियोगराजगुग्गुलः सार
संग्रहात रास्नाद्विगुणभागास्यादेकभागास्तथापरे धन्वयासबलैरंडदेवदारुसटीवचा १२१ वासकंना
गरंपथ्याचव्यमुस्तापुनर्नवाः गुडूचीवृद्धदारश्चशतपुष्पाचगोक्षुरः १२२ अश्वगंधाप्रतिविषाकृत
मालःशतावरी कृष्णासहचरश्चैवधान्यकंबृहतीद्वयं १२३ एभिःकृतंपिवेत्क्वाथंशुंठीचूर्णेनसंयुतं
कृष्णाचूर्णेनवायोगराजगुग्गुलनाथवा १२४ अजमोदादिनावापितैलेनैरंडजेनवा सर्वांगकंपेकुब्जत्वे

त्रिविंशति द्रव्येभ्यः सकलेभ्यश्च त्रिफलाद्विगुणा भवेत ९१ एभिश्चूर्णीकृतैः सर्वैः समो देयस्तु गुग्गुलुः एकपिंडं ततः कृत्वा धारयेत्घृतभाजने ९२ गुटिकाः शाणमात्रास्तु कृत्वा ग्राह्याः यथोचिताः गुग्गुलुर्योगरा जोयं त्रिदोषघ्नो रसायनः ९३ मैथुनाहारपानानां त्यागो नैवात्र विद्यते सर्वान्वातामयान्कुष्ठमर्शांसि ग्रहणीगदं ९४ प्रमेहं वातरक्तं च नाभिशूलं भगंदरं उदावर्तं क्षयं गुल्ममपस्मारमुरोग्रहं ९५ मंदा ग्निं श्वासकासौ च नाशयेदरुचिं तथा रेतोदोषहरः पुंसां रजोदोषहरः स्त्रियाः ९६ पुंसामपत्यजनको वंध्यानां गर्भदस्तथा रास्नादिक्वाथसंयुक्तो विविधं हंति मारुतं ९७ काकोल्यादिश्रृतात्पित्तं कफमारग्व धादिना दार्वीश्रृतेन मेहांश्च गोमूत्रेणाच पांडुतां ९८ मेदोवृद्धिं च मधुना कुष्ठं निंवश्रृतेन च छिन्ना क्वाथेन वातास्त्रं शोथमूलकजान्घृतान ९९ पाटलाक्वाथसहितो विषं मूषकजं जयेत त्रिफलाक्वा थसहितो नेत्रार्तिं हंति दारुणां १०० पुनर्नवादिक्वाथेन हन्यात्सर्वोदराणि च इति योगराजगुग्गुलुः शार्ङ्ग धरात चित्रकं पिप्पलीमूलं यवानीकारवीवचा विडंगान्यजमोदा च जीरकं सुरदारु च १०१ चव्यैला सैंधवं कुष्ठं रास्नागोक्षुरधान्यकं त्रिफलामुस्तकं व्योषं त्वगुशीरं तु यवाग्रजं १०२ तालीसपत्रं पत्रं च लवं

कोलमात्रांवटींचरेत घृतेनमधुनावापिभक्षयेत्तामहर्मुखे ९० आमेहन्याढ्यवर्तमंत्रव्रध्निगुरुमीन स
हाज्वरोपसृष्टानांभ्नतोपहतचेतसां ९१ आनाहंचतथोन्मादंकुष्ठानिगुल्मानिच शोफशीलामयंदेहेका
मलामपचींतथा ९२ नाम्नाद्वात्रिंशकोह्येषगुग्गुलुश्चकथितोमहान धन्वंतरिकृतोयोगःसर्वरोगनिसू
दनः ९३ इतिद्वात्रिंशकोगुग्गुलुः आमाश्वगंधाहपुषागुडूचीशतावरीगोक्षुरकंचरास्ना श्यामासढी।
द्योषवत्तीयवानीसनागराचेतिसमंविचूर्णं ९४ तुल्यंवरंकौशिकमत्रदेयंगव्येचसर्पिश्चततोर्द्धमा
ग अक्षार्द्धमात्रांततःप्रयोगस्तत्रानुपानेसुरयाचयूषैः ९५ कोष्णांबुनावापयसाथरसेनमांसस्य
वाकोमलवत्सजस्य कटिग्रहेगृध्रसिवाहुपृष्ठेहनुग्रहेजानुनिपादयुग्मे ९६ संस्थेवितेचास्थिग
तेचवातेमज्जागतेकोष्ठगतेतथापि रोगान्जयेद्वातकफानुविद्धान्वातेरितान्हृद्रुहयोनिदोषा
न ९७ भग्नास्थिविश्लिष्टचव्युतांतज्ञातेत्रयोदशांगंप्रवदंतिसिद्धाः ९८ इतित्रयोदशांगोगुग्गुलुः नागरं
पिप्पलीमूलंपिप्पलीचव्यचित्रकौ भृष्टंहिंगुजमोदाचसर्षपाजीरकद्वयं ९९ रेणुकेंद्रयवापाय
विडंगंगजपिप्पली कटुकातिविषाभार्गीवचामूर्वेतिभागतः १०० प्रत्येकंशाणमात्राणिद्रव्याणीमा

श्री

नेन शांतिं समुपैति योहि सद्योव्रणानस्थिविचूर्णितं वा नाडीव्रणान्चापि योजयित्वा ७९ सुवर्णवर्णो वितनोति रू-
पं नारायणाख्यः किल तैलराजः वंध्यापुमान्वापि वरांगनावा सुपुत्रमाप्नोति विलेपतोस्य ८० सिद्धत्यनेनैव नि-
योजितेन निहाद्यदग्धः प्रहतोपि वृक्षः अन्यस्य कावाभ तिर्नरस्य रोगस्य जंतोरपरस्य वापि ८१ नारायणा-
ख्यं यदिदं सुतैलं नारायणो नाम ततः प्रसिद्धं इति महानारायणतैलं माषक्वाथे वलाक्वाथे रास्नायां दशमूलकैः जे
कुलत्थानां छागमांसरसेनैव पृथक् पृथक् ८२ प्रस्थं तैलस्य च प्रस्थं क्षीरं दद्याच्चतुर्गुणं रास्नात्मगुप्तासिंधूत्थ-
शताह्वैरंडमुस्तकैः ८३ जीवनीयवलाव्योषैः पचेद्रक्तमितैर्भिषक् हस्तकंपे शिरःकंपे वाहुकंपे च वाहुके
८४ वस्त्यभ्यंजनपाने भ्रनावनेषु प्रयोजयेत् माषतैलमिदं श्रेष्ठम् ऊर्द्ध्वजत्रुगदापहं ८५ इति वृहन्माषा-
दितैलं ८५ रास्नाम्रतैरंडसुराह्वविश्वं तुल्येन गाढं पुरुषा विमर्द्य खादेत्समीरोत्थशिरोगदी च नाडीव्र-
णी चापि भगंदरी च ८६ रास्नायोगुग्गुलुः त्रिकटुत्रिफलामुस्तविडंगं चव्यचित्रकौ वचैलापिप्पलीमू-
लं हपुषामुरदारु च ८७ तुंबुरुं पुष्करं कुष्ठं विषाचरजनीद्वयं वाष्पिका जीरकं शुंठीपत्रं च सदुरालभं ८८
सौवर्चलं विडं चैव क्षारौ द्विरद पिप्पली सैंधवं च समानेतान्तुल्यं दद्याच्च गुग्गुलुं ८९ साधयित्वा विधानेन रामः

रीः ६८ अजाः सकूर्मो ऽहमांस यूषं क्रमात्स्त्रियेद्यात्रयंथे वल्लाभः रोहीतको थाशवनेऽनामा कं साठकौमुद्गर ऋंगिके
च ६९ पाठीनका लीयकतो ऽिका च सशोवरा येकुरुाद्दयश्च येचापितो येशिशुमारमुख्याः लभ्याश्चयेश्चभुजग
नाः भुजंगाः ७० अन्येपि येम्बुचरखेचराश्च यूषाऽमीषां क्रमशोत्रयोज्याः सुताम्रपात्रेप्यथमल्लिकाजेकपूर
काश्मीरमृगांडजंच ७१ दद्यात्सुगोधानिवरं तिकेचित्प्रस्वेदरोगैर्ष्याविनाशनाय वरंतिकेचिद्भिषजः समेतं श्र
मेनपात्रमक्षमुहूर्तलग्ने ७२ संतोष्यविप्रान्भिषजोर्थियेनश्चसुभाजने यत्नधृतं तथैव पानेचनश्येचनिरूहणो
चभोज्येप्रयोज्यंततएवनूनं ७३ अभ्यंगमार्देचसदाप्रशस्ते निवार्यते कर्मसुकेषुचिन्न उन्मादशोषक्षतर
क्तपित्तश्वासभ्रमच्छर्दिषु मूर्छितेषु ७४ कासाग्निवाताहत शूलदंतकृमीन्द्रुपुप्लीहसतोरदाहान सतालुशू
लं श्रवणाक्षिशूलं बाधिर्यमुच्चैर्ज्वरपीडितंच ७५ मंदेन्द्रियत्वं चयथाग्निमांद्यंप्रनष्टशुक्रत्वमपांगकेदुः नि
हंत्यसंत्यं स्वगुणाप्रभावात्कांतिग्रहापस्मृतिगध्रसींच ७६ पक्षाभिघातंचरणाभिघातं हस्ताभिघातंचशिरोग्रहं
च कुष्ठानिसर्वाणिचसर्वगुल्मान्भगंदरं शूलमुरक्षतंच यक्ष्माणमुग्रं सकलप्रमेहान्नानासिकोर्णाप्रभवा
न्विकारान वातादिजातान्किलमृतजातान कृत्यादिजातानगृहजान्विकारान ७७ रोगः सनास्त्येव नरस्य देहेना

शमयेत्तैलमेतन्नात्रविचारणा इन्द्रियस्यप्रजननेवंध्यानांचप्रजाकरं ५८ वृद्धानांबालकानांचस्त्रीणांराज्ञोहितं
परं पंगुर्वीपष्ठभग्नोवापीत्वैनत्संप्रधावति ५९ इतिप्रसारिणीतैलं बलाश्वगंधावृहतीश्वदंष्ट्रास्योनाकवाट्या
लकपारिभद्रं सुद्राकदिव्याग्निवलाग्निमंथरास्नारणीचैकपिकच्छुराच ६० निर्गुंडिकैरंडकुरंटकानांमम्लानिव
र्षासरणीगुनानि मूलेविरध्याद्रथपारला - नांसंकुपाहांशतयोध्वतानां ६१ द्रोणेरपामष्टभिरेवपश्चापाद्यव
शेषेणरसेनतेन तैलाढकाभ्यांसहदुग्धमत्रगव्यंविरध्याद्रथवाजदुग्धं ६२ दद्याद्रसंचैवसतावरीणांतैलेन
तुल्यंपुनरेवतत्र पश्चादिनैकंकृतवस्त्रपूतंकल्कानिचैषांचसमावपेच्च ६३ रास्नाश्वगंधामिसिदारुकुष्टंप
र्णीगुरुष्काग्गुरुकेसराणि सिंधूत्थमांसीरजनीद्वयेचशैलेयकंपुष्करचंदनानि ६४ एलामयष्टीतगराढपत्रं
भृंगाष्टवर्गीचजयापलासे वृश्चीवयोणीयकचोरकाख्यंमूर्वात्वचाकटूफलपद्मकंच ६५ म्पणालजातीफ
लकैतकीचसन्नागपुष्पंसरलंमुरांचं जीवंतिकाचंदनकंमुशीरंदुरालभावानिरकानखंच ६६ कैवर्तिकं
तालशिरःसतिक्तं खर्जूरमस्तंसमभागमेषां एतैःसमेत्यार्द्रपलप्रमाणैर्भोगानयापद्धिकिलकालमेष्याः ६७
एणाःकुरंगोहरिणोमयूरोगोधाशशःशल्लकचक्रवाकौ वर्तीरलावौवरतित्तिरीचसमारसक्रौंचककंबुपा

स्तंभेमन्यास्तंभेपतंत्रके ४४ एकांगग्रहणोवापिसर्वांगग्रहणेतथा क्षीणेन्द्रियानष्टशुक्राज्वरक्षीणाश्चयेना
राः ४५ लंगनजिह्वाश्चवधिराविभ्रमंदमेधसः मंदप्रजाश्चयानारीयाचगर्भंनविंदति ४६ वातार्त्तावृषणोये
घोश्चांत्रवृद्धिश्चदारुणा एतन्नारायणंतैलंशास्तंसर्वत्रसर्वदा ४७ इतिमध्यमनारायणतैलं समूलपत्रा
मुत्पाट्यजातसारांप्रसारिणीं कुट्टयित्वापलशतंकटाहेसमधिश्रयेत ४८ वारिद्रोणसमायुक्तंचतुर्भा
गावसेषितं कषायसममात्रंतु तैलमत्रप्रदापयेत ४९ दध्नस्तत्राढकंदद्याद्द्विगुणंचाम्लकांजिकं भेषजानि
तपेष्यानितत्रेमानिवपेत ५० शुंठीपलानिपंचैववराहायाश्चपलद्वयं यवक्षारपलेद्वेचसैंधवस्यपलद्वयं पा
द्विपलंपिप्पलीमूलंचित्रकस्यपलद्वयं प्रसारणीपलेद्वेचद्वेपलेमधुकस्यच ५२ एतत्सर्वसमालोड्यशनै
र्मृद्वग्निपाचयेत एतत्प्रभंजनेश्रेष्ठंनस्यकर्मणिशस्यते ५३ पानेवस्तौचदातव्यंनकचित्प्रतिषिध्यति अ
शीतिंवातरोगाणांतैलमेतद्व्यपोहति ५४ एकांगग्रहणोवापिसर्वांगग्रहणंतथा अपस्मारंतथोन्मादं।
विद्रधिंमंदवह्निता ५५ त्वग्गताश्चापियेवाताःशिराःसंधिगताश्चपि अस्थिसंधिगतायेचयेचशुक्रगत
देहस्थिताः ५६ सर्वान्वातामयान्हन्तुंनाशयत्येवसर्वथा हयंगजंनरंवापिवातजर्जरितंभृशं ५७ सद्यःप्र

श्रीगुरुः

७३

यो.त.

शतपुष्पांपुनर्नवां ३१ तत्साधुसिद्धं सौवर्णोराजतेमृन्मयेथवा प्रक्षिप्यसकलंसम्यक्स्तुप्तंस्थापयेद्बुधः
३२ बलातैलमिदंख्यातंसर्ववातविकारनुत् यथाबलंभिषग्मात्रांस्तुतिकायैप्रदापयेत् ३३ याचगर्भार्थि
नीनारीक्षीणाशुक्रश्चयःपुमान् क्षीणोवातेमर्महतेमथितेपीडितेतथा ३४ भग्नेश्रमाभिपन्नेचसर्वथै
नंप्रयोजयेत् सर्वानाक्षेपकादींश्चवातव्याधीन्व्यपोहति ३५ प्रत्यग्रधातुःपुरुषोभवेच्चस्थिरयौवनः राजा
मेतद्धिकर्त्तव्यंराजमान्यैस्तथानरैः ३६ इतिमहाबलातैलं विल्वोग्निमंथःस्योनाकःपाटलापारिभद्रकः
प्रसारिण्यश्वगंधाचबृहतीकंटकारिका ३७ बलाचातिबलाचैवश्वदंष्ट्रासपुनर्नवा एषांदशपलान्भा
गांश्चतुर्द्रोणांभसापचेत् ३८ पादशेषंपरिस्राव्यतैलपात्रंप्रदापयेत् शतपुष्पादेवदारुमांसीशैलेयकं
वचा ३९ चंदनंतगरंकुष्ठमेलांपर्णीचतुष्टयं रास्नातुरगगंधाचसैंधवंसपुनर्नवं ४० अश्वोवायदिवातभग्ने
वागजोवायदिवानरः पंगुर्वाभग्नहस्तोवाभग्नपादोथवानरः ४० एषांद्विपलिकान्भागान्पेषयित्वा
विनिक्षिपेत् शतावरीरसंचैवतैलतुल्यंप्रदापयेत् ४१ आजंवायदिवागव्यंक्षीरंदत्वाचतुर्गुणं पाने
बस्तौतथाभ्यंगेभोज्येनस्यप्रयोजयेत् ४२ अधोभागेचयेवाताःशिरोमध्यगताश्चये इंतश्मूलेहनु

रामः

७३

ढे स्थिगते वाते पाशिमंथेन हारिते नाडींदत्वास्थिनि भिषक्चूषयेत्पवनं बली २२ शुक्रप्राप्तेनिले कार्यं शुक्रदो
षचिकित्सितं कार्पासास्थिकुलत्थिकातिलयवैरंडधिमाषातसीवर्षाभूशणबीजकांजिकयुतैरेकीकृतैर्वा पृथ
क् स्वेदः स्यादितिकूर्परे देहनुस्फिक्शिरापादांगुलीगुल्फस्तंभकटीरुजो विजयते सामांसमीरोद्भवाः २३ न
वनीतेन संयुक्ताः खादेन्माषेंद्रीर्नरः दुर्वारमर्दितं हंति सप्तरात्रान्न संशयः २४ माषात्मसीयवकुरंटककंटकारी
गोकंटटुंटुकजटाकपिकच्छुतोयैः कार्पासकास्थिशणबीजकुलत्थकोलक्वाथेन वस्तपिशितस्य रसेन चापि
२५ शुंठ्याचमागधिकया शतपुष्पया च सैरंडमूलसपुनर्नवया सरस्ना रास्नाबलामृतलताकटुके विप
केमाषाह्वयमेतद पचाहुकहारितैलं २६ अर्द्धांगशोषमपतानकमाढ्यवातमाक्षेपकं सभुजकंपशि
रःप्रकंपं नस्येन वस्तिविधिनापरिषेचनेन हन्यात्कटीजघनजानुशिरःसमीरान् २७ इतिमाषाद्यं तैलं ॥ दं
शत वलामूलकषायस्य दशमूलीकृतस्य च यवकोलकुलत्थानां क्वाथस्य पयसस्तथा २८ अष्टावष्टौ
शुभागास्तैलादन्यस्तदेकतः पचेदावाप्य मधुरं गणं सैंधवसंयुतं २९ तथागुरुं सर्जरसं सरलं देवदा
रु च मंजिष्ठाचंदनं कुष्ठमेलां कालांच सारिवां ३० मांसीशैलेयकं पत्रं तगरं सारिवां वचां शतावरीमश्वगंधां

प्रातरेरंडस्नेहसंयुतम् ९ दिने दिने प्रयोक्तव्यं मासमेकं निरंतरं वातरोगं निहंत्येव मर्दितं चापतंत्रकं १० सर्वांगैकांगरो
गं चगृध्रस्याक्षेपकावपि इति रसोनसप्तकं कं १ सार्षपं तैलं च लशुनं शृंगवेरकं सर्वाण्येकत्र संमिश्र्य स्थितं दि
नसप्तकं ११ संचूर्ण्य घर्ममध्ये तु प्रातः खादेद्यथाबलं एष निर्गंधतामेत्य सर्ववातामयान्जयेत १२ स्निग्धभो
जी मासमात्रं सेवन्नाद्यात जिह्वेत अजीर्णमातपं रोषमतितीरं पयो गुडं १३ रसोनमश्नन्पुरुषस्त्यजेदेतन्नि
रंतरं मद्यं मांसं तथाम्लं च रसं सेवेत नित्यशः १४ इति रसोनपंचकं आमाशयस्थे त्वनिले प्रशस्तं प्राग्लंघनं दी
पनपाचने च प्रच्छर्दनं तीक्ष्णविरेचनं च पुराणमुद्गाय वशाल्यस्य १५ पूतीकपथ्यासरिपुष्कराणि विल्वं गुडू
ची सुरदारु शुंठी विडंगवासातिविषाकणाढ्याः काथास्त्रयः सामसमीरणघ्नाः १६ चित्रकेन्द्रयवौ पाठाकटु
कातिविषाभया वातव्याधिप्रशमनो योगः षड्चरणास्मृतः १७ आमाशयगते वाते छर्दितायथयथाक्रमं दे
यः षड्धरणो योगः सप्तरात्रं सुखांबुना १८ सर्वथा कोष्ठगो वातः प्रशमं याति देहिनः कार्यो वस्तिगते वाते वि
धिर्वस्तिविशोधनं १९ श्रोत्रादिषु प्रकुपिते कार्यश्चानिलहा क्रमः त्वग्मांसासृक्शिराप्राप्ते कुर्याच्चासृग्वि
मोक्षणं २० स्वेदोपनाहाग्निकर्मबंधनोन्मर्दनानि च स्नायुसंध्यास्थिसंप्राप्ते कुर्याद्वाते विचक्षणः २१ निग

समंसमस्ताद्दयोद्विभागोथवर्त्तिःपचेच्च २ लोहेस्सरांहंतिद्धतेनमाषोपस्मारमस्योन्मदमानसत्वं पिबेद्
तुत्थूषणाहिंगुयुक्तंसर्पिर्न्मूत्रंहत्वकेन सार्द्धं ९ भूतोन्मादेषुसर्वेषुरसोयंभूतभैरवः स्वर्णाजैःपंचभिर्वीजै
र्देयःसर्पिर्विमिश्रितः १० भूतभैरवरसः रसरत्नप्रदीपात ११ ॥ इतियोगतरंगिराणांअपस्मारचिकित्सा।
वापनंनामषड्विंशस्तरंगः ॥ अथवातव्याधिः स्वहेतुकुपितोवातोयद्यदंगग्रहोबली तत्तदाख्योबहुरु
जःकुरुतेशीतिमामयान् १ अभ्यंगोस्वेदनंवस्तिर्नस्यंस्नेहविरेचनं । स्निग्धाम्ललवणास्वादुवृष्येवातामया
पहं २ माषात्मगुप्तकैरंडवाट्यालकशृतंपिबेत् हिंगुसैंधवसंयुक्तं पक्षाघातनिवारणं ३ पंचमूलीकृतःक्वा
थोदशमूलीकृतोथवा रूक्षस्वेदस्तथानस्यंमन्यास्तंभेप्रशस्यते ४ योगरत्नावल्यात वाजिगंधाबलाशि
ग्रुर्दशमूलीमहौषधैः कृतध्ननस्योपत्नाक्षगणोमारुतनाशनः ५ माषबलाशूकशिंबीकत्तृणरास्नाश्व
गंधोरुबूकानां प्रातःक्वाथोपीतोरामठलवणान्वितःकोष्णः ६ अपनयतिपक्षाघातंमन्यास्तंभंसकर्ण
नादरुजं दुर्जयमर्दितवातंसप्ताहाज्जयतिचावश्यं ७ माषादिसप्तकं पलमर्द्धपलंवापिरसोनस्यसुकुट्टि
तं हिंगुजीरकसिंधूत्थैःसौवर्चलकटुत्रिकैः २ चूर्णितैर्माषमात्रैस्तद्दुलोड्यचविचूर्णितैः यथाग्निभक्षितं

ब्राह्मीरसोयंसवचादिचूर्णैः वीरभद्रात हिंगुसौवर्चलव्योषैर्द्विपलांशैर्घृताढकं चतुर्गुणे गवां मूत्रे सिद्ध
मुन्मादनाशनं २१ हिंग्वाद्यंघृतं वंगात कृष्णाधतूरजैर्बीजैः पंचभिः पर्पटीरसः साज्यो योज्यः प्रशांत्यर्थमु
न्मादस्यास्य नस्यते २२ रसरत्नप्रदीपात ॥ इति योगतरंगिण्यां उन्मादचिकित्साकथनं नाम पंचत्रिंश
त्तरंगः ॥ अथापस्मारः तमःप्रवेशसंरंभो दोषोद्रेकहतस्मृतिः अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः १
हृग्विनिश्चयात पूर्वं युंज्यादपस्मारे छर्दिमादीनि बुद्धिमान वातिकं वस्तिभिः प्रायः पैत्तं प्रायो विरेचनैः २ क
फजं वमनैः प्रायस्त्वपस्मारमुपाचरेत ततस्तीक्ष्णां प्रयुंजीत भिषक् सम्यक् प्रवर्त्तनं ३ सर्वतः शुद्धदेहस्य
स्यादुन्मादहरी क्रिया वंगात करंजदारुत्रिकटार्थकटभीतमदंव॰ चा समंगात्रिफलाव्योषप्रियंगु
श्वसमांसतः ४ वस्तमूत्रेण संसिद्धा नस्यपानांजनादिभिः योज्यो योगो यमुन्मादे पस्मारे भूतरोगिषु ५
इति करंजादिप्रयोगः वीरभद्रात पुष्योद्धृतं शुनः पित्तमपस्मारघ्नमंजनात तदेव सर्पिषा युक्तं धूपनं पर
मं स्मृतं ६ यः खादेत्क्षीरभक्ताशी माक्षिकेण वचारं । जः अपस्मारं महाघोरं सुचिरोत्थं जयेद्ध्रुवं ७
योगरत्नावल्यात अथ रसः रसः सताम्रः सशिलः सलोहः श्रोतोंजनं सार्कमिदं सगंधं पिष्टं न मूत्रेण

गोमूत्रेणानदर्थकृत ८ सिद्धार्थकाद्यगदः दशमूलांबुसंसिद्धं तंयुक्तं मांसरसेनवा सासिद्धार्थकचूर्णायाके
वलंवानवंद्धतं ९ उन्माददशांतयेपेयो रसोवाकालसाकजः प्रयोज्यंसार्षपंतैलंनस्याभ्यंजनयोःसदा
१० आश्वासयेत्सुहृद्वाक्यैर्ब्रूयादिष्टविनाशनं दर्शयेदद्भुतंकर्मताडयेच्चकशादिभिः ११ सुवर्चविजने
गेहेत्रासयेद्धिहिमिर्धिया विशालात्रिफलाकौन्तीदेवदारुवैलवालुकं १२ स्थिरानंतेहरिद्रेद्वेसारिवेद्वेप्रि
यंगुका नीलोत्पलैलामंजिष्ठादंतीदाडिमकेसरं १३ तालीसपत्रंवृहतीमालतीकुसुमंनवं विडंगंपृश्निप
र्णीचकुष्ठंचंदनपद्मकौ १४ एतैःकर्षमितैःकल्कैर्विशत्याष्टभिरेवच जलेचतुर्गुणेपक्वाद्धृतप्रस्थंप्र
योजयेत् १५ अपस्मारेज्वरेकासेशोकेमंदानलेतथा वातरक्तेप्रतिश्यायेतृतीयकचतुर्थके १६ वम्या
र्शोमूत्रकृच्छ्रेचविसर्पोपहतेषुच कंडूपांडुामयोन्मादविषमेहज्वरेषुच १७ भूतोपहतचित्तानांगद्गद
नामचेतसां शस्तंस्त्रीणांचवंध्यानांधन्यमायुर्बलप्रदं अलक्ष्मीपापरोगघ्नंसर्वग्रहनिवारणं. कल्या
णकमिदंसर्पिःश्रेष्ठंपुंसवनसाधने १९ इतिकल्याणकंघृतं ब्राह्मीरसःस्यात्सवचःसकुष्ठःसशंखपुष्पः
ससुवर्णचूर्णः उन्मादिनामुन्मदमानसानामपस्मृतौभ्रष्टहतात्मनांहि २० नस्येंजनेपानविधौचशस्तो

स्नाईवासमा स्नामज्जेनाथप्रुक्तेनचंदनेनानुलेपयेत ३ चंदनोक्षुकरा स्पंदितालवृंतोयवीजनैः शैवालक
दलीपद्मोशीरतल्पेशयीतवा ४ अंतर्दाहंप्रशमयेदेतैश्चान्यैश्चशीतलैः पलिनीलोध्रसेव्यांबुहेमपत्रंकुटं
नदं ५ कालीयकरसोपेतंदाहेशस्तंप्रलेपनं ह्रीवेरपद्मकोशीरचंदनोदकवारिणा ६ संपूर्णामवगाहेत
द्रोणींदाहार्दितोनरः ॥ इतियोगतरंगिण्यांदाहचिकित्साकथनंनामचतुस्त्रिंशस्तरंगः ॥ अथोन्मादः म
दयंत्युद्धतादोषाः यस्माद्उन्मार्गगामिनः मानसोयमतोव्याधिरुन्माद इतिकीर्तितः १ रुग्विनिश्चयात वो
देर्नरेन्द्रपुरुषेपरिभिस्तथान्यैर्वित्रासितस्यधनबांधवसंक्षयाद्वा गाढंक्षतेमनसिचप्रिययारिरंसोर्जायेत
चोत्कटतरोमनसोविकारः २ रुग्विनिश्चयात वातिकेस्नेहपानंचप्राग्विरेकश्चपित्तजे कफजेवमनंकार्यं
परोवस्त्यादिकक्रमः ३ यथास्वंवक्ष्यतेकिंचिदपस्मारेचिकित्सितं उन्मादेतच्चकर्त्तव्यंसामान्याद्दोषदूष्ययोः
४ सिद्धार्थकोवचाहिंगुकरंजोदेवदारुच मंजिष्ठात्रिफलाश्वेताकटभीत्वक्कटुत्रयं ५ समांसानिप्रियंगु
श्चसिरीषोरजनीद्वयं वस्तमूत्रेणपिष्टोयमगदःपानमंजनं ६ नस्यमालेपनंचैवस्नानमुद्वर्तनंतथा
अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहं ७ भूतेभ्यश्चभयंहंतिराजद्वारेचशस्यते सर्पिरेतेनसिद्धंवा

प्रपल्लावघर्षैः ६ आभिः क्रियाभिर्यदि ना प्रसंज्ञः स नाहलालाम्बुसनस्य वर्ज्यैः प्रबुद्धसंज्ञं वमनानुलोमैस्ती
क्ष्णैर्विशुद्धं लघुपथ्ययुक्तं ७ यथाग्निं च ज्वरघ्नानि कषायाण्युपयोजयेत् सर्वमूर्छापरीतानां विषजानां वि
षापहं ८ वीरभद्रात् अथ रसः करणामधुयुतं सूतं मूर्छायामनुशीलयेत् शीतसेकावगाहानि सर्वैर्वापि
ड्नेहठात् ९ रसरत्नप्रदीपात् ॐ इति योगतरंगिण्यां मूर्छाचिकित्साकथनं नाम द्वात्रिंशत्तरंगः ॐ अथ
पानात्ययः अयुक्त्या मद्यपानेन बहुना स्यान्मदात्ययः दाहमूर्छावमिभ्रान्तिर्वैकल्यं विषचेष्टितैः १ मंथः।
खर्जूरमृद्वीकाद्राक्षाम्लाम्लीकदाडिमैः परूषकैः सामलकैर्युक्तो मद्यविकारनुत् २ मथितं गोदधि सपितं
सैलं कर्पूरसंमिश्रं आस्वाद्य पीतमाशु क्षपयति पानात्ययं रोगं ३ समरिचवचनसारं वारिमीनांडिका याः
परिमिलितममं दे दाडिमी बीजतोयैः पिबति य इह मर्त्यस्तस्य पानात्ययाख्यो विरमति मदिराक्षीतुंगकुंभाश्रे
षभाजः ४ ॐ इति योगतरंगिण्यां पानात्ययचिकित्साकथनं नाम त्रयस्त्रिंशः सर्गः ॐ अथ दाहः त्वचं
प्राप्तः स पानोष्मा पित्तरक्ताभिमूर्छितः दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजं १ रुग्विनिश्चयात् शतधौतघृ।
ताभ्यक्तो लिप्तो वा सक्तुसिताम्बुतं कोलामलकसंयुक्तैर्दाडिमाम्लैश्च बुद्धिमान् २ छादयेत्तस्य सर्वांगमारना

पर्युषितांबुच भक्षांतःषोनिहंत्येवमाश्विनेयप्रकाशितं ८ सारसंग्रहात् सक्षौद्रमाम्रजंचूर्त्यंपिवेत्क्वापिं
रसान्वितं सत्क्षोमधुनाकुर्याद्भृंगूषान्शिशिरस्थितः ९ रसरत्नप्रदीपात् तृषितोमोहमायातिमोहा
त्प्राणान्विमुंचति अतःसर्वास्ववस्थासुनक्वचिद्वारिवार्यते १० पानीयंप्राणिनांप्राणाःविश्वमेतच्चतन्म
यं अतोत्यंतनिषेधेपिनक्वचिद्वार्यतेजलं ११ घोरोपद्रवसंयुक्तांतृष्णामरणमादिशेत् ❁ इतियोगत
रंगिण्यांतृष्णाचिकित्साकथनंनामैकत्रिंशस्तरंगः ❁ अथमूर्छा सुखदुःखव्यपोहाच्चनरःपततिका
ष्ठवत् मोहोमूर्छेतितामाहुःषड्विधासाप्रकीर्तिता १ हृग्विनिश्च्वयात् सेकावगाहोमणयःसहा ए:
शीतोपचाराव्यजनानिलाश्च पुष्पाण्यनेकानिचगंधवंतिविशानिशस्तानिचमूर्छितेषु २ सिताप्रि
यालेक्षुरसद्रुतानिद्राक्षामधूकस्वरसान्वितानि खर्जूरकाश्मर्यरसैःसृतानिमिश्राणिस पीषिसजीव
नानि ३ सिद्धानिवर्गेमधुरेपयांसिसदाडिमाजांगलजारसाश्च तथाययवालोहितशालयश्चमूर्छासु
पथ्याश्चसदासतीनाः ४ नासावदनरोधैस्तुनस्यैर्मस्यिचनिर्मितैः नरंजागरयेन्मोमूर्छितंमर्दमारु
तैः ५ तीक्ष्णांजनाभ्यंजनधूमयोगैस्तथानखांभ्यंतरतोत्रपातैः वादित्रगीतान्नुनयैरपूर्वैर्विस्मापनैर्गु

निमहाघोरां सपित्तभ्रमसंयुतां शंखचूर्णीरसं टंकद्वयं सममसितं मुहुः सक्षौद्रं मनुजः पीत्वा छर्दिभ्यः किल मु-
च्यते १० अजाजीधान्यपथ्याभिः सक्षौद्रैः सकटुत्रिकैः एतैः सार्द्धं भस्मसूतः सद्यो वांतिं विनाशयेत् ११ रसर-
त्नप्रदीपात् ॥ इति योगतरंगिण्यां छर्दिचिकित्साकथनं नाम त्रिंशस्तरंगः ॥ अथ तृष्णा सततं यः पिबेद्वा-
रि न तृप्तिमधिगच्छति पुनः कांक्षति यं तोयं तं तृष्णार्दितमादिशेत् १ वीरभद्रात् तृष्णाविच्छेदा गुदेस्य च पू-
र्णे संछर्दयेन्मागधिकोदकेन विलेपनं चात्र हितं विधेयं स्याद्दाडिमाम्लातकमातुलुंगैः २ सुवर्णरूप्या-
दि ॰भिरग्नितप्तैर्लोष्टैः कृतेवासिकतोपलैर्वा जलं सुखोष्णं शमयेच्च तृष्णां सशर्करं क्षौद्रयुतं हिमं वा ३ क-
सेरु शृंगाटकपद्मबीजबिसेक्षुसिद्धं ससितं च वारि तृषं क्षतोत्थामपि पित्तजातां निहंति पीतं शिशिरीकृतं
च ४ वैद्यात् अरुणचंदनचंदनवालकैर्नलदपद्मकतुल्यकृतांशकैः शिरसि लेपनमाचरतो नृणां तृ-
डुपयात्युपशांतिमसंशयं ५ नीलांबुजकुष्ठमधूलाजवटप्ररोहैः श्लक्ष्णीकृतैर्विरचिता गुटिका मुखस्था
तृष्णां निवारयति तत्क्षणमेव तीव्रामंतस्पृहामिव यतेः परमार्थचिंता ६ राजमार्तंडात् अथ रसः रस-
गंधककर्पूरैः शैलेयोशीरमरीचकैः ससितैः क्रमवृद्धैश्च सूक्ष्मं चूर्णं महर्षिवे ७ त्रिगुंजाप्रमितं वादेत्पिबेत्

शस्तो रसोदाडिमः अस्रुद्रोधकरामपजीर्णांशमनान्याहस्तथाभेषजान्यत्रारोचकेगवत्ययमुदुस्ततत्त्वदाना
नि च ३ सूतगंधाभ्रमगधांम्लिकामरिचसैंधवैः गुटिकारोचकहरीजिह्वावदनशुद्धिकृत ४ ॐ इतियो
गतरंगिण्यां अरोचकचिकित्साकथनंनाम अनत्रिंशस्तरंगः ॐ अथ छर्दिः दुष्टैर्दोषैः पृथक्सर्वैर्बीभ
त्सालोकनादिभिः छर्दयः पंचविज्ञेयास्ताः पृथक्लक्षरोर्मताः १ दधित्थरससंयुक्तोपिप्पलीमाक्षिका
न्वितं मुहुर्मुहुर्नरोलीढाच्छर्दिभ्यः प्रतिमुच्यते २ अमृतात् कोमलकरंजपत्रं सलवणाम्लेनसंयुक्तं यः
खादति दिनवदने छर्दिकथातस्यकुत्रेह ३ मारस्य हात एलालवंगगजकेसरकोमैलज्ञालाजाप्रि
यंगुघनचंदनपिप्पलीनां चूर्णानिमाक्षिकसितासहितानिलीढा छर्दिंनिहंति कफमारुतपित्तजानां ४
योगरत्नावल्यात कषायोभ्रष्टमुद्गस्यसलाजमधुशर्करः रंभाकंदरसोवापिमधुना छर्दिनाशकृत ५
अश्वत्थवल्कलं शुष्कं दग्धानिर्वापितं जले तद्वारिपानतोन्तनं छर्दिर्जयतिदुस्तरां ६ गुलालसलागोल्या
वारवंडे दध्यातदंतुवे पिवेच्छर्दिहरंकिंवामधुनामक्षिकामलं ७ वंगात ईषत्भृष्टंकरंजस्यवीजंखं
डीकृतंपुनः मुहुर्मुहुर्नरोभक्त्वा छर्दिर्जयतिदुस्तरां ८ पर्पटक्काथमादायशीतलं दापयेन्नरां वमिंहं

मारसंग्रहात् अर्केशानसममेवलिभवसमंतालंतद्दौशिलांश्लक्ष्णांकज्जलिकांविधायसुदृढेऽमत्रे।
धऊर्द्धक्षिपेत् ताम्रस्याथमुखेनिरुध्यविधिवत्तद्भस्मयंत्रेपचेत् क्षौद्रैर्भोऽनभ्यपूर्यपट्टजोयुक्तौकचस्नेमुधीः
११ सोमनाथीयताम्रस्यवल्लंयुक्त्यानुपानतः शीलयन्सकलान्रोगानुन्मूलयतिपथ्यभुक् ११ सोमनाथ
ताम्रमिति ॥ इतियोगतरंगिण्यांश्वासचिकित्साकथनंनामअष्टाविंशस्तरंगः ॥ अथस्वरभेदः अम्ला
देःकुपितैर्दोषैःस्वरनाडीगतैर्नृणां स्वरभेदःपृथक्सर्वैर्मेदसाचक्षयेणच १ चव्याम्लवेतसकटुत्रया
तिंतिडीककाशीसजीरकतुगादहनैःसमांसैः चूर्णोगुडप्रमृदितंत्रिसुगंधियुक्तंवैस्वर्यपीनसकफारुचिनु
प्रशस्तं २ इतिचव्यादिमोदकः वदरीपत्रवल्कंवाथतन्मृष्टंससैंधवं स्वरोपघातेकासेचलेहमेतंप्रयोजयेत्
३ व्याघ्रीस्वरसविपक्वंरास्नावाट्यालगोक्षुरव्योषैः सर्पिःस्वरोपघातंहन्यात्कासंचपंचविधं ४ वृहत् इति
यो॰ स्वरभेदचिकित्साकथनंनामऊनत्रिंशस्तरंगः ॥ अथारोचकः वस्तिंसमीरणेपित्तेविरेकंवमनंक
फे कुर्यादरोचकेबुध्याहर्षणांवमनंतथा १ अम्लिकागुडतोयंचत्वगेलामरिचान्वितं अभक्तच्छंदरोगे
षुशस्तंकवलधारणं २ जिह्वाकंठविशोधनंनदसनंचस्यात्शृंगवेरान्वितंसिंधूत्थंरहितमत्रवापमधुनः

साकथनेनामसप्तविंशस्तरंगः ❀ अथश्वासः येर्निमित्तैर्भवेद्धिक्का श्वासस्तैरेवजायते कुलत्थनागरव्याघ्रीवा
साभिः क्वथितंजलं १ पीतंपौष्करसंयुक्तंश्वासकासनिवारणं यंत्रात् गुडश्रुंठीशिवामुस्तैर्धारयेद्गुटिकांमुखे
श्वासकासेषुसर्वेषुविभीतंवापिकेवलं २ शार्ङ्गधरात भार्गीजयापलशतंसलिलार्मणाभ्योद्रुकपंचमूलतुल
यासहितंविपाच्यं पादस्थितेतुशतमत्रहरीतकीनोपक्कंव्यमुज्वलगुडस्यशतेनसाकं ३ उत्तार्यतत्रशिशिरे
मधुनःपलानिचत्वारिचद्विगुणितानिपलत्रयंच व्योषत्रिजातकमिभकेसरपत्रकंचामेषांपलंरचलुविधेयम
थोपयोज्यं ४ श्वासंचकासमविशोषमथापिहिक्कामेकाहिकंज्वरमथोत्कटपीनसंच हन्याद्रसायनमिदंहि
पुरंदरस्यप्रोक्तंसहस्त्रकरपुत्रभिषग्वराभ्यां ५ इतिभार्गीहरीतक्यवलेहः अथरसः रसंगंधंविषंचैवटंकणं
चमनःशिला एतानिटंकमात्राणिमरिचंचाष्टटंककं ६ एकैकंमरिचंदत्वाखल्वेचूर्णंविमर्दयेत त्रिकटुं
टंकषट्कंचदत्वापश्चाद्विचूर्णयेत ७ सर्वमेकत्रसंयोज्यकाचकूप्यांविनिःक्षिपेत श्वासेकासेचमंदाग्नौतथा
श्लेष्मामयेषुच ८ गुंजामात्रंप्रदातव्यंपर्णखंडेनधीमता सन्निपातेचमूर्छायामपस्मारेतथाग्नेः ९ अ
तिमोहत्वमापन्नेनस्यंदद्याद्विचक्षणः रसःश्वासकुठारोयंसर्वश्वासविकारजित १० इतिश्वासकुठारोरस

धात्रीसिताशुंठीकासीसंदधिनामच पाटल्याः सफलं पुष्पं कृष्णाखर्ज्जूरमुस्तकं षडेते पादिकालेहा हिक्का
श्वासमधुसंयुता ६ मधुकं मधुसंयुक्तं पिप्पलीशर्करान्वितं नागरं गुडसंयुक्तं हिक्काघ्नं नावनत्रयं ७ स्तन्ये
नमक्षिकाविष्टानस्येवालक्तकोत्तुना योज्याहिक्काभिभूतेभ्यो स्तन्येवाचंदनान्वितं ८ सिंधुसौवर्च्चलोपेतमा
तुलुंगरसंपिबेत् हिक्कार्त्तो मधुनालिह्यात् शुंठीधात्रीकणान्वितां ९ कृष्णामलकशुंठीनां चूर्णं मधुसिताय
तं मुहुर्मुहुः प्रयोक्तव्यं हिक्काश्वासनिवारणं १० हिध्मीश्वासीपिबेत् भार्ग्गीं सविश्वामुष्णवारिणा नागरं वा सिता
भार्ग्गीसौवर्च्चलसमन्वितं ११ वृंदात् दशमूलीजलयुतं सूतं हिक्कासु योजयेत् श्वासकासहरः सर्वो विधिर
त्रापियोज्यते १२ रसरत्नप्रदीपात् पाटलाफलतोयेन क्षौद्रेणाचसमन्वितं हेमभस्म निहन्त्येव हिक्काः पंच।
सुदारुणाः १३ कटुकागैरिकाभ्यां च मुक्ताभस्म तथैव च बीजपूरस्य तोयेन ताम्रं तद्वत् समाक्षिकं १४ हे
मशुक्तार्ककान्तानां भस्म वह्निसमन्वितं बीजपूररसैः क्षौद्रसौवर्च्चलसमन्वितः १५ हंति हिक्काशतं सत्यमे
कमात्राप्रयोगतः काकयापंचहिक्कानां हरणोऽनलुच्यते १६ वैद्यसर्वस्वात् दशमूलीकषायेण मधुनाचस
मन्वितं कांतायोभस्म हिक्कानां पंचानां पच्चतां नयेत् १७ वसंतराजात् ॐ इति योगतरंगिण्यां हिक्काचिकित्

कफश्रीगुरिकाग्रंथांतरे रात्रिदध्यशिलाधूमपानात्कासस्छुतिःकुतः जलपानादपितथात्रमेणाक्षणा
दाक्षये ३० वासायांविद्यमानायामाशायांजीवितस्यच रक्तपित्तीक्षयीकासीकिमर्थमवसीदति
३१ सारसंग्रहात मैथुनस्निग्धमधुरदिवास्वापपयोदधि पिष्टान्नपायसादीनिकासीधूमंचवर्ज्ज
येत ३२ रेगंकृष्णाभयाक्षारंरूषभार्गीकृमोत्तरा तत्समंखदिरंसारंवंचूलकायभावयेत ३३ एक
विंशतिवारांश्चमधुनाकृमितागुटि स्वासेकासेचहिक्कांश्चहंतितंकासकर्त्तरी ३४ इतिकासकर्त्तरी
ॐ इतिश्रीयोगतरंगिण्यांकासचिकित्साकथनंनामषड्विंशस्तरंगः ॐ अथहिक्का अपानादूर्द्धगा
त्कुर्वाहिक्कापंचकफान्वितान् अन्नजायमलाक्षुद्रागंभीरामहतीतिच १ नारीपयःपिष्टमशुक्ष्णचं
दनंघृतेस्ठखोस्नेचससैंधवेच पिष्टंतथासैंधवमंबुनाचनिहंतिहिक्कांनजुनावनेन २ नारायणीया
त यथाशक्तिवामाक्षिकेनावलीढं कृष्णाचूर्णशर्करायुक्तंचकिंवा सर्पिःकोष्णंक्षीरमुष्णं रसोवाहन्यादि
क्षोःपानतःपंचहिक्का ३ शुश्रुतात शिखिपिच्छभस्मकृष्णाचूर्णंमधुमिश्रितंमुहुर्लीढं हिक्कांहंतिप्रव
लांश्वासंचैवातिदुस्तरांछर्दि ४ चिकित्सादीपात वौमेलैजुनांजनंलाजाक्तिकाकांचनगैरिकं कृष्णा

क्षुद्राक्वाथं दशकणायुतं पिबेत्तदनु कासाच्च श्वासाच्च परिमुच्यते २० इति भार्गोत्तरोवटकः भार्गोरसस्य गंध
स्य द्वावेकौ लोहभस्मनः एतच्चूर्णं द्रवीभूतं मध्ये कदलीदले २१ पातयेद्धोमयेनैतत्थैवोपरियोजये
त् ततः पिष्ट्वा द्रवैरेभिर्मर्दयेत्सप्तधा पृथक् २२ भार्गीमुंडीमुनिवराजयानिर्गुंडिका द्रवैः व्योषवासककं
न्यार्द्रद्रवैः शुष्कं पुटेल्लघु २३ आगंधं खर्परेनाम्ना पर्पटीतिरसो भवेत सर्वरोगहरः स्वैः स्वैरनुपानैर्हिमा
षिकः २४ तांबूलीपत्रसहितः कासश्वासहरः परः सकणाः स्वरसाक्वाथोऽनुपानेवा समोजलं २५ इति
पर्पटीरसः रसरत्नप्रदीपात् पारदं गंधकं शुद्धं मृतं लोहं च टंकणं रास्नाविडंगत्रिफलादेवदारुकटुत्रये
२६ अमृतापद्मकं क्षौद्रं विषं तुल्यानि चूर्णयेत् त्रिगुंजः सर्वकासघ्नो ज्वरारोचकमेहनुत् २७ इति पा
रदादिचूर्णो योगरत्नावल्यात् तुल्यालवंगमरिचाक्षफलत्वचः स्युः सर्वैः समश्च खदिरस्य सारः
वेव्वूलवृक्षजकषाययुजो चतुर्णां कासं निहंति वटिका वटिकाष्टकोते २८ इति कासघ्नी गुटिका लोलिं
बराजात् कर्पूरमर्द्धकर्षं मृगमदमपि रेवकुष्ठमयुग्मं मरिचकणाफलकुलिंजनमेकैकं शुक्तिपरिमाणं
२९ दाडिमफलवल्कलपलमपि तिलसमं खदिरसारमथ चूर्णं वटिका मृदु समाना ध्रुतास्येकफघ्नी स्यात्

चेत्सीरेचतुर्गुणी ८ सिद्धशीतेपलान्यष्टौशर्करायाप्रदापयेत् एतद्द्राक्षाघृतंसिद्धंक्षीणक्षतहितंपरं ९
इतिद्राक्षाद्यंघृतं अथकासः प्राणोह्युदानमन्वेत्यप्रदोर्ध्वमुपसर्पति तदासंजायतेकासःकंठहृन्ना
भिकर्षणः १० पंचमूलीकृतःक्वाथःपिप्पलीचूर्णसंयुतः रसान्नमश्नतोनित्यंवातकासमुदस्यति
११ भार्गीद्राक्षासटीसिंगीपिप्पलीविश्वभेषजं गुडतैलयुतोलेहोहितोमारुतकासिनां १२ बलाद्विबृहती
वासाद्राक्षाभिःक्वथितेजले पित्तकासापहंयोज्यंशर्करामधुसंयुतं १३ पुष्करंकट्फलंभार्गीविश्वपिप्पलि
साधितः पिबेत्क्वाथंकफोद्रेकेश्वासेकासेचहृद्ग्रहे १४ प्रस्थंबिभीतकानामस्थीनिविहायसाधयेद्जाम्
त्रे लेहवद्दवलेहोयंमधुनासहितोऽतिकासहरः १५ यंशात् मरिचंकर्षमात्रंस्यात्पिप्पलीकर्षसंमितं
अर्द्धकर्षोयवक्षारःकर्षयुग्मंचदाडिमं १६ एतच्चूर्णीकृतंयुंज्यादष्टकर्षगुडेनहि शाणप्रमाणांगुटि
कांकृत्वावक्त्रेविधारयेत् १७ अस्याःप्रभावात्सर्वेपिकासायांत्येवसंक्षयं इतिमरीचादिगुटिकाशा
र्ङ्धरात् रसगंधकणापथ्याकलिद्रुफलवासकाः भार्गीचेतिक्रमात्वृद्धमेतद्देवलजैर्द्रवैः १८ पिष्ट्वं
विंशतिवारंतत्कुर्यात्क्षोद्रेणगोलकान् कर्षप्रमाणेनेतस्यतमेकंप्रातर्हत्यतः १९ अश्वगन्धास्त्रयं

तेसप्रधाविमर्द्यंच्चकटुत्रयांबुभिरयंक्षयस्यांतकृत ८१ रसःकनकसुंदरोभवतिसन्निपातेप्ययंसहार्द्रकरसेनस
यापवनगुल्मशूलादिहृत सविग्रहकृतयोजितःसकलमत्रपथ्यंहितंमृगांकवद्यापरंकिमपिनैवयोज्यंक्वचि
त इतिकनकसुंदरोरसः शोकस्त्रियःक्रोधमसूयनंचत्यजेदुदारान्विषयान्भजेच्च गुरुद्विजातित्रिदशांश्चपू
जयेत्कथाश्चपुण्याःशृणुयाद्द्विजेभ्यः ८३ ॥ इतियोगतरंगिण्यांक्षयचिकित्साकथनंनामपंचविंशस्तरं
गः ॥ अथोरःक्षतचिकित्सा कर्मभिर्बहुभिःक्रूरैर्भृशमभ्याहतस्यच विक्षतेवक्षसिव्याधिर्बलवान्स
मुदीर्यते १ उरोमंथीक्षतीलाक्षांपयसामधुसंयुतान् सद्यएवपिबेज्जीर्णेपयसाद्यात्सशर्करम् २ ए
लापत्रत्वचोद्राक्षाःपिप्पल्यर्द्धपलैस्तथा सितामधुकखर्जूरमृद्वीकाश्चपलोन्मिता ३ संचूर्ण्यमधुना
युक्तागुटिकासंप्रकल्पयेत अक्षमात्रांततश्चैकांभ- क्षयेच्चदिनेदिने ४ कासश्वासंज्वरंहिक्कांछर्दि
मूर्छांमदभ्रमं रक्तनिष्ठीवनंतृष्णांपार्श्वशूलमरोचकम् ५ शोषप्लीहामवातांश्चस्वरभेदंक्षयक्षयम्
गुटिकातर्पणीवृष्यारक्तपित्तंचनाशयेत ६ इत्येलाद्यागुटिका द्राक्षायाःसंमितंप्रस्थंमधुकस्यपलाष्टकम्
पचेत्तोयाढकेसिद्धेपादशेषेणतेनतु ७ पलिकेमधुकद्राक्षेपिष्ट्वाक्षीरपलद्वयम् प्रदायसर्पिषःप्रस्थंप

र्तां भस्मैकभागिकं मृततान्नस्यैकभागः शिलागंधकतालकं ७३ तथा भागद्वयं शुद्धं मेलयित्वा विचूर्णी
येत् वराटीः पूरयेत्तेन अजाक्षीरेण टंकणं पिष्ट्वा च तन्मुखं रुंध्यात् मृद्भांडे तान्निरोधयेत् शुष्कं गजपुटे
पक्त्वा चूर्णीयेत्स्वांगशीतलं ७५ रसो राजमृगांकोयं पंचगुंजः क्षयापहः दशापि प्पलिकाक्षौद्रैः मरि
चैकोनविंशतिः सघृतं दापयेत्पथ्यं राजरोगप्रशांतये ७६ इति राजमृगांकः सारसंग्रहात् रसेन तु
ल्यं कनकं तयोस्तु साम्येन शुल्वं त्वावमौक्तिकानि रसप्रमाणो बलिरत्र भागाः क्षारस्य सर्वैं जुषवा
रिणात ७७ संमर्द्य वस्त्रेस्तु विधाय गोलं दिनं पचेत्तं लवणेन पूर्णे भांडे मृगांकोयमतिप्रगल्भः क्ष
याग्निमांद्यग्रहणीगदेषु ७८ साज्योषणाभिर्मधुपिप्पलाभिर्वल्लोस्य देयो न ततोधिकस्तु पथ्यं
हितं शीतलमेव योज्यं त्याज्यं सदापि न करं विदाहि इति मृगांकः रसरत्नप्रदीपात् रसः कनकभागि
कः कनकमाक्षिकस्तालकः शिलारसकगंधका रससमाः सतुत्थाइमे विमर्द्य पयसारवेः सकलं।
मेतदस्योद्रवै [redacted] प्रतिदिनं पचपक्कतद्दिति भावयेद्बुद्धिमान् ८० जयामुनि
कलिप्रियादहनभृंगवासोद्भवैर्विभाव्य चरसैस्ततः सुदृढगोलकं स्वेदयेत् मृगांकवदयाद्रकद्रवभरेण

देवगुंजामात्रंमधुचपलया सर्वरोगेवसंतः ६४ इतिमालतीवसंतः रसंवज्रंहेमताम्रंनागंलोहंचताम्रकं तुग
ल्यांसमारितंयोज्यंमुक्तामाक्षिकविद्रुमं ६५ लाजावर्त्तंचवैक्रांतंगोमेदंपुष्परागकं शंखंचतुल्यंतुल्यांशांस
र्वाहंचित्रकद्रवैः ६६ मर्दयित्वाविचूर्ण्याथतेनापूर्यवराटकान् टंकणंरविदुग्धेनपिष्ट्वातन्मुद्रणंचरेत् ६७
मृद्भांडेतान्सुसंयम्यसम्यग्गजपुटेपचेत् आदायचूर्णयेत्सम्यक्निर्गुंड्यासप्तभावना ६८ आर्द्रकस्य
रसैःसप्तचित्रकस्यैकविंशति द्रवैर्भाव्यंततःशुष्कंदेयंगुंजाचतुष्टयं ६९ क्षयरोगंनिहंत्याशुसत्यंशिवदूवां
धकं योजयेत्पिप्पलीक्षौद्रैःसघृतैर्मरिचैश्चवा ७० पोटलीरत्नगर्भोयंसर्वरोगहरोमतः इतिरत्नगर्भ
पोटलीरसः कृष्णाप्रस्थंपचेदाढकपयसिद्धतस्यांजलिखंडपात्रंदत्वालेहोपमेस्मिन् शुष्केसमचतु
र्जातविश्वोषणेन्दुंग्रंथश्रीखंडयष्टीमधुमुस्तत्रयुतंजातिकापंचकर्षं प्रत्येकंचूर्णयित्वामधुकु
डव युतःस्यात्खंडावलेहः आदौमंदाग्निकार्श्येहरितसचशिशुस्त्रीजरन्मानुषेषुप्रायोवृष्योक्षिप
थ्योविपुलबलकरोदीपनोपाचनश्च ७२ कासश्वासप्रमेहक्षयरुगतितृषाकामलापांडुकंडूप्लीहा
जीर्णज्वरंचानिलकफविकृतीरक्तपित्तंचहन्यात् इतिखंडपिप्पल्यवलेहः रसभस्मत्रयोभागाःख

गोलीकृत्यविशोषितो

मुग्रंहंत्येववातपित्तकफामयान् ५४ ज्वरादीनखिलान्रोगानयथादित्यस्तमोर्दनः सततांभ्यासयोगेन
वलीपलितनाशनः ५५ इतिकुसुदेश्वररसः रसार्णवात् भस्मीभूतसुवर्णतारदिनकृत्सूततताभ्रसत्वैः क्रमा
संवृद्धैस्त्रितयत्रयक्रिमहरांभोदेर्युतः कट्फलैः निर्गुंडीदशमूलवह्निरजनीव्योषार्द्रकैर्भावितैर्निगदितः
पंचामृताख्योरसः ५६ नानेनसदृशःकोपिरसोस्तिभुवनत्रये निहंतिसकलान्रोगानवरोगानिवाच्युतः
५७ सर्वरोगहरस्तत्तद्रोगानुपानतः अयंपंचामृतोनॄणांत्रिदशानामिवामृतं ५८ इतिपंचामृतो
रसः सारसंग्रहात् पथ्यकृद्धाटकंचंद्रोत्रयोवंगारिकांतयोः चत्वारिसूतमभ्रंचप्रवालंमौक्तिकंपविः
५९ भावनागव्यदुग्धेक्षुवासाश्रीकदलीनिशा शतपत्रेश्चेतकेतंमालत्याःकुसुमैस्तथा ६० पश्चान्
मृगमदाभाव्यंसुसिद्धोरसराड्भवेत् कुसुमाकरविख्यातोवसंतपदपूर्वकः ६१ वल्लद्वयमिदंचास्य
सिताज्यमधुनासह वलीपलितहृन्मेध्यंकामदंसुखवर्द्धनं ६२ मेहघ्नंपुष्टिदंकांतपरंसौख्यंरसा
यनं सिताचंदनसंयुक्तंअम्लपित्तादिरोगनुत् ६३ इतिवसंतकुसुमाकरोरसः स्वर्णमुक्ताहरदम
सिंभागवृध्याप्रयोज्यंखर्परपेष्योप्रथमनवनीतेननिंबुनाच यावत्स्नेहोव्रजतिविलयंमर्दयेत्ताव

वर्णकृत ४२ अपस्मारज्वरोन्मादकृत्यालक्ष्मीविनाशनं आयुःपुष्टिकरंचैववशीकरणमुत्तमं ४३ विशेषा
त्क्षयरोगघ्नंरक्तपित्तहरंपरं रतिचंदनाद्यंतैलं मल्लायतेवलंपुंसोशुक्रायत्तंतुजीवनं तस्माद्यत्नेनसंरक्षेत्यक्ष
मिरोगमल्लरेतसी ४४ हरीतकीशतंयुंज्यात्यवानामाढकंतथा पत्नानिदशमूलस्यविंशतिश्चनियोजयेत
४५ चित्रकंपिप्पलीमूलमपामार्गःसटीतथा कपिकच्छुःशंखपुष्पीभार्गीचगजपिप्पली ४५ बलापुष्क
रमूलंचपृथक्द्विपलमात्रया पचेत्पंचाढकेतोयेयवैःस्विन्नैःसृतंनयेत ४६ तच्चाभयाशतंदद्यात्क्वाथेत
त्रविचक्षणः सर्पिस्तैलाष्टपलकंक्षिपेत्कुडतुलांतथा ४७ पक्वालेहत्वमानीयसिद्धेदत्वापृथक्पृथक् तस्मि
न्पिप्पलीचूर्णंदद्यात्कुडवमात्रया ४८ हरीतकीद्वयंखादेत्तेनलेहेननित्यशः क्षयंकासंज्वरंश्वासंहिक्का
र्शोरुचिपीनसान् ४९ ग्रहणीनाशयेत्तेनवलीपलितनाशनः ५० इत्यगस्त्यहरीतक्य वलेहःशार्ङ्गधरा
त् अथरसः पारदंशोधितंगंधमभ्रकंचसमंसमं तदर्धंदरदंदद्यात्तदर्धांचमनःशिला ५१ सर्वांर्द्धमृत
लोहंचवेल्वमध्येविनिक्षिपेत द्विःसप्तभावनादेयाशतावर्यारसेनच ५२ ततःशुष्कोभवत्येषकुमुदेश्व
रसंज्ञकः सितयामरिचेनाथगुंजाद्वित्रिप्रमाणतः ५३ भक्षयेत्प्रातरुत्थायपूजयित्वेष्टदेवतां यक्ष्मारा
वलवर्णकरःपुंसामवलेहोरसायनः विनि
र्गतोऽगस्त्यमुनिनासर्वरोगप्रणाशनः ५३॥४

नंलिहेत २९ कासश्वासक्षयहरं रक्तपार्श्वगदाहजित मंदाग्निसुप्रजिद्धं त्वंपार्श्वशूलमरोचकं ३० ज्वरमूर्छा
तेरक्तपित्तमाश्व्यबोहति सितोपलाद्यंचूर्णं पिप्पलीलोध्रमस्त्रिपाद्याधात्र्येलावालुकैः चव्याचित्रकजंतुघ्न
क्रमुककोशीरचंदनैः ३१ मुस्ताप्रियंगुलवलीहरिद्रामिसिपत्रकैः पत्रत्वक्कुष्ठतगरनागकेसरसंयुतैः ३२ भागैः
स्यादर्धपलिकैर्द्राक्षांषष्टिपलांक्षिपेत पलानिशातधातक्या गुडस्यचशतत्रयं ३३ तोयमात्राश्चतुर्थषष्टिर्भवे तोयामेतावये किंदं ८
त्पेतत्सुखावहं ग्रहणीपांडुरोगार्शःकार्श्यगुल्मोदरापहः ३४ पिप्पल्याद्यरिष्टोयंक्षयीक्षयकरः परः ३५
इतिपिप्पल्याद्यरिष्टः छागमांसतुलांसम्यक्पाचयेदर्मणोंभसि पादशेषेणतेनैवसर्पिःप्रस्थंविपाचयेत
३६ ऋद्धिवृद्धिश्रमेदेतथाजीवककर्षभौ काकोलीक्षीरकाकोलीकल्कैरेभिःपलोन्मितैः ३७ सम्यक्सिद्धे
वतार्याथशीतेतस्मिन्प्रदापयेत शर्करायाःपलान्यष्टौ मधुनःकुडवंक्षिपेत ३८ पलंपलंपिबेत्प्रातः यक्ष्माणंहंति
दुस्तरं बल्यंस्थौल्यकरंवृष्यंदीपनंमरवह्निजित ३९ इतिछागलाद्यंघृतं हारीतात चंदनोशीरखवांप्यंयष्टी
शैलेयपद्मकं मंजिष्ठासरलंदारुसशेलापद्मकेसरं ४० पत्रंबिल्वमुशीरंचकंकोलंचनतांबुदं हरिद्रेसारि
वेतिकालंकंगागुरुकुंकुमं ४१ त्वगरेणुनलिकाश्चैभिस्तैलंमस्तुचतुर्गुणं लाक्षारससमंसिद्धंग्रहध्नंबल

चरकात् हेमाद्याःसूर्यसंपाताद्रवंतिगिरिधातवः जत्वाभंमृदुमृत्स्नाभंतुद्रवंतिशिलाजतु तालीसपत्रंमरिचं
नागरंपिप्पलीशुभाः यथोत्तरंभागवृध्यात्वगेलेचार्द्धभागिके पिप्पल्यष्टगुणाचात्रप्रदेयासितशर्करा का
सश्वासारुचिहरंतच्चूर्णंदीपनंपरं १९ हृत्पांडुग्रहणीदोषप्लीहशोषज्वरापहं तालीसाद्यंचूर्णं मृद्वीकाया
स्तुलार्द्धंतुद्विद्रोणेपांविपाचयेत् चतुर्थशेषेतस्मिंस्तुपूतेशीतेप्रदापयेत् २० गुडस्यद्वितुलांदत्वातत्सर्वं
घृतभाजने विडंगंपिप्पलीलोध्रत्वगेलापत्रकेशरं २१ मरिचंचभिषक्चूर्णंसम्यक्कृत्वाविचक्षणः क्षिपेच्च
पलिकैर्भागैःस्थापयेच्चकियद्दिनं २२ ततोयथाबलंपीत्वाकासश्वासगलामयान् हंतियक्ष्माणमत्युग्रमु
रःसंधानकारकं २३ चतुर्भागंचद्राक्षायाधातकीमत्रकेचन प्रयच्छंतितनोवीर्यमेतस्योच्चैःप्रजायते २४ इति
मृद्वीकासवः त्रिकटुत्रिफलाभिश्चजातीफललवंगकैः नवभागोन्मितैरेतैःसमंतीक्ष्णंमृतंभवेत् २५ संचूर्ण्य।
लोडयेत्क्षौद्रेनित्यमतिचमानवः कासंश्वासंक्षयंमेहंपांडुरोगंभगंदरं २६ ज्वरंमंदानलंशोथंसमोहंग्र
हणींजयेत् २७ इतिनवायसचूर्णं सितोपलाषोडशस्यात्स्यादष्टौस्यात्वंशलोचनः पिप्पलीस्याच्चतुःका।
र्षास्यादेलाचद्विकार्षिका २८ एककर्षाचत्वक्कार्याचूर्णयेत्सर्वमेकतः सितोपलादिकंचूर्णंमधुसर्पिषु

ज्येवासाघृतेवाप्यथषट्पलंवा हितंपयस्छागलमव्यवायेप्रयुज्यतेनागवलाभिधानं ९ भृंगीचामल
कीफलानिकवलाछिन्नाविदारीसधीजीवंतीदशामूलचंदनघनैर्नीलोत्पलैलावधैः मद्धीकाष्टकवर्गपो
ष्करयुतैःसार्द्धंपृथक्पालिकैरक्ष्कौरोनशतानिपंचविपचेद्धात्रीफलानामतः १० उद्धृत्यामलकानितैल
षड्विंश ४ घृतयोः षड्भि–ःपलैर्भर्जयेदन्यार्द्धतुलांनिधायविधिवन्मीनांडिकायाःपचेत् शीतेषत्रामधुनःपलानिकुड
वोवांश्यारचतुर्जातनोमुष्टिर्मागधिकापलद्वयमयंप्रातःस्मृतस्त्रावलेहः ११ नशोषःसाफल्यैव्रजति
वपुषिक्षीयमाणोपिजंतोर्न्नमूर्च्छानछर्दिस्तदपिचश्वासकासादयश्च– नचालक्ष्मीर्विघ्नंक्वचिदपि
नचव्यापदःसंभवंतिप्रयोगादेतस्मान्नैसिचधियोविभ्रतिभ्रांतिमंतः १२ च्यवनप्राशःचिकित्साततः
वासकस्यरसंप्रस्थंमाक्षिकेसितशर्करा पिप्पलीद्विपलंचैवदत्वामृद्वग्निनापचेत् १३ स्नेहीभूतेततः
पश्चाद्ददयात्क्षौद्रंपलाष्टकं दत्वावतारयेद्वैद्योमात्रयालेहमुत्तमं १४ निहंतिराजयक्ष्माणांकुर्नीमपि
बहून्यपि पार्श्वशूलंचहृच्छूलंज्वरंचाप्युपोहति १५ वासालेहः योगरत्नावल्यात् फलत्रिकक्काथवि
शुद्धमार्दैश्शुद्धंगुडूच्यारसामूलशुद्धं स्थितादिकाकोलिगुगादिसिद्धंशिलाजतुस्यात्सर्पिषुप्रसिद्धं १६

ह्निशः ४२ चंदनस्यकमलस्यमालतीकोरकस्यचउषपल्लवस्यच धान्यवाररणाबुसाधनावरीशाल्मलीवट।
जयमृतस्यच ४३ रक्तपित्तकुलकंडनाभिधोजायतेरसवरोरक्तपित्तिनां प्राणदोमधुयुषड्वैरयंसेवितस्तुवसुक्
स्तलामितः ४४ नास्त्यनेनसममत्रभूजलेभेषजंकिमपिरक्तपित्तिनां रक्तपित्तकुलकंडनाभिधोरसकरसेन्द्र
चिंतामरोः ॐ इतियोगतरंगिरायां रक्तपित्तचिकित्साकथनंनामचतुर्विंशस्तरंगः ॐ अथक्षयः श्लेष्मा।
धिक्याद्वायायासैः पीडितोयःप्रशुष्यति कासश्वासार्दितोरक्तंवमेच्छुक्लेसरणोज्वरी १ अग्निमांद्यतृषायुक्तो
रिरेसुमांसलोलुपः विस्वरस्छर्दिवान्दीनःसज्ञेयःक्षयपीडितः २ शालिषष्टिकगोधूमयवमुद्गादयःशुभाः
मद्यानिजांगलाःपक्षिमृगाःशान्ताःविशुष्यतः ३ सपिप्पलीकंसयवंसकुल्थंसनागरं दाडिमामलकोपेतंस्नि
ग्धमाजंरसंपिवेत ४ तेनषड्विनिवर्तंतेविकारापीनसादयः इच्यतोद्विगुणांमांसंसर्वतोष्टगुणांजलं ५
पादस्थंसंस्कृतंचाज्यंषड्गोपूषउच्यते रुक्मनाभ रास्नाकर्पूरतालीसमेकपर्णीशिलाजतु त्रिकटुत्रिफला
मुस्तविडंगदहनाःसमाः ६ चतुर्दशायसोभागास्तच्चूर्णंमधुसर्पिषा लीढंकासंज्वरंश्वासंराजयक्ष्मा
णामेवच ७ त्वंवर्णाग्निपुष्टीनांवर्द्धनंदोषनाशनं ८ इतिचतुर्दशांगलोहं द्विपंचमूलीजलसिद्धमा
व

त्तिष्ठेच्छीतेच माक्षिकात् ३२ कुडवं पलमानं तु चातुर्जातं सचूर्णितं क्षिप्त्वावलेह्यनं त्वोरेद्रक्तपित्ती क्षयस्वयी ३३
कासश्वासप्रगृहीतश्च यक्ष्मवांश्च विशेषतः इति वासावलेहः शतावरीमुण्डितिकावलामृतापलत्वक्चतुष्क
रमूलभार्गी वृषोव्रहत्यौ खदिरं चमूसलीपृथक्पृथक् पंचपलानिमानि ३४ पक्वं जले द्रोणमिते ष्टमांशं या
वद्भवे स्थेप्समथैव पूतम् विमर्द्दितस्यात्र निधायधीमान् पलानि चद्वादशमाक्षिकस्य ३५ तथा सुचूर्णस्य
चलोहजस्य विवर्द्धितं खंडशतं च तुल्यं देयं पलं षोडशकं विधिज्ञैर्विपाचयेल्लोहमये च पात्रे ३६ गुडेन तुल्यं
च यदा भवेत्तदा तु गा विडंगं मगधा च शुंठी हिज्जीरके कर्कटकं पलानां त्रिकं च धान्यं मरिचं सकेसरं ३७ पलेन
मात्रां विदधीत तत्र ष्टकल्कवद्धितं चूर्णमिदं घृतेन स्निग्धे कपाले प्रणिधाय युंज्यात्कर्षप्रमाणं विदितं च चूर्णं
३८ प्रभातकाले च सदुग्धपानं ग्रहणीचान्नानि च भोजनानि रक्तं सपित्तं सहसा निहंति निरक्तप्रवाहं च सरक्त
शूलं ३९ रक्तातिसारं रुधिरप्रमेहं तथैव वस्तौ विहितं नराणां भगंदरार्शःश्वयथूं निहंति तथाम्लपित्तांक
लराजरोगं ४० विशेषतः कुष्ठरुजश्च गुल्मान् चलप्रदं वृष्यतमं प्रदिष्टं खंडाद्यलोहं योगरत्नावल्या
तं शुद्धपारदवलिप्रवालकं हेममाक्षिकभुजंगरंगकं मारितं सकलमेतदुत्तमं भावयेत्पृथगतद्रवे राम

त्रिरेतानि समभागानि कारयेत् तंडुलोदकसंयुक्तं मधुना सह योजयेत् २० योगो लोहितपित्तानामर्शसां ज्वरि
णां तथा मूर्छामसोपसृष्टानां तृष्णार्त्तानां प्रदापयेत् २१ अतीसारं तथा छर्दिं स्त्रीरोगांश्चापि रजोग्रहं प्र
च्युतानां च गर्भाणां स्थापनं परिमिष्यते २२ अश्विनोः संमतो योगो रक्तपित्तनिवर्हणः २३ इति चंदना
द्यं चूर्णं कूष्मांडकात्पलशतं सुस्विन्नं निष्कुलीकृतं पचेत्तत्प्रस्थे घृते प्रस्थे पात्रे ताम्रमये दृढे २४ यदा मधुनि
भानस्युस्तदा खंडशतं न्यसेत् पिप्पलीशृंगवेराभ्यां द्वे पले जीरकस्य च २५ त्वगेलापत्रमरिचधान्यकानां
पलार्द्धकं न्यसेच्चूर्णीकृतं तत्र दर्व्या संघट्टयेत्ततः २६ तत्पक्वं स्थापयेद्भांडे दत्वा क्षौद्रं घृतार्द्धकं तद्यथाग्निव
लं खादेद्रक्तपित्तक्षतक्षयी २७ कासश्वासतमश्छर्दितृष्णाज्वरनिपीडितः वृष्यं पुनर्नवकरं बलवर्ण
प्रसाधनं २८ उरःसंधानकरणं बृंहणं स्वरबोधनं अश्विभ्यां निर्मितं श्रेष्ठं कूष्मांडकरसायनं २९ इति
कूष्मांडकं मध्वाटरूषकरसो यदि तुल्यभागो कृत्वा नरः पिबति प्रत्यतरः प्रभाते तद्रक्तपित्तमपि दारुणा
मप्यवश्यमाशु प्रशाम्यति जलैरिव वह्निपुंजः ३० राजमार्त्तंडात् तुलामादाय वासायाः पचेदष्टगुणे जले
तेन पादावशेषेण पाचयेदाढकं भिषक् ३१ चूर्णानामभयानां तु खंडं छिन्नपलं तथा द्वे पले पिप्पलीचूर्णं

—७५५८

जत्वकमंजिष्ठाशैलवालुकाः मूर्वालोध्रमुशीरंच मुस्ताचंदनपद्मकौ ८ द्राक्षामधुकपथ्याश्च काश्मीरंचंदनं
सितं एतैःपिष्टैः कर्षमात्रैर्घृतप्रस्थंविपाचयेत् ९ अजाक्षीरंतंडुलांबु पृथक्दत्वाचतुर्गुणं तत्पानंवमतो
रक्तंनावनंनासिकागते १० कर्णाभ्यांयस्यगच्छेत्तु तस्यकर्णौप्रपूरयेत् चक्षुर्गतेचरक्तेचपूरयेत्तेनच
क्षुषी ११ मेढ्रपायुगतेवापि सर्वत्रैवप्रयोजयेत् प्रवृत्तेरोमकूपेभ्यः अभ्यंगेनजयेद्ध्रुवं १२ इतिदूर्वाद्यंघृ
तंवृषात तुलामादायवासायाः पचेदष्टगुणेजले तेनपादावशेषेण पाचयेदाढकंभिषक् १३ चूर्णाना
मभयानांच खंडात्शतपलंतथा शीतीभूतेनिदध्यात्तु क्षौद्रस्याष्टौपलानिच १४ वंशोद्भवायाश्चत्वा
रिपिप्पल्याः द्विपलंतथा चातुर्जातपलंत्वेकं चूर्णितंतत्रदापयेत् १५ रक्तपित्तंनिहंत्याशु कासश्वासंतथा
क्षयं विद्रधिंजठरंगुल्मंतस्मात् हृद्रोगपीनसौ १६ पलार्द्धंभोजनंचास्य यथेष्टंतत्रभोजनं इतिवासाह
रीतकीयोग रत्नावल्यात् चंदनंनलदंलोध्रमुशीरंपद्मकेसरम् नागपुष्पंचविल्वंच भद्रमुस्तां
सशर्करम् १७ ह्रीवेरंचैवपाठाचकुटजोत्पलमेवच श्रृंगवेरंसातिविषाधातकीसरसांजना १८
आम्रास्थिजंबूसारास्थितथामोचरसोपिच नीलोत्पलंसमंगाचसूक्ष्मैलादाडिमत्वचः १९ चतुर्विंश

स्य गुडूचिकायाः व्योषस्य चूर्णस्य च नालमल्याः सशाल्मलस्यैफलत्रयं स्यात् ३० पथ्यकृपथ्यकृषट्गगनस्य चा
षैलोहस्य सर्वैस्त्रिफलाजलेन छष्टेचतुःषष्टिमितं नरधीः स्युर्भावनामार्कवजद्रवस्य शिग्रुत्थनीरेणाच षोडशा
षैतथान्नलोत्था गुडूचिकान्यकायाः ३१ श्रार्द्रद्रवस्येति रसोयमुक्तः पांडुक्षयश्वासगदादिहंता क्षौद्रेणवाश
र्करयाच तेन कर्षार्द्धमेतस्य भजेत्प्रयत्नात् ३२ इति त्रैलोक्यनाथो रसः रसरत्नप्रदीपात् ॥ इतियोगः पांडुका
मलाकुंभकामलाचिकित्साकल्पनं नाम त्रयोविंशस्तरंगः ॥ अथ रक्तपित्तं क्षारकटुम्लतीक्ष्णादेर्दग्धं
पित्तं दहत्यसृक् तदूर्ध्वाधोविलैर्यातिरक्तपित्तं तदुच्यते १ अधःप्रवृत्तं वमनैरूर्ध्वगं च विरेचनैः जयेदन्य
तरादापि क्षीणस्य शमनैः पृथक् २ अतिप्रवृद्धदोषस्य पूर्वंलोहितपित्तिनः अक्षीणबलमांसाग्नेः कर्त्त
व्यमपतर्पणम् ३ लंघितस्य ततो युक्त्यालघ्वन्नमवचारयेत् पाचनंतर्पणं लेहः सर्पिषा विविधानि च ४
द्राक्षामधूककाश्मर्यसितायुक्तं विरेचनं षष्टीमधुकसंयुक्तं सक्षौद्रं वमनं हितं ५ पयांसि शीतानि रसाश्च
जांगलास्तीनयूषाश्च सशालिषष्टिका हितानि चैतानि च रक्तपित्ते चान्यान्यपि स्युः किलपित्तहानि ६ वृद्ध
त पक्वोदुंबरकाश्मर्याः पथ्याखर्ज्जूरगोस्तनी मधुनाहंति संलीढ रक्तपित्तं न संशयः ७ दूर्वा सोत्पलकिं

गुरोपक्वातस्मिन्नायःक्षिपेत्ततः उडुंबरसमान्कुर्याद्वटकोस्तान्यथोचितान् १८ उपभुंजीत तक्रेणसात्म्यं जीर्णेच
भोजनं मंडूरवटकाह्येतेप्राणदाःपांडुरोगिणां १९ इतिमंडूरवटकः धात्रीलोहरजोव्योषनिशाक्षौद्राज्यशर्करा
लेहोनिवारयत्याशुकामलामुद्धतामपि २० अंजनेकामलार्त्तानांद्रोणपुष्पीरसस्यतु निशागैरिकधात्रीणां
चूर्णांचोपरिमेलयेत् २१ दग्ध्वाक्षकाष्ठैर्मलमायसंचगोमूत्रनिर्वापितमष्टवारं विचूर्णयेल्लीढमधुनाचिरे
णकुंभाह्वयंपांडुगदंनिहन्यात् २२ अतिशुद्धमयोभस्ममधुक्षौद्रयुतंलिहेत् पांडुरोगस्यनाशायकामला
नांचसर्वशः २३ चंपकंचंदनंवारिपद्मंपौष्करपद्मकं मंजिष्ठातिविषामोचावासैंद्रयवपिप्पली २४ केसरं
धातकीपाठमुस्ताशुंठीचबिल्वजं उत्पलंदाडिमीबीजंजंबूबीजंत्वचामयं २५ एलाम्लचंदनंरक्तंमाषचूर्णं
रसांजनं तालीसंचसमांशानिशर्करांचचतुर्गुणां २६ हंतिडकेपांडुरोगप्रमेहारक्तपित्तके कासेश्वासेचहि
क्कायांमूत्रकृच्छ्रेचदाहके २७ इतिपंचकादिचूर्णम् पांडुरोगेकामलायांयान्युक्तान्यौषधानिच तानि
सर्वाणियोज्यानिरोगेचापिहलीमके २८ चंद्रांतयोगरत्नावल्यात् यवगोधूमशालीनांमुद्गजांगलजैः
रसैः मुद्गाढकीमसूराद्यैःप्रायोभोजनमिष्यते २९ अथरसः पलानिचत्वारिरसस्यपंच गंधस्यसत्व

कल्कं समगुडं शीतवारिपरिस्रुतं विरेचनं मुख्यतमं कामलाया विनाशकं ६ अयोरजोव्योषविडंगचूर्णं लिहे
द्धरिद्रां त्रिफलान्वितां वा सशर्करां कामलिनो त्रिभंडीहिलागवाक्षीसगुडाचवल्हुकी ७ दार्वीत्रिफलाव्यो
षविडंगम । यसोरजः मधुसर्पिर्युतं लिह्यात्पांडुरोगी सकामली ८ त्रिफलाया गुडूच्या वा दार्व्या निंबस्य
वा रसः पीतः प्रातर्मधुयुतं कामलार्तः पिबेन्नरः ९ वंदात् रसमामलकानां तु संशुद्धं यंत्रपीडितं द्रोणं
पचेत्तन्मृद्वग्नौ तत्र चेमानि दापयेत् १० चूर्णितं पिप्पलीप्रस्थं मधुकं द्विपलं तथा प्रस्थं गोस्तनिकाख्याश्च द्रा
क्षायाः कल्कपेषितं ११ श्रृंगवेरपलं पंच । तुगाक्षीर्याः पलद्वयं तुलार्द्धं शर्करायाश्च घनीभूतं समुद्धरेत्
१२ मधुप्रस्थसमायुक्तं लेहयेत्पलमात्रकं हलीमकं कामलां च पांडुत्वं चापकर्षति १३ जलदोषमतीसा
रं नियच्छति न संशयः इत्यामलकावलेहः सारसंग्रहात् अपरसः त्र्यूषणा त्रिफलामुस्तविडंगदहनास्स
माः नवायोरजसो भागास्तच्चूर्णं मधुसर्पिषा १४ भक्षयेत्पांडुहृद्रोगकुष्ठार्शःकामलापहं १५ नवायसं चू
र्णं योगसारात् त्र्यूषणं त्रिफलामुस्तं विडंगं चव्यचित्रकौ दार्वीग्निमाक्षिको धातुर्ग्रंथिकं देवदारु च ए
षां द्विपलभागानां चूर्णं कृत्वा पृथक् पृथक् मंडूरं द्विगुणं चूर्णाज्जीर्णं मंजनसन्निभं १७ गोमूत्रेऽष्ट

गोमूत्रेणातिसूक्ष्मकः ९ कृतपीतकटुतैलेन योगोयं कृमिनिवारणः १० सविडंगं च शिलया सिद्धं सुरभी
जलेन कटुतैलं निखिलान य तिविनाशं लिक्षासहिता दिनैर्यूकाः ११ इति विडंगादितैलं रसेंद्रेण स
मा युक्तो रसो धत्तूरपत्रजः तांबूलपत्रजो वापि लेपनं यो कृनाशनं इति रसादिलेपः वृंदात अपर
सः क्रमेणाद्धं रसगंधकाजमोदाविडंगं विषमुष्टिका च पलाशबीजं च विचूर्ण्य मस्य निष्कप्रमाणं म
धुनावलीढं पिबेत्कषायं घ्रतमेन तद्वर्ध्व रसोयमुक्तः कृमिमुद्गराख्यः कृमिन्निहंति कृमिजांश्च रोगान्सं।
दीपयत्यग्निमयं त्रिरात्रात १२ रसरत्नप्रदीपात ः॥ः इति योगतरंगिण्यां कृमिचिकित्साकथनं नाम त्रयो
विंशस्तरंगः ॥ अथ पांडुः पांडुरः श्वासकासार्त्तः पीतत्वङ्नखलोचनः वन्ह्यग्निसारः श्वयथुसहि निंब
तः पांडुरोगवान १ रसरत्नप्रदीपात फलत्रिकामृतावासातिक्ताभूनिंबनिंबजैः क्वाथः क्षौद्रयुतो हन्यात्पां
डुरोगं सकामलं २ लोहपात्रे सृतं क्षीरं सप्ताहं पथ्यभोजिनः पिबेत्पांडुरामयी सोपि ग्रहणीदोषपीडितः
३ वृंदात लोहचूर्णं निशायुग्मं त्रिफलाकटुरोहिणी प्रलिह्यान्मधुसर्पिर्भ्यां कामलार्तः सुखी भवेत ४
सर्वमेव प्रहात रेचनं कामलार्तानां प्रयुक्त्वा कारयेद्भिषक् ततः प्रशमनोपायः कर्तव्यो बुद्धिपूर्वकं ५ देवी रामः

तेद्दछतरंसमर्द्यमुन्याह्वैके मिद्धोवह्नमितोग्निदीप्तिक्तदयंचंगग्निनामारसः ॥१२ उद्गारस्पुद्धिमुत्साहोवेगोल
गौयथोचितः लघुताक्षुत्पिपासाचजीर्णाहारस्पलक्षणं ॥१३ ॥ इतियोगतरंगिण्यांअजीर्णचिकित्साकथ
नेनामद्वाविंशस्तरंगः ॥ अथक्रमिः ज्वरोविवर्णताशूलंहृद्रोगःश्वसनंभ्रमः भक्तद्वेषोतिसारश्चसंजात
क्रमिलक्षणं १ इतिकृमिनिश्चयात मुस्ताखुकर्णीफलदारुशिग्रुक्वाथःसकृष्णाक्रमिशत्रुकल्कः मार्गद्वये
नापिचिरप्रवृत्तान्कृमीन्निहंतीकृमिजांश्चरोगान् २ योगशतात निंबाजमोदाजंतुघ्नंब्रह्मबीजंसचोरकं
सहिंगुकंसमगुणंसद्योजंतुविनाशनं ३ विशालायाःफलंपक्वंतप्तलोहोपरिक्षिपेत तद्धूमोदंतलग्नानांकी
टानांपातनोभवेत् ४ पारसीकयवानिकाःपीनापर्युषितवारिणाप्रातः गुदस्थर्वाक्रमिजालंकोष्ठगतंपातय
त्याशु ५ पालासबीजस्यरसंपिबेद्वामधुसंयुतं लिह्यात्तक्षौद्रेणवैडं गंचूर्णंवाक्रमिकंतनं ६ दाडिमत्वकृ
तक्वाथस्तिलतैलेनसंयुतः त्रिदिनात्पातयत्येवकोष्ठतःक्रमिजालकं ७ ककुभकुसुमंविडंगंल्लांगलीभ
ल्लातकंतथोशीरं श्रीवेष्टसर्जरसंचंदनमथकुष्ठ — मथमंदघ्यात ८ एषःसुगंधोधूपोमशाकक्रमी।
नांविनाशकःप्रोक्तः शय्यासुमत्कुणानांशिरसिचगात्रेषुयूकानां ९ राजमार्तंडात भंडीपिष्टारनालेन

अतःपरतरंनास्तिधन्वंतरिमतेस्थितं इतिपाशुपतास्त्रोरसः धन्वंतरिमतात २०रंदंचविषंगंधंत्रिकटुत्रिफलासमं
जातीफलंलवंगंचलवणानिचपंचवै २१ सर्वमेतत्कृतंचूर्णमम्लयोगेनसप्तधा भावयित्वावटीकार्यागुंजार्द्ध
प्रमिताबुधैः २२ रसोह्यादित्यसंज्ञोयमजीर्णक्षयकारकः भुक्तमात्रंपाचयतिजठरानलदीपनः २३ इत्यादि
त्यरसः रसस्सिंधोः सूतंगंधंविषंतुल्यंमर्दयेदार्द्रकद्रवैः अम्लपत्यचिंचापामार्गक्षाराक्षारौचटंकणं २४ जा
तीफलंलवंगंचत्रिकटुत्रिफलासमं शंखक्षारंत्रिलवणंहिंगुजीरंद्विभागकं २५ मर्दयेदम्लयोगेनगुंजामा
त्रावटीशुभा पाचनीदीपनीसद्यो - जीर्णाम्लविसूचिकाः २६ हिक्कांगुल्मंचमोहंचनाशयेन्नात्रसंशयः
रसेंद्रसंहितायाश्चनाम्नाह्यग्निमुखोरसः २७ इत्यग्निमुखोरसः शुद्धंसूतंगंधकंचपलमानेपृथक्पृ
थक् हरीतकीचद्विपलानागरंत्रिपलंस्मृतं २८ कृष्णाचमरिचंतद्वत्सिंधूत्थंत्रिपलंमतं चतुःपलाचवि
जयामर्दयेन्निंबुकद्रवैः २९ प्रदानिसप्तदेयानिघर्ममध्येपुनःपुनः अजीर्णारिरसंप्रोक्तः सद्योदीपनः
पाचनः ३० भक्षयेद्दिगुणंभक्ष्यंपाचयेद्रेचयत्यपि ३१ इत्यजीर्णारिरसः रसेंद्रचिंतामतेः शुंठीपारद
गंधकाम्लतपटुश्रीपुष्पसंहैकणांक्षिद्विःशंखकपर्दकौवत्सगुणंकृष्णोषणंसद्रसात जंबीरस्यपरिप्लु

दौ द्वौ शंखवराटयोः ६८ पक्वजंबीरजैर्गाढं रसैः सप्तविभावयेत् गुंजाद्वयमितो देयो रसो ह्यग्निकुमारकः
६९ समीरणासमुद्भूतमजीर्णं च विसूचिकां क्षणेन क्षिपयत्येष कफरोगनिकृंतनः ७० इत्यग्निकुमा
रो रसः रसेंद्रचिंतामणेः हंसांघ्रिटंकणमरीचकणाम्लतं च जंबीरनीरपरिमर्दितमर्कयामं स्यानंदभैरव
गुटी त्रियवप्रमाणा सर्वामयप्रशमनी विविधानुपानात् ७१ कर्षं सूतं द्विधा गंधं त्रिभागं भस्मतीक्ष्णजं
त्रिभिः समं विषं योज्यं चित्रकद्रवभावितं ७२ द्विधा त्रिकटुकं योज्यं लवंगैलेतु सप्तमे जातीफलं जातिपत्रं चा
ष्टभागमितं मतं ७३ तदर्धं पंचलवणं स्नुह्यर्कौ चापि तिंतिणी अपामार्गोश्वत्थ एषां लवणं चपलाष्टकं
७४ टंकणं च यवक्षारं स्वर्जिका हिंगु जीरकं हरीतकीसूतं तुल्यामर्दयेदम्लयोगतः ७५ धूर्तबीजस्य भस्मा
नि सर्वं सप्तमभागतः रसः पाशुपतो नाम प्रोक्तः प्रत्ययकारकः ७६ गुंजामात्रा वटी कार्या सर्वाजीर्णविना
शिनी तालमूलीतक्रयोगाद्दुरामयनाशिनी ७७ मोचारसेनातिसारं ग्रहणीं तक्रसैंधवैः अम्लेनागर
कं शस्तं हिंगुसौवर्चलान्वितं ७८ अर्शः सुतक्रेण गुडात् पिप्पली राजयक्ष्माणं वातरोगं निहंत्याशु शुंठीसौ
वर्चलान्विता ७९ गुडूचीशर्करायोगात् पित्तरोगविनाशिनी पिप्पलीक्षौद्रयोगेन श्लेष्मरोगं निकृंतति ८०

याश्चकर्षैकेकदि कर्षैस्तुल्यवेगतः एतत्सर्वं समासाद्य अम्लद्रावैश्च मर्दितं शुभम् ५६ भावयेदम्लयोगेन सप्तधा तु
प्रयत्नतः रसः शंखवटीनाम्ना सेवितः सर्वरोगजित् ५७ गुंजामात्रमिदं खादेद्वह्निदीपनपाचनं अजीर्णं वातसं
भूतं पित्तश्लेष्मभवं तथा ५८ विषूचीं शूलमानाहं हन्याद्वन्न संशयः ५९ इति शंखवटीरसाजीर्णे वात अथ भ
स्मकरोगनिदानचिकित्सा कफे क्षीणे यदा पित्तं स्वस्थाने मारुतानुगं तीव्रं प्रवर्द्धयेदग्निं तथा तं भस्मकं वदे
त् ६० तद्दाहश्वासमूर्छादीन् कृत्वैवात्यग्निसंभवान् पक्वान्नमाशु धात्वादीन् संक्षिप्रं नाशयेत्ततुन् ६१ तं भ
स्मकं गुरुस्निग्धसान्द्रमंडहिमस्थिरैः अन्नपानैर्नयेच्छांतिं पित्तघ्नैश्च विरेचनैः ६२ माहिषं दधि दुग्धं च माहिषं
भस्मकापहम् असकृत्पित्तहरणं पायसान्यस्य भोजनं ६३ कोलास्थिमज्जकल्कस्तु पीतो वा पुदकेन वा
वै अचिराद्विनिहंत्येष प्रयोगो भस्मकं नृणां ६४ नारीक्षीरेण संपिष्टां पिबेदौदुंबरत्वचं ताभ्यां वा पायसं
सिद्धं पिबेदत्यग्निशांतये ६५ सिततंदुलसितकरभीक्षीरेण पायसं सिद्धं भुक्त्वा घृतेन पुरुषो द्वादशादिवसा
दुभुक्षितो न भवेत् ६६ विदारीस्वरसक्षीरे पक्वे दशगुणे घृते माहिषं जीवनीयेन कल्केनात्यग्निनाशनम् ६
७ इति भस्मकरोगचिकित्सा अथ अजीर्णे पारदं च विषं गंधं टंकणं सममागतः मरिचस्याष्टभागाः स्युः

दर्व्यासंचालयन्मुहुः पलमात्ररसं सम्यक् दद्याज्जंबीरकस्य तु ४५ संचूर्ण्य पंचकोलोत्थैः कषायैः साम्लवेत
सैः भावना किल दातव्याः पंचाशन्मिताः पृथक् ४६ मरिचं टंकणचूर्णं तेन तुल्येन सह मेलयेत् तदर्धं कणलव
णं मरिचं सर्वतुल्यकं ४७ सप्तधा भावयेत्पश्चाच्चणकक्षारवारिणा ततः संशोध्य संपेष्य कूप्यां च जठरे
क्षिपेत् अस्य पथ्यं गुरु मांसानि गुरु भोज्यान्यनेकशः भुक्तानि कंठपर्यंतं चतुर्वल्लमितो रसः ४८ कटुम्ला
तक्रसहितः पीतमात्रो हि पाचयेत् पुनर्भोजयति क्षिप्रं का पुनर्मंदवह्निता ५० रसक्रव्यादनामायं प्रोक्तो
मंथानभैरवात् सिंहलक्षोणिपालस्य भूरिमांसप्रियस्य च ५१ दिष्टो ग्रामं समासाद्य भैरवानंदयो
गिना ॥ कुर्याद्दीपनमूर्ध्वजत्रुगदहृद्धामसंशोधनं तुंदस्थौल्यनिवर्हणो द्वेगेहरो मूलार्तिशूलापहः
गुल्मप्लीहविनाशको बहुरुजां विध्वंशनो वातहा वातव्याधिमहोदरापहरणः क्रव्यादनामा रसः ५२ इति
बृहत्क्रव्यादरसः मंथानभैरवात् चिंचाश्वत्थस्नुहीक्षारादपामार्गार्कजं तथा लवणं पंचसंगृह्य
ततो लवणपंचकं ५३ सैंधवाद्यं समादाय सर्वमेतत्पलद्वयं कर्षं कर्षं हिंगुगंधं रसं टंकणकं तथा ५४
हिंगुपिप्पलिशुंठीनां तथा मरिचजीरयोः द्वौ द्वौ कर्षौ प्रदायौ तथा द्वौ कर्षौ त्वक्चूर्णितः ५५ पलत्र

ग्नेः कावातोद्रावणोऽयनः गुल्मप्लीहोदरं शूलं मष्ठधापि विनाशयेत ३३ वैद्यजीवनहेतुश्च शंखद्रावरसो ह्ययं उ
तिशंखद्रावरसः अथ रसः शुद्धो रसः पलमितो द्विपलं गंधकं मतं पलार्द्धं लोहभस्मस्यात्ताम्रमर्द्धं पलं मा
तं ३४ सर्वं कज्जलिकीकृत्य लोहपात्रे विनिक्षिपेत वृहत्सामग्निं मृदु दद्याद्यथा गंधोन दह्यते ३५ गोमय
स्यालवालेतु पत्रेवातारिजं क्षिपेत स्थापयेच्च रसं तत्र पत्रं चोपरि निःक्षिपेत ३६ वस्त्रपूतं ततः कृत्वा लोह
पात्रे पुनः क्षिपेत पुनस्तत्तापयेद्वुल्यां मातुलुंगरसं ततः ३७ मानाच्छतपलं दद्यात्तं च कोलं तथैव च उ
कस्य चतुर्लोदत्वा शिक्षितं तच्च समुद्धरेत ३८ एकं तत्कोलकं कृत्वा तत्समं टंकणां मतं टंकणार्द्धं विषं दद्यात
मरिचं विषसम्मितं ३९ भावनाच त्रिकासा सैः सप्तदद्यात्क्षिचक्षणाः सिध्यत्येवं रसस्तेन रसं माषं दद्यात्म
कं ४० सैंधवं माषमात्रं तु तक्रेण सह पाययेत रसे क्रव्यादनामानं दद्यात्तं भोजनोपरि ४१ शीघ्रं तज्जा
रये दुक्तं पुनर्भोजनमाचरेत अनेन क्रमयोगेन सर्वव्याधिहरो रसः ४२ इति क्रव्यादरसः एतेरसार्ता
वात द्विपलं गंधकं शुद्धं द्रावयित्वा विनिःक्षिपेत पारदं पलमानं तु मृतशुल्वाय सी पुनः ४३ तोलमा
नेन संमिश्रा पंचांगुल दलेक्षिपेत ततो विचूर्ण्य यत्नेन लोहपात्रे विनिःक्षिपेत ४४ मृदुग्निना पचेत्तत्तु

विबंधजठरारोगान् वातानुलोमनिमिदं चूर्णं वैश्वानरस्मृतं २१ वृद्धवैश्वानरचूर्णं वृंदात सिंधूत्थपथ्यामग
धोद्भववह्निचूर्णं सुखोष्णेनांबुनापिबति यः खलु नष्टवह्निः तस्याभिषेनैसद्य एतेन वरेन वान्नं भस्मीभवत्यशितमात्रम
पिक्षणेन २२ इति लघुवैश्वानरचूर्णं योगरत्नावल्यात पिप्पलीपिप्पलीमूलं धान्यकं कृष्णजीरकं सैंधवं
चविडं चैव पत्रं तालीसकेसरान् २३ एषां द्विपालिकान्भागान्पंचसौवर्चलस्य च मरिचाजाजिशुंठीनामेकैकस्य प ३२
लं पलं २४ त्वगेलाचार्द्धभागः स्यात्सामुद्रात्कुडवद्वयं दाडिमात्कुडवं चैव द्विपलं चाम्लवेतसं २५ एतच्चूर्णीकृ
तं श्लक्ष्णां सुगंधममृतोपमं लवणं भास्करं नाम भास्करेण विनिर्मितं २६ श्लेष्मवातं वातगुल्मं शूलमंदाग्न्य
रोचकान् अन्यानपि निहंत्याशु रोगाल्लवणभास्करः २७ इति लवणभास्करचूर्णं अर्कस्नुहीतिलाश्वत्थचिंचा
पामार्गवह्निजं गृहीत्वा भस्म तस्मात्तु वस्त्रपूतं जलं हरेत २८ मृद्वग्निना पचेत्तत्तु यावल्लवणतां व्रजेत तत्तु ।
ल्यावेवसंख्याह्यौदोक्षारोटंकणं तथा २९ सामुद्रं वापिगोदंताकासीसं चापिसोरकं द्विगुणं पंचलवणं शं
खद्रावरसेनतु ३० काचकूप्यां विनिक्षिप्य सम्यग्न्हत्वम्लयोगतः संधितं सकलं चूर्णं वाहरणीयंत्रमुद्धरेत ३१
हुतं ते जो जलप्रस्थं स्वच्छं श्रवति तत्तदा सर्वान्धातून्द्रावयति वराटान्पिशं खकान् ३२ अजीर्णस्यापमेद्य

ज्याभ्यागुटिकाकार्या दद्याद्राईकजैरसैः १० एकामजीर्णगुल्मस्य देविसूच्यां च दापयेत् तिस्रो भुजंगदष्टस्य
चतस्रः सन्निपातिनः ११ गुटिका जीवनीनाम्ना संजीवयति मानवं इति संजीवनीगुटिका मातुलिंगजटाव्यो
षंनिशा बीजकं रंजकं कांजिकेनांजनं हन्याद्विसूचीमतिदारुणां १२ इति विसूचिकांजनं हिंगुभागो भवेदेको व
चाच द्विगुणा मता पिप्पली त्रिगुणा देया शृंगवेरं चतुर्गुणं १३ यवानी स्यात्पंचगुणा षड्गुणा च हरीतकी चि
त्रकं सप्तगुणितं कुष्ठं चाष्टगुणं मतं १४ एतद्वातहरं चूर्णं पीतमामप्रशांतये पिबेद्दध्ना मस्तुना वा सुरया कोष्ण
वारिणा १५ सोदावर्त्तमजीर्णं च प्लीहानमुदरं तथा अंगानि यस्य शीर्यंते विषं वा येन भक्षितं १६ चूर्णमग्नि
मुखं नाम्ना सर्वोपद्रवमाहरेत् १७ इत्यग्निमुखचूर्णं वीरसिंहावलोकनात् त्रिकटुकमजमोदा सैंधवं जी
रके द्वे समधरणानाष्टानामष्टमो हिंगुभागः प्रथमकवलभुक्तं सर्पिषा चूर्णमेतज्जनयति जठराग्निं वा
तरोगान्निहंति १८ इति हिंग्वाष्टकं मात्रिमं घस्य भागो द्वौ यवान्यास्तद्दैवतु भागास्त्रयो जमोदाया।
नागरं भागपंचकं १९ दशा द्वौ च हरीतक्याः सूक्ष्मचूर्णानि कारयेत् मस्त्वारनालतक्रेण सर्पिषोष्णोद
केन वा २० पीतं जयत्यामवातं गुल्मं हृद्वस्तिजान् गदान् प्लीहानं ग्रंथिमष्ठीलामानाहं गुदजानि च २

नसेव्यानिद्व्यारायशेर्युतैर्नरैः विनातक्रंसमगधंविनान्नेलघुपाकिच ५१ ॐ इतियोगतरंगिण्यांअशे
चिकित्साकथनं नामैकविंशस्तरंगः ॐ अथाजीर्णे प्रकृत्यारसशेषाद्यात्रिभिर्दोषैरपाकतः भवंतिषड
जीर्णानिवैषम्यादशनस्यच १ विबंधोतिप्रवृत्तिर्वाग्लानिर्मारुतमूढता अजीर्णलिंगंसामान्यंचविष्टंभो
गौरवभ्रमः २ संपश्यरक्षणांकार्यैविषमेवातनिग्रहः तीक्ष्णेपित्तप्रतीकारोमंदेश्लेष्मविशोधनं ३ व
चालवणतोयेनवांतिरामेप्रशस्यते धान्यनागरसिद्धंवातोयंदद्याद्विचक्षणः ४ आमाजीर्णप्रशमनं
शूलघ्नंवस्तिशोधनं विष्टंभेस्वेदनंकार्यंपेयंवालवणोदकं ५ रसशेषेदिवास्वापोलंघनंवमनंतथा व्या
यामप्रमदाध्ववाहनरतक्षीणानतीसारिणः शूलश्वासवतस्तृषामदमहाहिक्कामरुत्पीडितान् क्षीणान्
क्षीणकफान्शिशून्मदहतान्वृद्धान्रसाजीर्णिनोरात्रौजागरितान्नरान्निरशनान्कामंदिवास्वापयेत
त् ६ पथ्यापिप्पलिसंयुक्तंचूर्णंसौवर्चलेपिवेत् मधुनोष्णोदकेनाथमत्वादोषगतिंभिषक् ७ चतुर्विधम
जीर्णंनुमंदानलमथारुचि आध्मानंवातगुल्मंचशूलंचाशुविनाशयेत ८ विडंगंनागरंक्षारंपथ्याचा
ह्विविभीतकाः वचागुडूचीभल्लातंविषंचात्रप्रयोजयेत १० एतानिसमभागानिगोमूत्रेणैवपेषयेत गु

वल्यात् देवदालीकषायेणाशैाव्हमाचरतांन्नणां किंवातरूमसेवाभिः कृतः स्युर्गेदजांकुराः ५० तस्माद्योलोद्धन्नेके
चिदुर्न्नामध्रुंवधाजगुः तन्मेस्सरूंनपिवतांदुन्नोमश्रावणांकृतः ५१ अथरसः भागःशुद्धरसस्यभागयुगलं
गंधस्यलोहाभ्रयोः षड्भित्वाग्निदलोषणात्रयरजोदंतीचभागैःपृथक् पंचस्युःस्फुटटंकणस्यचय
वक्षारस्यसिंधूद्भवाः भागाःपंचगवांजलंसुविमलंद्वात्रिंशदेतत्पचेत् स्युरूदुग्धंचगवांजलावधिशनैःपिं
डीकृतेतन्नजेतदोमाषोगुडकीलकान्नजयाष्ठेदेकुठारोरसः ५२ अथश्रीकुठारोरसःरसरत्नप्रदीपात् शुद्धं
बलिरससमंस्तद्दृढविमर्द्यसर्पिःस्रुतेच्छिगुणावोल रजोविमिश्रं तावत्पचेद्द्रवतिलोहमयेचयावत्पात्रेक्षिपे
च्चकदलीदलयुग्ममध्ये ५३ जातोरसःपर्पटिकाभिधानस्समस्तदुर्नामकरोगनाशी संसेवितोवल्लचतु
ष्कमात्रस्त्रातेस्यपुंसोस्तत्वबद्धिकारी ५४ बोलबद्धरसः सूतंसतास्रलोहार्कविषंगंधंसमंसमं सर्वं
तुल्यांशभल्लातफलमेकत्रचूर्णयेत् ५५ द्रवैःशूरणकंदोत्थैःखल्वेमर्द्यंदिनत्रयं माषमात्रंलिहेद्दा
ज्यैरसाध्यार्शोविनाशयेत् ५६ रसोनित्योदितोनाम्नाह्यर्शोरोगकुलांतकः इतिनित्योदितरसः वे
गावरोधंस्त्रीयानंकटुकंचोत्कटाशनं यथास्वंदोषलंचान्नमर्शसःपरिवर्जयेत् ५७ पित्तश्लेति

धाविश्वोपकुल्याजटाभल्लातैश्चचतुष्पलैः र्द्विपलैके रेलालवंगोषधैः ४२ इत्येभिः सकलैर्गुडद्विगुणितैः कुर्याद्विष
ग्मोदकान्सैर्भुक्तैर्नॄणां भवंति गुदजाः नष्टाः सपांडुामयाः नो गुल्मग्रहणीगदोदररुजः कोष्ठे न शूलानि च श्वा
सश्लीपदशोफविद्रधियकृत्गंध्यर्बुदादीनि च ४३ इति श्वरणापिंडिका पथ्यारलस्य गुहणः पलपंचकं स्यादेकं
पलं च मरिचाद्दपिनीरकाच्च कृष्णातद्रुद्रवजटाच विकाग्निशुंठ्यः कृष्णादिपंचकमिदं पलतत्प्रवृद्धं ४४ एतैरत्ष्क
रपलाष्टकसंयुतैः स्यात्कं रुत्वरष्कर फलाद्विगुणाः प्रकल्प्यः स्याद्यावशूकककुडवार्द्धमतः समस्ता योजीगुडोद्विगु
णितो वटकीकृतश्च ४५ कांकायनेन मुनिनागदितः किलायं श्रेयस्करोरावटकोत्रगुदामयेषु स्यात्ताग्निशस्त्र
क्षपनैरपि येन सिद्धाः सिध्यंत्यनेन वटकेन गुदामयाले ४६ इति कांकायनवटकार्श्वकित्सातः सिधूत्यं देव
दाल्याश्च वीजं कांजिकपेषितं गुदांकुरान्प्रलेपेन पातयत्युत्त्वणानि च ४७ शुंठीकणामरिचनागदलत्वगे
लं चूर्णीकृतं क्रमविवर्द्धितमूर्द्धमं त्यात् खादेदिदं समसितं गुदजाग्निमांद्यगुल्मारुचिश्वसनकंठहृदामयेषु
४८ इति समशार्करचूर्णम् स्नागणः तष्करवहृशतकं गुडेन योमोदकमत्युदारकं अशोषदुर्नामकरोगगा
रवं करोति वह्निं सहसैव दारकं ४९ इति चतुःसमो मोदकः योगरत्ना

चरेत् उदावर्तविधानेनगाढविड्कानिचासकृत ३१ प्रवृत्तबहुलास्त्रारागिपित्तशोणितनाशनैः विड्विवंधेहितं
तक्रंयवानीविश्वसंयुतं ३२ नप्ररोहंतिगुदजाप्रायस्तक्रसमाहृताः तिलभल्लातकंपथ्यागुडश्चेतिसमांशकं ३३
दुर्नामश्वासकासघ्नंप्लीहपांडुज्वरापहं मरिचमहौषधचित्रकश्चूरणाभागायथोत्तरंद्विगुणाः सर्वसमोगुड
भागःसेव्योयंमोदकःप्रसिद्धफलकैः ३४ ज्वलनंज्वलयतिजाठरमुन्मूलयतिप्रश्लगुल्मगदान् निःशेष
यतिश्लीपदमर्शांसिनाशयत्याशु ३५ मल्लिप्रशोरणांकंदंपक्वाग्नौपुटपाकवत् अद्यात्सतैललवणांदुर्ना
मविनिवृत्तये ३६ नवनीततिलाभ्यासात्केसरनवनीतशर्कराभ्यासात दधिरससथिताभ्यासात्गुदजाः
शाम्यंतिरक्तवहाः ३७ शिरीषवीजंद्वौक्षारौलांगलीसैंधवंवचा स्नुहीक्षीरेणापिष्टानिगवांपित्तेनभाव
येत् ३८ अर्शांसिलेपयेत्तेनसप्तरात्रंपुनःपुनः लिप्तान्येतानिसर्वाणिविनश्यंतिनसंशयः ३९ यथास
र्वानिकुष्ठानिहतःखदिरवीजकौ तथाहर्शांसिसर्वाणिवृक्षकारुष्करोहतः ४० हरिद्रायाःप्रयोगेणप्र
मेहाइवषोडशः क्षाराग्निभ्यांनिवर्त्तंतेतथाहर्श्यागुदोद्भवाः ४१ वंशात भागाःषोडशवृहदारुसहितात
कंदात्कृतात्कर्कशादष्टौचित्रकमूलतश्चलुलिताःस्युस्तालमूलीयुतात तालीसत्रिफलाविडंगमगा

भाः १९ तेत्यर्थं दुष्टमुख्लं च गाढं विक्रु प्रपीडिताः स्रवंति सह सारक्तं तस्य चातिप्रवृत्तितः २० भेकाभः पीड्यते दुःखैः शोणि
तक्षयसंभवैः हीनवर्णो बलोत्साहो हतौजाः कलुषेंद्रियः विट्स्यावं कठिनं रू समधोवायुर्न गच्छति तनुचारुणाव
र्णो च फेनिलं चासृगर्शसां २२ बाह्यायां तु बलौ जातान्येक दोषोल्वणानि च अर्शांसि सुखसाध्यानि न चिरोत्पतितानि
च २३ द्वंद्वजानि द्वितीयायां बलौ यान्याश्रितानि च कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च २४ सहजानि त्रि
दोषाणि यानि चाभ्यंतरां बलिं जायंतेर्शांसि संश्रित्य तान्यसाध्यानि निर्दिशेत २५ हस्तादिसोफैर्हृत्पार्श्वशूलै
र्छर्दिज्वरादिभिः तृष्णयागुदपाकेन निहन्युर्गुदजा नरं २६ मेढ्रादिष्वपि जायंते दुर्नामानि नराणामिह तत्रार्श
सामुपदिशंति चतुःप्रकारमारोग्यमेकमगदैरपरं च शस्त्रैः क्षारेण चान्यदहनेन चतुर्थमित्यमित्यागमैक
तिनः किल सुश्रुताद्याः २७ स्याद्दोषधैर्यचिरजेष्वचिरोद्भवेषु क्षारेण चक्षतजपित्तसमुद्भवेषु स्थूलेषु वा न
कफजेषु नलेन शस्त्रैः सत्वाधिकस्य बलिनश्च समस्तचिकित्सा २८ इति चिकित्सा तः अर्शोतिसारग्रहणीविका
राः प्रायेण चान्योन्यनिदानभूताः सन्नेनले संति न संति दीप्ते रक्षेत दस्तेषु विशेषतोग्निं २९ यद्वायोरनुलो
म्याय यदग्निबलवृद्धये अन्नपानौषधं सर्वं तत्सेव्यं नित्यमर्शसैः ३० पित्तातिसारवद्भिन्नवर्चास्यर्शांस्युपा

शावक्रास्तीक्ष्णा विस्फुरिताननाः बिंबीकर्कंधुखर्जूरकर्पासीफलसंनिभाः ६ केचित्कदंबपुष्पाभाः केचित्सिद्धार्थकोप
माः शिरःपार्श्वांसकट्यूरुवंक्षणाभ्यधिकव्यथाः ७ क्षवथुर्ज्वरविष्टंभहृद्ग्रहारोचकप्रदाः तैरार्तोय्यथितं स्तोकं सश
ब्दं सप्रवाहिकं ८ रुक्फेनपिच्छानुगतं विड्बद्धमुपवेश्यते शुक्लत्वग्नखविण्मूत्रनेत्रवक्त्रः प्रजायते गुल्मप्लीहोदरा
ष्ठीलासंभवस्तत एव च पित्तोत्तरा नीलमुखाः रक्तपीतासितप्रभाः १० तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः शु
कजिह्वायकृत्पिंडजलौकावक्त्रसन्निभाः ११ दाहपाकज्वरस्वेदतृण्मूर्छारतिमोहदाः सोष्माणो द्रवनीलोष्ण
पीतरक्तामवर्चसः १२ यवमध्या हरित्पीता हारिद्रत्वग्नखादयः श्लेष्मोत्तराणा महामूला घना मंदरुजः सिताः
१३ उत्सन्नोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः पिच्छलाः स्तिमिताः श्लक्ष्णाः कंड्वाढ्याः स्पर्शनप्रियाः १४ करी
रपनसास्थ्याभास्तथा गोस्तनसन्निभाः वंक्षणानाहिनः पायुवस्तिनाभिविकर्षिणः १५ सकासश्वासहृल्लासा
सप्रसेकारुचिपीनसाः मेहकृ-छ्रशिरोजाड्यशिशिरज्वरकारिणः १६ क्लैब्याग्निमार्दवच्छर्दिरामप्रायविका
रदाः वसाभाः सकफप्रायाःपुरीषाः सप्रवाहिकाः १७ न स्रवंति न भिद्यंते पांडुस्निग्धत्वगादयः सर्वैः सर्वात्मका
न्याहुर्लक्षणैः सहजानि च १८ रक्तोल्बणा गुदे कीलाः पित्ताकृतिसमन्विताः वटप्ररोहसदृशा गुंजाविद्रुमसंनि

मन्युग्रंतनकंभुजाशीलितोजयति २३ वंशान शुद्धाहि फेनवलिसूतकपर्दभस्म हालाहलोषणाविश्वुद्धवर्णाबीजेः श्रमोधि
पंक्तिकरशोत्तधराष्ट विंशान्यंशैोर्विचूर्णितनतमैग्र्यहणीकपाटः वह्नेरस्यहंतिमधुनासहजीरकेणभुंक्तेतिसारमपिसंग्रहणी
मुग्र्यां श्रामंविपाच्यसहसाजनयत्यवश्यंवैश्वानरंजठरवर्तिनमर्तिभाजः २५ इतिग्रहणीकपाटः रसेन्द्रगंधातिविषा
भयाभ्रंक्षारत्रयंमोचरसोवचाच जयाचजेबीररसेनपिष्टःपिंडीकृतःस्यात्ग्रहणीकपाटः २६ तस्यार्द्धमाषंमधुनाप्र
भातेशंखकभस्माभियुतंनिहंति उग्रंग्रहण्यामयमग्निमांद्यंक्षेरणामयंश्वासमुरक्षतंच २७ इतिअपरोग्रहणीक
पाटः योगरत्नावलीतः पिछलानिकठोराणिगुरूण्यन्नानियानिच श्रामकंतिनसेव्यानिग्रहणीरोगिभिःक्वचित्
२८ इतियोगतरंगिण्यांग्रहणीचिकित्साकथनंनामविंशस्तरंगः ॥ अथार्शः पृथक्दोषैःसमस्तैश्चशोणि
तात्सहजानिच अर्शांसिषट्प्रकाराणिविंद्याद्गुदवलित्रये १ दोषास्त्वग्मांसमेदांसिसंदूष्यविविधाकृतीन् मां
सांकुरानपानादौकुर्वंत्यर्शांसितान्जगुः २ विष्टंभोन्नस्यदौर्बल्यंकुक्षेराटोपएवच कार्श्यमुद्गारबाहुल्यंस
क्थिसादोल्पविड्कता ३ ग्रहणीदोषपांड्वर्तेराशंकाचोदरस्यच पूर्वरूपाणिनिर्दिष्टान्यर्शसामभिवृद्धये ४
गुदांकुराबहुतिलाःशुष्काश्चिमिच्चिमान्विताः म्लानाःश्यावारुणास्तब्धाःविषमाःपरुषाःखराः ५ मिथोविसदृ

सर्वाणिदद्याद्भृंगीचनावतीं सर्वचूर्णसमादेयाशर्कराचभिषग्वरैः १५ कर्षमात्रंततःखादेन्मधुनाप्लावितंसु
धीः अस्यप्रभावाद्ग्रहणीकासश्वासार्शरुचिक्षयाः १६ वातश्लेष्मप्रतिश्यायाः प्रशमंयांतिवेगतः इतीजा
तीफलादिचूर्णं तालीसोषणतुगाषड्दूषणानिशाबिल्वाजमोदासटीचातुर्जातलवंगधातुकिदिषाजातीफलं
दीपकं पाठामोचरसाश्चपंचलवणाजातीद्वयंबेलकंवृक्षाम्लाम्लवरापलासततरुजंमांशयंभुरंवालकं १७ श्री
अम्लसुवर्चलादहपदीकुष्ठंसमस्तंसमं वल्यासर्वसमाजयाखिलसमामत्स्यंडिकावासिता चूर्णोयंग्रहणीक्षया
दिकसनश्वासारुचिप्लीहरुक्दुर्नामानिरतिज्वरार्तिपवनस्थौल्यप्रमेहप्रणुत १८ तीव्रापस्मृतिपांडुगुल्मजठरश्ले
ष्मोत्थपित्तोद्भवोन्माद्ध्वंसविधायकोविजयतेसर्वामयध्वंशकः बालानांचविशेषतोहितकरः सुस्पष्टवाणी
प्रदः पुष्ट्यायुर्बलकांतिधीस्मृतिमहामेधाविलासप्रदः १९ इतितालीसाद्यंचूर्णं चित्रकंपिप्पलीमूलंद्वौक्षारौ
लवणानिच व्योषहिंग्वजमोदाचचव्यंचैकत्रकारयेत् २० गुटिकामातुलुंगस्यदाडिमस्यरसेनवा कृता
विपाचयत्यामंदीपयत्याशुचानलं २१ इतिचित्रकादिगुटिका ग्रहणीरोगिणास्तक्रंसेव्याहितलघुदीपनं प
थ्यंमधुरयाक्षित्वाच्चपित्तप्रकोपनं २२ श्रीफलशलाटुकल्कोनागरचूर्णेनमिश्रितःसगुडः ग्रहणीगद

अतीसारोक्तविधिनातस्यामंचविरेचयेत् ७ ॐदात विश्वादिभिः सहजिपाचनमत्रयास्तंमुस्तादिभिर्भवतिसं
ग्रहणीततश्च स्याद्दीपनंतस्तुचग्रहणीविकारेकल्याणकादिभिरितिग्रहणीचिकित्सा ८ पाठाधान्य
यवान्यजाजिहपुषाचव्याग्निसिंधूद्भवैःसमेयस्यनमोदकीदशिभिःकणाजगासंयुतैः सव्योषैःसफलत्रिके
स्सगुडिभिस्त्वग्पत्रकैरौषधैरित्यज्ञप्रमितैस्सतैलकुडवैःसाष्टत्वन्मुष्टिभिः ९ एतैरामलकीरसस्यतुलया
सार्द्धतुलार्द्धगुडात्पक्कव्यंभिषजावलेहवद्दयंप्राग्भोजनाद्भक्षितः येकेविड्ग्रहणीगदाःसगुदजाःकासाःस
शोषामयाःसश्वासश्वपथुस्वरोदरहृजःकल्याणकस्ताञ्जयेत् १० इतिकल्याणकावलेहः त्रिकंशोतक्को
प्यठिकुडवपटोषष्टिरभयापश्चाशस्थ्यीःसार्द्धघृततिलजसंख्यग्निकुडवैः समावाप्याजाजीमरिचपला।
दीप्यकपलंलिहन्नेताहंतिग्रहणीमनलंदीपयतिच ११ इतितक्रहरीतकीॐदात भूनिंबकौटजकटुत्रिक
मुस्तातिक्ताकर्षांशकाःसशिखिमूलपिच्छुद्ययास्युः त्वक्कोटजीपलचतुष्टमितागुडोभःपीतंन्नणामपिहरेद्ग्र
हणीविकारान् १२ चिकित्साकः जातीफललवंगैलापत्रत्वङ्नागकेसरैः कर्पूरचंदनतिलत्वगक्षीरीतगराम
लैः १३ तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः श्रुंठीविडंगमरिचैःसमभागैर्विचूर्णितैः १४ यावंत्येतानि

लीं अक्षोन्मूषणानत्र्य पंचलवणोसार्द्धं त्रिकर्षपथ्य कृत छुक्रासनचूर्णा तुल्यनिहतं तत्सर्वमेकी भूतं ४२ खादे
च्छारणमितंसकांजिकपलेमंदाग्न्यतीसारजित इतिल्वाईचूर्णं शाप्योक्तास्त्रयाग्नित्रिकटुगजकणा चेलभ
ल्लीतकोग्राहंजीरेहिंगुकुष्ठाबिल्वपटुरसगंधाभ्रधूमोत्तमाश्च एतेषां तुल्यमंगं रजउदितमतीसारस्थूल
ग्रहन्यानाहश्रीहप्रमेहानलहति बृहत्स्वाईचूर्णंप्रशस्तं ४३ इति बृहत्स्वाईचूर्णं योगरत्नावलीतः स्ना
नावगाहमभ्यंगं गुरुस्निग्धान्नभोजनं व्यायाममग्निसंतापमतीसारीविवर्जयेत ४४ वंदात ॐ इतियो
गतरंगिण्यां अतीसारचिकित्साकथनंनामऊनविंशस्तरंगः ॐ अथसंग्रहणी अतीसारेनिवृत्तेपिमं
दाग्नेरहिताशिनः भूयः संदूषितोवह्निर्ग्रहणीमपिदूषयेत १ एकैकशः सर्वशश्चदोषैरत्यर्थमूर्च्छितैः
सादुष्टाबहुशोभुक्तमाममेवविमुंचति २ पक्वंवा सस्रंजं पूतिमुहुर्बद्धंमुहुर्द्रवं ग्रहणीरोगमाहुस्तमायुर्वेदवि
दोजनाः ३ षष्ठीपित्तधरानामयाकलापरिकीर्तिता पक्वामाशयमध्यस्थाग्रहणीतांविदुर्बुधाः ४ उक्तंच
अथामसंचयादेवजायतेग्रहणीगदः क्वचिद्दामंक्वचित्पक्वंसार्पतेविद्रूसरुक्द्रवं ५ पक्षाद्वाद्वादशाहाद्वावि
शतेर्वाप्यनन्तरं मासाद्वापिभवेत्कोपोग्रहणीरुजिमानवे ६ ग्रहणीमाश्रितंदोषमजीर्णवदुपाचरेत।

सितं क्षौद्रेण संयुतं पक्वापक्वम तीसारं नानावर्णं सवेदनं ३० दुर्वारं ग्रहणीरोगं जयेच्चैव प्रवाहिकां इति
कुटजावलेहः कुटजस्य पलं ग्राह्यमष्टभागावशेषितं तथैव विपचेद्भूयो दाडिमोदकसंयुतं ३१ कुटजक्वाथ
तुल्योत्र दाडिमस्य रसो मतः यावल्लेपसिकाभासंस्यात्तं तमुपकल्पयेत ३२ तस्यार्द्धकर्षं तक्रेणापिवेद्दत्का
तिसारवान् अवस्य मरणीयोपि मत्यो याति न गोचरं ३३ इति लघुकुटजावलेहः यवानी पिप्पली मू
लचातुर्जातकनागरैः मरिचाग्निजलाजाजीधान्यसौवर्चलैः समैः ३४ वृक्षाम्लधातकीकृष्णाबिल्वदाडि
मदीप्यकैः त्रिगुणैः षड्गुणसितैः कपित्थाष्टगुणीकृतैः ३५ चूर्णोतिसारग्रहणीक्षयगुल्मगलामयान् का
सश्वासारुचिहिक्कां कपित्थाष्टमिदं जयेत ३६ इति कपित्थाष्टकं यथाश्रृतं भवेद्दाविनथातीसारनाश।
नं अतीसारं निहंत्येव सप्तभागश्रृतं जले ३७ यथास्तेन तथा क्षीरमतीसारे प्रपूजितं चिरोत्थितेषु तत्पेयं।
त्रिभागजलसाधितं ३८ आमलेतं निरामे स्यात्सामे तीसारकेविषं स्तंगंधं त्रिकटुकं दीप्यकं जीरकं द्व
यं ३९ सौवर्चलं सैंधवं तु रामठं विडमेव च शाक्रासनस्य चूर्णं तु चूर्णतुल्यं प्रदापयेत संग्रहं शूलमा
नाहं हन्यान्नानातिसारजित ४१ इति क्षाईचूर्णं अथ रसः कर्षं गंधक मर्द्द पारदमुभौ कुर्यात्कुम्भां कज्ज

न्यकमेवच समंगाधातकीलोध्रंबिल्वंपाठ्चनदीपनं १९ हंत्यरोचकपिछामंविवंधंसातिवेदनं सशोणित
मतीसारसज्वरंवापिविज्वरं २० अवेदनंसुसंपक्वंदीप्ताग्नेःसुचिरोत्थितं नानावर्णमतीसारंपुटपाकैरुपा
चरेत् २१ स्निग्धंघनंकुटजकल्कमजंतुजग्धमादायतत्क्षणमतीवचपेसयित्वा जंबूपलाशपुटतंडुल
तोयसिक्तंबद्धंकुशेनचबहिर्घनपंकलिप्तं २२ सुस्विन्नमेतदुपपीड्यरसंगृहीत्वाक्षौद्रेणयुक्तमतिसारवतेप्र
दद्यात् कृष्णात्रिपुत्रमतपूजितएषयोगःसर्वातिसारशमनेस्वयमेवराजा २३ वंगात् श्रीपर्णीपर्णावृत्ता।
दीर्घवृंतजत्वक्पीडकातंडुलवारिकल्कितात् म्रेडिष्ठितारग्निविपाचिताद्रसंपिबेदतीसारहरंसमाक्षिकं २४
इत्युक्तयाकल्पनयावटादिनाकल्कीकृतेनादरगेणतित्तिरे प्रकल्पितःस्यात्पुटपाकजोरसःसशर्करः।
क्षौद्रयुतोतिसारजित् २५ इतिचिकित्सातः कासमर्दकजंमूलंपिष्टंतंडुलवारिणा दीयतेपलकामात्रा
व्याघ्रवालातिसारिणी २६ प्रपचेत्सर्पिषापथ्यालोतपात्रेतियंत्रतः शिशिरासाप्रदातव्याचातिसारिणि
दुर्बले २७ पलंकुटजमूलस्यक्षुसंतोयार्मरोचैःपेत् क्वाथेपादावशेषेस्मिन्पूतेलेहंपुनःपचेत् २८ सौ
वर्चलयवक्षारविडसैंधवपिप्पली धातकीइन्द्रयवाजाजीचूर्णंदत्वापलद्वये २९ लिह्याद्दरमात्रंवं।

नानियस्यैवे लाघवंचविशेषेणतस्यपक्कंविनिर्दिशेत ८ शोथंशूलंज्वरंतृष्णांश्वासंकासमरोचकं छर्द्दिमू
र्छांचहिक्कांच दृष्ट्वातीसारिणांत्यजेत १० सास्रक्तगुह्यगुदवंक्षणावस्तिशूलमामातिसारमनिलप्रतिबद्धवि
ट्कं दोषानुरूपविहितैरिहलंघनाद्यैःपेयादिभिस्तमवलोक्यभिषक्चिकित्स्येत प्राक्पंचकोलकजलप्लुतनां
डुलाभिःपेयाभिरप्यथयथकूलखुलाजमण्डैः ११ ह्रीबेरैर्मधुरदामेडियप्रयुक्तैरामातिसारशमनैहृपरिप
थ्यैः १२ मुस्तमोचरसलोध्रधातुकीपुष्पविल्वगिरिकौटजैःसमैः चूर्णितैःसगुडतक्रसेवितैर्न्निम्ना
गाजलरयोपिरुध्यते १३ इतिगंगाधरचूर्णं विश्वाभयाघनवचातिविषामराह्वाधान्यविश्वजलदाति
विषास्तोवा आमातिसारशमनःकथितःकषायोश्रुंठीघनप्रतिविषामृतवल्लिजोवा १४ सहरीतकीप्र
तिविषारुचकंसवचंसहिंगुसकलिंगयवं इतिपत्कलिंगयवषट्कमिदंहृतिरातिसारगुदशूलहरं १५
इतिचिकित्साकलिकातः गुडूच्यतिविषाधान्यशुंठीविल्वाब्दवालकैः पाठाभूनिंबकुटजैश्चन्दनोशी
रपद्मकैः १६ कषायःशीतलःपेयोज्वरातीसारशांतये हृल्लासारोचकच्छर्दिपिपासादाहनाशनं १७ उत्प
लंदाडिमत्वक्च पद्मकेशरमेवच पिबेत्तंडुलतोयेनज्वरातीसारशांतये १८ उशीरंबालकंमुस्तंविल्वंधा।

तिदिश्चात्रमाख्यातं ज्वराणां हि चिकित्सितं सप्रत्ययं सानुभवं संप्रदायाद्गुरोरिह २०२ ॐ इति श्रीयोगतरंगि
ण्यां ज्वरचिकित्साकथनं नामाष्टादशः सर्गः ॐ अथातीसारचिकित्सा संशम्यापां धातुरग्निं प्रवृद्धो वर्चो
मिश्रो वायुनाधः प्रणुन्नः सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदंति १ एकैकशः सर्वशश्चापि दो
षैः शोकेनान्यः षष्ठ आमेन युक्तः हृन्नाभिपायूदरकुक्षितोदगात्रावसादानिलसंन्निरोधाः २ विड्संगा
माध्मानमथाविपाको भविष्यतस्तस्य पुरःसराणि अरुणं सफेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः ३ कृशोद्य
मं सरुक्शकृद्मारुतेनातिसर्प्यते पित्तात्पीतं नीलमालोहितं वातस्थाम तृष्मूर्छादाहपाकोपपन्नं शुक्लं सांद्रं
कफं श्लेष्मदुष्टं विस्रं शीतं हृष्टरोमा मनुष्यः ४ तैस्तैर्भावैः शोचतोल्पाशनस्य बाष्पोष्मा वै वह्निमाविश्य
जंतोः कोष्ठं गत्वा क्षोभयेत्तस्य रक्तं तच्चाधस्तात्काकणंतीप्रकाशं ५ निर्गच्छेद्वै विड्विमिश्रं त्वविड्वापि
गंधं वागंधं वातिसारः शोकोत्पन्नो दुश्चिकित्स्योतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः ६ तंशायुक्तो मो।
हमासाद्य शोषी वर्द्धः कुर्यान्नेकरूपं तथार्तः सर्वोद्भूते सर्वलिंगोपपत्तिः कष्टोपायः प्रोक्त एषोत्रनूनं ७
संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्ववसीदति पुरीषं भृशदुर्गंधि पिच्छलं चामसंज्ञितं ८ एतान्येव तु लिंगानि विपरी

१९० शालिपर्णीपृष्ठिपर्णीविडंगंतगरंतथा चित्रकोदेव ॥ काष्ठंचचव्यंपत्रंपटोलजं १९१ जीवकर्षभकौचैव।
लवंगेवंशलोचने पुंडरीकंचकाकोल्योपत्रकंजातिपत्रकं १९२ तालीशपत्रंचतथासमभागानिचूर्णयेत
सर्वचूर्णस्यचार्धांशंकैरातंप्रक्षिपेत्सुधीः १९३ एतत्सुदर्शनंनामचूर्णंदोषत्रयापहं ज्वरांश्चनिखिला
न्हन्यान्नात्रकार्याविचारणा १९४ पृथक्द्वंद्वागंतुजांश्चधातुस्थान्विषमज्वरान सन्निपातोद्भवांश्चापि
मानसानपिनाशयेत १९५ शीतज्वरंत्रिदोषादीन्मोहंतंद्रांत्रषांतथा श्वासंकासंचपांडुंचहृद्रोगंहंतिकामा।
लां १९६ त्रिकपृष्ठकटीवातपार्श्वशूलनिवारणं शीतांबुनापिवेद्धीमांसर्वज्वरनिवारणं १९७ सुदर्शनं
यथाचक्रंदानवानांविनाशने तथासर्वज्वराणांचचूर्णमेतद्विनाशने १९८ इतिसुदर्शनचूर्णं चूर्णंषोडश
कुंजराब्धिनयनक्ष्मामानभाजःसितावंशीमागधिकात्रुटित्वचइक्षोद्राज्ययुक्तंप्रगे लीढंहंतिसितोपलादि
कमिदंसर्वांगदाहंक्षयंपार्श्वार्तिज्वरवातपित्तकसनश्वासाग्निमांद्यारुचिः १९९ इतिसितोपलाद्यंचूर्णं
कट्फलंमुस्तकंतिक्तासटीशृंगीचपौष्करं मधुनाचूर्णमेतेषांशृंगवेररसेनवा २०० लिहेज्वरहरंकंठ्यं
कासश्वासारुचिछर्दिं वायुछर्दितथाश्लेष्मक्षयंचैवव्यपोहति २०१ इतिकट्फलादिचूर्णंशार्ङ्गधरात ३

लोध्रकट्फलमंजिष्ठामुस्तकेसरपद्मकैः चंदनोत्पलयष्ट्याकैस्तैलंगंडूषधारणात् १९१ दंतरोगाःप्रणश्यं
ति लेपात्सर्वेज्वरान्जयेत् एतल्लाक्षादिकंतैलंबलपुष्टिप्रदीप्तिदं १९२ इतिलाक्षाद्यंतैलं लाक्षामधुकमं
जिष्ठामूर्वाचंदनशारिवा तैलंषड्गुणोनामचाभ्यंगाज्ज्वरनाशनम् इतिषड्गुणंतैलं द्राक्षामूर्वाहरिद्रे
द्वेमंजिष्ठाचेन्द्रवारुणी हैवेतीसैंधवंकुष्ठंरास्नामांसीशतावरी १९४ आरनालाढकेनात्रतैलंप्रस्थंविपा
चयेत् तैलमंगारकंनाम सर्वज्वरविमोक्षणो १९५ इत्यंगारकतैलंबृहत् अथज्वरहराणिचूर्णानि धा
त्रीशिवासैंधवचित्रकाणांकणायुतानांसमभागचूर्णं जीर्णज्वरारोचकवह्निमांद्येसविड्ग्रहेशास्त
मितिप्रतिज्ञा १९६ इत्यामलक्यादिचूर्णं तालीसोषणाविश्वपिप्पलीतुगाःकर्षाभिवृद्धास्त्रुटिःकर्षार्धात्व
गपिप्रकामधवला द्वात्रिंशकर्षासिता तालीसाद्यमिदंसुचूर्णमरुचावाध्मानमेदानलश्वासच्छर्दिति
सारशोषकसनप्लीहज्वरेशस्यते १९७ इतितालीसाद्यंचूर्णं त्रिफलारजनीयुग्मंकंटकारीयुगंशटी त्रि
कटुग्रंथिकंमूर्वागुडूचीधन्वयासकः १९८ कटुकापर्पटंमुस्तंत्रायमाणोचवालकं निंबंपुष्करमूलंचम
धुयष्टीचवत्सकः १९९ यवानीद्वययवाभार्गीशिग्रुबीजंसुराष्ट्रजाः स्वात्वक्पद्मकोशीरस्वचंदनातिविषाबला

मिचयंमर्दयेत्तावद्देवगुंजामात्रामधुचपलयासर्वरोगेवसंतः १६९ जीर्णज्वरेधातुगतेतिसारेरक्तान्वितेरक्तजवि
षरोगे घोरव्यथेपित्तभवेविकारेवल्लद्वयंदुग्धयुतंचपथ्यं १७० बसंतोमालतीपूर्वःसर्वरोगहरःशिशोः गर्भिण्ये
देयमेतच्चजयंतीपुष्पकैर्युतं १७१ सर्वज्वरहरंश्रेष्ठंगर्भपालनमुत्तमं १७२ इतिवृहन्मालिनीवसंतः अथ
जीर्णज्वरतैलानि सुवर्चिकानागरकुष्टमूर्वालाक्षानिशालोहितयष्टिकाभिः तैलंज्वरेखंडुणतक्रसिद्धमा
भ्यंजनाच्छीतविदाहजुत्स्यात्दैध्नःससारकस्यस्यात्षट्तक्रेतक्रमुत्तमं इतिषट्तक्रतैलं अथाजभ्मतैला
क्षादितैलमुच्यते लाक्षाप्रस्थंकाथयित्वाचतुःप्रस्थमितेजले पादशेषंजलंनीत्वातैलप्रस्थेविनिक्षिपेत् ते मरोरफली
लाच्चतुर्गुणोमस्तुगोदध्नाश्चात्रनिःक्षिपेत १७५ शतपुष्पामश्वगंधांहरिद्रांदेवदारुच रेणुकांकटुकांमूर्वां
कुष्टंचमधुयष्टिकां १७६ मुस्तंचचंदनंरास्नांप्रत्येकंकर्षसंमितं कल्कीकृत्यक्षिपेत्तैलेततोमृद्वग्निनापा
चेत १७७ तस्याभ्यंगात्प्रणश्यंतिसर्वेपिविषमज्वराः कंडूशूलांगदौर्गंध्यमंगस्फोटादिकाजयेत १७८ इ
तिलाक्षादितैलं लाक्षाहरिद्रामंजिष्ठाकल्कैस्तैलंविपाचयेत षड्गुणेनारनालेनदाहशीतज्वरापहं १७९
लघुलाक्षादितैलं तैलंक्षीरंतंक्षीरंपथकप्रस्थंसमंपचेत चतुर्गुणेरितेक्वाथेद्रव्यैरेतैःपलोन्मितैः १८०

सतायोज्यामत्स्यपित्तेनभावयेत् १५९ त्रिदिनंमर्दयेत्तेनरसोयंचंद्रशेखरः क्षिगुंजामार्द्रकद्रावैर्देयोशीतोर्धंपुनः
१६० तक्रभक्तंचवृंताकंपथ्यंतत्रनिभापयेत् त्रिदिनात्श्लेष्मपित्तोत्थमत्युग्रंनाशयेज्ज्वरं १६१ चंद्रशेखरमन्यंतस्य।
नामोदकंमरी समेभ्योरसटंकेभ्योद्विगुणांजयपालकान् १६२ पिष्ट्वानवज्वरेदेयं वल्लंजंभांभसास्यच चिं
चाक्षारेणखंडेनशीतज्वरविनाशकृत् १६३ आध्मामामानिलहरः शिताग्रुडघ्रतोरसः अयंरसोपिसहसा
पुत्रस्यापिनकथ्यते १६४ शीतारिरसः सारसंग्रहात् तुत्थंटंकणंसूतंकंविषवलिंसत्ववर्परंतालकंचूर्णंख
ल्वतलेविमर्द्यगुटिकासत्कारवेलद्रवैः गुंजार्द्धप्रमिताचशुद्धसितयासापर्णाखंडेनवाएकद्वित्रिचतुर्थंक
ज्वरहरः शीतारिनामारसः इतिशीतारिनाम रसकयुगलभागंवह्निजंभागमेकं द्वितयमपिसुवल्वे।
मर्दयेमंक्षणोन भवतिघ्रतविमुक्तोनिंबनीरेणयावत्ज्वरहरमधुकल्पामालतीप्राग्वसंतः १६६ जी
र्णज्वरेधातुगतेतिसारेरक्तान्वितेरक्तजविषरोगे घोरव्यथेपित्तकृतेचदोषेवलप्रदोदुग्धघृतंचपथ्यं
१६७ प्रदरंनाशयत्याशुतथाद्दुर्नामशोणितं विषमंनेत्र▯रोगंचगजेंद्रमिवकेसरी १६८ इतिलघुमालती
वसंतः स्वर्णंमुक्तादरदमरिचंभागवृद्ध्याप्रयोज्यं खर्परयंशोमथमनवनीतेननिंबुनाच जावत्स्नेहोव्रजति

णोरसः रवेऽंशत्वा विषं शुल्वे सार्धं दुग्धेऽल्पभांडके सकांजिके सगरले क्षिप्त्वा ऊर्ध्वं निधापयेत १५१ सप्ताह
तः समुद्धृत्य श्लक्ष्णा चूर्णीकृतं चनत सूचिकाभरणो नाम रसो गुप्ततमो भुवि १५२ संज्ञानाशे विचेष्टे च वक्षः
कांजिकपेषितः भल्लरंध्रे प्रयोक्तव्यो महामोहप्रणाशनः १५३ इति सूचिकाभरणो रसः रसदरददिनेशं
फेनगंधेन युक्तं मुनिदिनमिति खल्वे विश्वतोयेन घृष्टं ज्वरहरमिह सूते वल्लमात्रप्रमाणं प्रथमजनिता
दाहं पाययेदार्द्रकेन १५४ इति सर्वज्वरहरो रसः पलं शुद्धं कुष्ठं पिचुयुगमितं सैंधवकणो तदर्धं प्रत्येकं क
रतरमिदं यातिफलकं कटौ तैलं पक्वं कुडवमित मग्नावधिसृतं तरेतच्छुश्रा घं शमयति विसूचीं श्वसग
दं १५५ इति विसूचिकायां शुश्रायां तैलं अष्टौ तालकमेतदर्धममलं शंबूकचूर्णं क्षिपेत्पश्चाद्दन्तनवां
शाकोवराशिरवी सर्वं पुनः पेषयेत् तोयैस्तस्य कुमारिकादलभवैः पक्वं गजाख्ये पुटे प्येकद्वित्रिचतुर्थशीत
हरणं शीतांकुशोयं रसः १५६ इति महाशीतज्वरांकुशः ज्वरं धातुगतं चित्तभ्रमं पित्तास्रजान् गदान्
रक्तातिसारमुग्रहणीदुर्नामाख्यान् विनाशयेत् गुंजाद्वयमितं दद्यात्सितया सह वारिणा सजीरकेन दध्यन्नं
पथ्यं शीतज्वरांकुशे १५८ पथ्यं दुग्धोदनं दध्योदनं वा शुद्धसूतसमं गंधं मरिचं टंकणं तथा चतुस्तुल्य

ल्मं तथा पांडुग्रहण्यर्शः कृमीन्जयेत् अजीर्णमामवातंच गुल्मोदरगदांस्तथा १४४ इतिविद्याधरोरसः शौ भोः
कंठविभूषणोसमरिचैर्दैत्येन्द्ररक्तं रसः पक्षोसागरलोचनेहिमरुचिर्भागैस्तथार्द्धौ रविः ख ▪ ल्वांतः खल्लमर्द
येद्रविजलैर्गुंजाप्रमाणोसितः प्रोक्तं ज्वरदंतिदर्पदलने पंचाननो सोरसः १४५ पथ्यंचदेयं दंभक्तं तक्रं सिंधु
त्थपथ्यासितयासमेतं गंधानुलेपो हिमतोयपानं दुग्धंचदेयं शुभम ꠰ दाडिमीच १४६ इतिरसमंजर्यात्पंचान
नोरसः शुद्धं सूतं विषं गंधं धूर्तबीजं त्रिभिःसमं चतुर्णां द्विगुणं व्योषं हेमक्षीरीविभावितं १४७ चतुर्वां रंध्र
मेकं पक्वं चूर्णं गुंजाद्वयोन्मितं जंबीरकस्यमज्जाभिरार्द्रकस्यरसेनवा १४८ महाज्वरांकुशोनामसमस्त
ज्वरनाशनः एकाहिकं द्व्याहिकं त्र्याहिकं चचतुर्थकं १४९ विषमं च त्रिदोषोत्थं हंतिसद्योनसंशयः इतिम
हाज्वरांकुशः सूतं गंधकमभ्रकं समलवं सूताद्दिभागं विषं तत्तुल्यं जयपालमम्लमथितं तत्ततोलकं वेष्टि
तं पंत्रेमेंजुभुजंगवल्लिजनितैर्निक्षिप्य खातेपुटं दत्वाकुक्कुटसंज्ञकं सह दलैः संचूर्ण्य तत्र क्षिपेत भा
गार्द्धं जयपालबीजममलं तत्तुल्यमेकीकृतं गुंजानागरसिंधुचित्रकयुतं सर्वज्वरान्नाशयेत १५० शूला
र्त्तं सेयहणीगदं सजठरं दध्यन्नसंसेविनां सर्वव्याधिवतां नराणां हिततमाश्चिंतामणिर्नामतः इतिचिंताम

नेने जीर्णज्वरे तथा जीर्णे सामे वा विषमे पिबा १३१ सर्वज्वरं निहंत्याशु दावो वनमिवानलः इति सर्वज्वरारिः
ऋषणां पंचलवणां शतपुष्पा द्विजीरकं क्षारत्रयं समानेन चूर्णमेषां पलत्रयं १३२ शुद्धं सूतं पलं भ्रंचा गंध
कं च पलं पलं आर्द्रकस्य रसैः खल्वे दिनमेकं विमर्दयेत १३३ वीरभद्रो रसः ख्यातो माषैकः सन्निपातजित्
चित्रकार्द्रकसिंधूत्थमनुपानं जलैः सह १३४ पथ्यं क्षीरोदनं देयं द्विवारं स्वरसो हितः १३५ इति सन्निपात ह
रो वीरभद्राख्यो रसः ब्रह्मास्त्रमथ वक्ष्यामि सद्यःप्रत्ययकारकं भस्मसूतं त्रिगंधं च तत्समं गरलं त्वहेः त्रि
भिः समं विषं योज्यं मरिचं सर्वतुल्यकं वराहकेकिमहिषपित्तैः सप्तविभावितं १३७ लांगल्या देवदाल्या च जं
लामुख्याईकद्रवैः एकविंशतिधा भाव्यं प्रत्येकं घर्मशोषितं १३८ द्विगुंजामात्रनस्येन मृतमुत्थापयेद्ध्रुवं
दध्यन्नं ससितं पथ्यमुपचाराश्च शीतलाः १३९ सर्वोदरगदघ्नोयमसाध्यमपि साधयेत अस्थिशूलानि स
र्वाणि नाशयत्येव सर्वथा १४० इति ब्रह्मास्त्रो रसः रसं गंधं विषं ताम्रं त्रिकटु त्रिफला तथा कटुका च ढेंते
दंती हेमाह्वा टंकणं विषं एतानि समभागानि सर्वांशं हंतिजं फलं चूर्णयित्वा तु तत्सम्यक् मर्दयेद्द्रविकांबु।
ना १४२ दंतीक्वाथैस्ततः सम्यग्वटीं टंकार्धमानतः विनोदविद्याधर इत्याख्यातं नाहराज्वरं १४३ शूलं गु

क्षाद्दृदं शरीरिणां मंदवेगौ बंधश्च स जे यो जीर्णतां गतः १२२ कासजीर्णज्वरश्वासहृत्पांडुकृमिरोगहृत् जी
र्णज्वरेऽग्निसादे च सस्यते गुडपिप्पली १२३ त्रिभिरथ परिवृद्धं पंचभिः सप्तभिर्वा दशभिरथ विवृद्धं पिप्पली
वर्द्धमानः इति पिबति पुनान्यक्तस्य नश्वासकासज्वरजठरगुदार्शोवातरक्तक्षयाः स्युः १२४ व्यंघात ऊर्णा
नाभिस्य जालेन कर्णे लग्नं ग्राहयेत्ततः अंजयेन्नेत्रयुगलं त्र्याहिकं तु ज्वरं जयेत् १२५ अर्कदक्षिणाःप
क्षःसितसूत्रेण वेष्टितः बंधितो वामकर्णे तु हरत्येकाहिकं ज्वरं १२६ भृंगराजजटा वद्धा कर्णे रात्रिज्वरापहा
सर्वज्वरहरी श्वेतमंदारस्य च मूलिका १२७ तुरंगरिपुमूलं वा श्वेतं शीतज्वरापहं विवस्त्रेणोध्धृता देवी मूल
लिका कर्णबंधनात् चातुर्थिकं ज्वरं हंति शिरोण पृष्टीरसांजनात् ॐ नमो भगवते रुद्राय नमः क्रोधेश्व
राय नमो ज्योतिःपतंगाय नमो नमः सिद्धिरुद्र आज्ञापयति स्वाहा अनेन सप्तजप्तेस्तु सर्षपैः सन्ताडये
त् चातुर्थिकज्वरान्मुक्तो नरो भवति सर्वथा १२८ इत्यारोग्यदर्पणात् अथ रसमार्गतो ज्वरचिकित्सा र
कभागो रसो भागद्वयं शुद्धं च गंधके विषस्य च त्रयो भागाश्चतुर्भागा हिमावती १२९ जैपालजाःपंचभागाः
निंबुद्रवविमर्दिताः कृमिगुंजाप्रमिता व — ट्यः कार्या सर्वज्वरच्छिदः १३० श्रृंगवेररसादानव्यावटिकैकाहि

मृतविद्यासमुद्दिष्टैर्वेधावेश्मनताडनैः ११२ जयेद्भूताभिषंगोत्थं मनसं त्वैकमानसं वृंदात् पटोलत्रिफला
निंबद्राक्षाशम्पाकवालकैः क्वाथः सितामधुयुतो जयेद्ऐकाहिकं ज्वरं ११३ गुडूचीधान्यमुस्ताभिः चंदनोशीर
नागरैः सितामधुयुतः क्वाथस्तृतीयज्वरनाशनः ११४ देवदारुशिवावासाशालिपर्णीमहौषधैः धात्रीयुतैः
शृतं शीतं दद्यान्मधुसितायुतं ११५ चातुर्थिके ज्वरे श्वासे कासे मंदानले तथा मुस्ताक्षुद्रामृतासुंठीधात्रीक्वा
थः समाक्षिकः ११६ पिप्पलीचूर्णयुक्तं वै विषमज्वरनाशनः क्षुद्राधान्यकशुंठीभिर्गुडूचीमुस्तपद्मकैः
११७ रक्तचंदनमुर्निंबपटोलवृषपौष्करैः ११८ कटुकेंद्रयवारिष्टभार्गीपर्पटकैः समैः क्वाथं प्रातर्निषेवेत स
र्वशीतज्वरच्छिदं ११९ शार्ङ्गधरात दार्वीदारुकलिंगलोहितलता सम्पाकपाठासटीशौंठीवीरकिरातवार
णाकणाम्रायंतिकापद्मकैः उग्राधान्यकनागराढसरलैः शीघ्रं बुसिंही शिवा व्याघ्री पर्पटदर्भमूलकटुका
नेतामृतापौष्करैः ११९ धातुस्थं विषमं त्रिदोषजनितं चैकाहिकं द्वाहिकं क्वाथो हंति तृतीयकं ज्वरमये चातु
र्थिकं मृत्युजं १२० इत्यारोग्यदर्पणात दार्व्यादिः निदिग्धिकानागरिकामृतानां क्वाथं पिबेन्मिश्रितपिप्प
लीकं जीर्णज्वरारोचककासशूलश्वासाग्निमंद्यार्दितपीनसेषु १२१ योगशतात नसाम्यतिज्वरोयस्तुप

विनाशनः १०० वंदात शरपुं ॰ त्वाशिफातुंवीसक्तस्नाविषमुष्टिभिः प्रलेपोवाहिंडंवीभिःश्वपथ्येक
टीमूलजे १०१ शार्ङ्गधरसारसंग्रहे शुष्कांचस्फुटितांजिह्वांद्राक्षयामधुपिष्टया प्रलेपयेत्सद्धत
यासन्निपातज्वरोगदे १०२ यवकोलकुलत्थानांमुद्गमूलकबिल्वयोः एकैकंमुष्टिमादायपचेदष्ट
गुणोजले १०३ पंचमुष्टिकइत्येषवातपित्तकफापहः शस्यतेगुल्मशूलेषुश्वासेकासेक्षयेज्वरे
१०४ इतिपंचमुष्टिकः संनिपातेप्रकंपेतंविलपंतंचयोधृतं भोजयेत्पाययेद्वापिसवैद्यःख्यांकथंव्र
जेत १०५ सन्निपातेषुदाहार्तेयःसिंचेच्छीतवारिणा आतुरःसकथंजीवेद्भिषक्वासकथंभवेत
१०६ मत्युनासहयोद्धव्यंसन्निपातंचिकित्सिता यस्तत्रभवेज्जेतासजेताप्यमसंगरे १०७ सन्निपा
तार्णवेमग्नंयोभ्युद्धरतिमानवं कस्तेनननकृतोधर्मःकांचपूजांनसोर्हति १०८ अथविषमज्वरे अभि
चाराभिशापोत्थौज्वरौहोमादिभिर्जयेत दानस्वस्त्ययनातिथ्यैरुत्पातग्रहपीडजौ १०९ औषधीगंध
विषजौविषपित्तप्रसाधनैः जयेत्कषायैर्मतिमान्सर्वगंधकृतंज्वरं ११० क्रोधतःपित्तजित्काम्याःसद्धार्थाः
सद्धाक्यमेवच आश्वासेनेष्टलाभेनवायोःप्रशमनेनच १११ हर्षशोकसमयांतिकामशोकभयज्वरः

शुंगधो:३

यफलमस्सैकभूचतुर्वस्तुभिः भागैर्मितसुकूलनमिश्रमभितस्वेदशैत्यहरं ९० सारसंग्रहात् तस्माये
लांछनंपश्चात्तालुसूत्रंत्रिदोषजे रुद्राभिशेकभूदेवभोजनगृहजापतः ९१ मंत्ररक्षादिभिःकार्यो।
सन्निपातप्रतिक्रिया अथसंधिगादीनांचिकित्सा सन्निपातज्वरस्यांतेकर्णमूलेसुदारुणः शोथःसंजा
यतेतेन कश्चिदेवप्रमुच्यते ९२ नरस्तेनविनाव्रुद्धिर्ज्वरैवासन्निपातके दोषप्रशममायातिकाथपा
चनकादिभिः ९३ दोषप्रशमितेप्यत्ररक्तंनैवविलीयते तेनसंजायतेशोथःकर्णमूलेसुदारुणः
९४ तस्मात्तत्रप्रतीकारंकुर्याद्रक्तावसेचनैः जलौकालाबुश्रृंगैश्चततःस्यात्लेपनंहितं ९५ यदापा
कोभवेत्तत्रव्रणावद्भेषजंतदा कर्कटस्यचमांसेनस्वेदनंवेधनंतथा ९६ कर्णमूलभवेशोथेहिता
दपिहितंमतं सिद्धार्थसैंधववचागृहधूमाभिश्रैः पिष्टैर्जलेननिशयासहितंचसूक्ष्मं लेपोहितो
रुधिरनाशकरःप्रतीतःशोफव्रणस्यशमनःसरुजस्यकर्णौ ९७ सारसंग्रहात् कुलत्थंकट्फ
लंशुंठींकारवीचसमांशकैः सुखोष्णंलेपनंकार्यंकर्णमूलेमुहुर्मुहुः ९८ वीजपूरकमूलत्वक्
वह्निर्मपस्तथैवच नागरंदेवदारुंचरास्नावाकिश्चयोजितः ९९ एभिःप्रलेपनंश्रेष्ठंगलशोथ

स्यभांडंस्वेदापहं गुडनमुत्तमंहि ७८ वंगात यवानिकावचाशुंठीपिप्पलीकारवीतथा एतैरुद्धूलनंशस्तं
त्रिदोषोत्थेज्वरेन्नृणां अतस्यास्तुरुणांशस्तंसन्निपातभवेन्नृणां ७९ सारसंग्रहात लंघनंवालुकास्वे
दोनस्यंनिष्ठीवनंतथा अवलेहोंजनंचैवप्राक्प्रयोज्यंत्रिदोषजे ८० खर्परभ्रष्टपटस्थितकांजिकसंसिक्तवा
लुकास्वेदः शमयतिवातकफामयमस्तकशूलांगभंगादीन् ८१ सैंधवंश्वेतमरिचंशर्षपाःकुष्टमेवच
वस्तमूत्रेणपिष्टानिनस्यात्तंद्राकराणिच ८२ आर्द्रकस्यरसोपेतंसैंधवंसकटुत्रयम् आकंठंधारयेद्दा
स्येनिष्ठीवेच्चपुनःपुनः ८३ लीनोद्धाकृष्यतेश्लेष्मालाघवंचास्यजायते शिरीषवीजगोमूत्रकृष्णामरि
चसैंधवैः ८४ अंजनंस्यात्प्रवोधायसरसोनशिलावचैः रसस्येरससंशुद्धिःरक्तस्येरक्तमोक्षणं ८५ मां
सस्येरेचनंशस्तंमेदस्येचासहिष्णुता रेचनंवमनंस्वेदश्चास्थिस्थेस्वेदमर्दने ८६ मज्जाशुक्राश्रयंदृ
ष्टातमसाध्यंज्वरंवदेत योगरत्नावल्यात सिद्धार्थकोवचाहिंगुकरंजःसुरदारुच मंजिष्ठात्रिफलाश्वे
ताकटभीत्वक्कटुत्रयं ८७ प्रियंगुश्चशिरीषंचनिशाद्वावींसमांशतः अजामूत्रेणसंपिष्टोगोमूत्रैर्वा
थचूर्णितः ८८ सर्वज्वरंनिहंत्याशुसिद्धार्थादिप्रलेपतः ८९ इतिसिद्धार्थकादिः रसविषमरिचमहेशाक्षि

६७ इतिपंचतिक्ताकषायः दार्व्यंबुदौतिक्तफलात्रिकंचक्षुद्रापटोलीरजनीसनिंबा क्वाथंविदध्याज्ज्वरस
न्निपातेनिश्चेतनेपुंसिविबोधनार्थं ६८ योगशतात कट्फलंपौष्करंशृंगीव्योषंयासश्चकारवी श्लक्ष्णचू
र्णीकृतंचैतन्मधुनासहलेहयेत ६९ एषावलेहिकाहंतिसन्निपातंसुदारुणां हिक्कांश्वासंचकासंचकंठरोगं
चदुर्धरम ७० एतद्योज्यंकफोद्रेकेचूर्णमार्द्रकजैरसैः इत्यष्टांगावलेहिका दशमूलीसटीशृंगीपौष्क
रंसदुरालभा शुंठीकटुजबीजंचपटोलंकटुरोहिणी ७१ अष्टादशांगइत्येषःसन्निपातज्वरापहः का
शहृद्ग्रहपार्श्वार्तिश्वासहिक्कावमीहरः ७२ दशमूलाद्यष्टादशांगः चिरज्वरेवातकफोत्थरोगेवात्रिदोषजे
वादशमूलमिश्रः किरातातिक्तादिगणःप्रयोज्यःशुद्ध्यर्थिनेवाल्पवतावमिश्रः ७३ इतिचतुर्दशांगः किरा
तंनागरंमुस्तंगुडूचीचेत्ययंगणः ७४ वैद्यात भूनिंबकारवीतिक्ताव्चाकटुफलजंरजः उद्धूलनंत्रिदोषो
त्थेस्वेदाभिष्यंदिनिज्वरे ७५ मरिचंपिप्पलीशुंठीपथ्यालोध्रंसपौष्करं भूनिंबकटुकाकुष्ठंकारवींद्रयवा
सटी ७६ एतानिसमभागानिसूक्ष्मचूर्णानिकारयेत प्रस्वेदेकंठरोधेचसंधिमर्दनमिष्यते ७७ एतदु
द्धूलनंश्रेष्ठंसंनिपातहरंपरं स्वेदोद्गमेभ्रष्टकुलत्थचूर्णोद्धूलनंसम्यगितिब्रुवंति चूर्णोभ्राष्ठकोर्ल्वण

काश्मरीयुतैः दशमूलमितिख्यातं कथितं तज्जलं पिबेत् पिप्पलीचूर्णसंयुक्तं सन्निपातज्वरापहं ६१ शार्ङ्गध
रात् भार्गीभूनिंबनिंबवर्धनकटुकवचाव्योषसौवोविशालारास्नानंतापटोलीसुरतरुरजनीपाटलाडुंडुकी
भिः शाल्लीदार्वीगुडूचीत्वदतिविषयापुष्करत्रायमाणैःपाठाव्याघ्रीकलिंगैस्त्रिफलसहियुतैःकल्पितै
स्तुल्यभागैः ६२ क्वाथो द्वात्रिंशनामास्त्रिकदशकमितान्संनिपातान्निहंतिश्वासंशूलंचहिक्कांकसनग
दरुजाध्मानमन्याहनुजश्च अरुस्तंभांत्रवृद्धिंगलगदमहतंसर्वसंधिग्रहार्तिंहन्यादेकोपिसिंहोगजनि
वहमिवप्रस्फुरद्दारुणाधारम् ६३ इत्यारोग्यदर्पणातो द्वात्रिंशकोभार्ग्यादिः भूनिंबदारुदशमूलमहौ
षधाद्रतिक्तेंद्रबीजधनिकेभकणाकषायः तंद्राप्रलापकसनारुचिदाहमोहश्वासादियुक्तमखिलज्व
रमाशुहन्यात् ६४ इतिभूनिंबाद्यष्टादशांगः क्रियायास्तुगुणालाभेक्रियामन्यांप्रयोजयेत् पूर्वस्यां
शांतवेगायांनक्रियासंकरोहितः ६५ वैद्यात् निंबाब्दारुकटुकात्रिफलाहरिद्रास्फ्रापटोलदलनिःक्व
थितःकषायः पेयस्त्रिदोषजनितज्वरनाशनायक्वाथःसमंमगधयादशमूलजोवा ६६ इतिचिकित्
साकलिकान्निंबादिः स्फुद्रापौष्करमूनिंबगुडूचीविश्वभेषजैः पंचतिक्तकनामायंक्वाथोहंत्यखिलंज्वरम्

सक्षौद्रा हा रुचिर्हन्यात सर्वज्वरे गुडुच्यादि योगशतात इति श्लेष्मज्वरचिकित्सा अथ वातपित्तज्वरे
पर्पटाद्रामृतोदीच्यकैरातैः साधितं जलं पंचभद्रमिदं प्रोक्तं वातपित्तज्वरापहं ५० शार्ङ्गधरात त्रिफलाशा
ल्मलीरास्नाराजवृक्षाटरूषकैः सृतमंबु हरेत्तूर्णं वातपित्तोद्भवं ज्वरं ५१ वृंदात अथ वातश्लेष्मज्वरे क्षु
द्राशुंठीगुडुचीनां कषायः पौष्करस्य च कफवाताधिके पेयो ज्वरे वापि त्रिदोषजे ५२ इति क्षुद्रादिः आर
ग्वधकणामूलं मुस्तातिक्ताभया कृतः क्वाथः शमयति क्षिप्रं ज्वरं वातकफोद्भवं ५३ इत्यारोग्यपंचकं अ
थ पित्तश्लेष्मजे अमृतारिष्टकटुकामुस्तेंद्रजवनागरैः पटोलचंदनाभ्यां च श्रृतं पिप्पलिचूर्णयुक्
५४ अमृताष्टकमेतत्तु पित्तश्लेष्मज्वरापहं ५५ इत्यमृताष्टकं शार्ङ्गधरात पटोलं चंदनं मूर्वा पाठा
तिक्तामृतागणः पित्तश्लेष्मज्वरच्छर्दिदाहकंडूविषापहः ५६ पटोलं पिचुमंदं च त्रिफला मधुकं बला
साधितो यः कषायः स्यात्पित्तश्लेष्मभवे ज्वरे ५७ अथ सन्निपाते त्रिरात्रं पंचरात्रं वा दशरात्रमथापि वा लं
घनं सन्निपाते तु कुर्यादारोग्यदर्शनात ५८ कंटकारीद्वयं शुंठी धान्यकं सुरदारु च एभिः सृतं पाचनं ।
स्यात्सर्वज्वरनिवारणं ५९ शालिपर्णीपृश्निपर्णीहिं वेतीद्वयगोक्षुरैः बिल्वाग्निमंथश्योनाकपाटला

नाशनः ४० काश्मर्यादिः इतिवातज्वरचिकित्सा अथपैत्ते कट्फलेंद्रयवारिष्टतिक्तामुस्तैःस्तंजलं पा
चनंदशमेह्निस्यात्तीव्रेपित्तज्वरेन्नृणां ४१ कट्फलादिः दुरालभापर्पटकप्रियंगुभूनिंववासाकटुरो
हिणीनां क्वाथंपिबेच्छर्करयावगाढं तृष्णास्रपित्तज्वरदाहयुक्तः ४२ योगसतात् एकःपर्पटकःश्रे
ष्ठःपित्तज्वरविनाशनः किंपुनर्यदियुज्येतचंदनोशीरधान्यकैः ४३ वृंदात् इतिपित्तज्वरचिकित्सा
अथश्लेष्मजे वीजपूरशिफापथ्यानागरग्रंथिकैःशृतं सक्षारंपाचनंश्लेष्मज्वरेह्निदशावासरे ४४
वीजपूरादिः भूनिंवनिंवपिप्पल्यःसठीसुंठीशतावरी गुडुचीवृहतीचेतिक्वाथोहन्यात्कफज्वरं भू
निंवादिः आमकाभयाकृष्णाचित्रकश्चेत्ययंगणः सर्वज्वरभयातंकभेदीदीपनपाचनः इत्यामलका
दिः कट्फलंपौष्करंकृष्णाशृंगीचमधुनासह श्वासकासहरःश्रेष्ठोप्रोक्तोलेहःकफोतकृत इतिचतु
र्भद्रावलेहिकावृंदात छिन्नोद्भवांबुधरवन्यवासविश्वेदुस्पर्शपर्पटकमेघकिरातततिक्तैः मुस्ताट
रूषकमहौषधधन्वयासैः क्वाथंपिबेदनिलपित्तकफज्वरेषु ४५ एषकषायकृत्रिमिश्वरस्तैःकपि
तैःक्वाथैर्वातादिषुयोगाः अमृतारिष्टकचंदनपद्मकधान्योद्भवःक्वाथः ४६ ज्वरहृत्रासघर्दि रामः

त्वाग्लानिं परां शमुपयाति बलस्य यंच ३० अनुलोमोनिलस्यास्यं शुत्तृष्णा समनस्कता लघुत्वमिंद्रि
योद्गारः शुद्धि जीर्णौषधाकृतिः ३१ क्लमो दाहोंगसदनं भ्रमो मूर्छा शिरोरुजः अरतिर्बलहानिश्च सा।
वशेषौषधाकृतिः ३२ औषधशेषे भुक्तं पीतं च तथौषधं सशेषेन्ने नकरोति गदोपशमं प्रकोपयत्यन्यरो
गांश्च ३३ शीघ्रं विपाकमुपयाति बलं न हन्यात् अन्नावृतं न च पुनर्वदनान्निरेति प्राग्भक्तसेवितमथौषध
मेतदेव दद्याच्च भीरुशिशुवृद्धवरांगनाभ्यः ३४ इति वृंदात् गुडूचीपिप्पलीमूलं नागरैः पाचनं।
स्मृतं पथौ वातज्वरे सर्वलिंगे सप्तमवासरे ३५ वातज्वरे गुडूच्यादिः शालिपर्णीबलाद्राक्षागुडूची।
सारिवा तथा आसां क्वाथं पिबेत्कोष्णं तीव्रवातज्वरच्छिदं शालिपर्ण्यादिः किराताब्दामृतोदीच्यबृहतीद्व
यगोक्षुरैः सस्थिराकलसीविश्वैः क्वाथो वातज्वरापहः ३७ किरातादिः रसं विषं गंधकतालटंकणांक
हृत्रजैपालफलत्रिकं समं विमर्द्य भृंगस्य रसेन कल्पिता वटी बरा सर्वगदान्निहंति ३८ रोगे यदिष्टं त्व
अनुपानमात्रा देया वटीनेन मात्राभिषग्भिः पाश्चात्यदेशागतयोगिनेयमुक्तानुयुक्तानुभवेन पश्चात् ३९
घोराचोलीरसः किरातादिः काश्मरीसारिवाद्राक्षात्रायमाणामृताभवः कषायः सगुडः पीतो वातज्वरवि

श्रीगुरुः

३७

यो.त. रात्रौतक्रंत्यजेत् १७ रात्रौस्रतंतुदिवसेगुरुत्वमधिगच्छति मूर्छापित्तोष्णदाहेषुविषोत्थेचमदात्यये
१८ श्रमक्लमपरीतेचमार्गोत्थेवमथौतथा ऊर्ध्वगेरक्तपित्तेचशीतमंभःप्रशस्यते १९ अरोचकेप्रतिश्या
येप्रसेकेस्वपथौक्षये मंदाग्नावुदरेकुष्टेज्वरेनेत्रामयेतथा २० व्रणेचमधुमेहेचपानीयंमंदमाचरेत्
२१ मदनपालात् पानीयंपानीयंशारदिवसंतेपानीयं नादेयंनादेयंशारदिवसंतेनादेयम् २२ ।
स्फुटं उत्तमस्य पलेमात्रात्रिभिरक्षैस्तुमध्यमा जघन्यस्यपलार्द्धेनस्नेहक्वाथौषधेषुच २३ क
षेचूर्णस्यकल्कस्यगुटिकानांचसर्वशः द्रवशुक्तावलेहस्यपातव्यश्चचतुर्द्रवः २४ मात्रामधुच्छतादीनां
क्वाथस्नेहेषुचूर्णितात् द्विचत्वारिंशतामाषैरष्टादशाकवंधकैः २५ पलेद्वादशावंधंस्याद्रजाषक्लसा
मन्वितैः क्वाथद्रव्यपलंवारिद्विरष्टगुणमिष्यते २६ चतुर्भागावशिष्टंतुपेयंपलचतुष्टयं दीप्तानलेम
हाकायंपाययेदंजलिंजलं २७ अन्येत्वर्द्धपरित्यज्यप्रस्थंतुचिकित्सकाः क्वाथंत्यागमनिष्टंतत्वष्ट
भागावशेषितं २८ पारंपर्योपदेशेनचरकवैद्यैःपलद्वयं पाय यंत्यातुरंसायंपाचनंसप्तमेहनि २९
वीर्याधिकंभवतिभेषजमन्नहीनंहन्यात्तदामयमसंशयमाशुचैव तद्वालवृद्धयुवतीमृदवोपपी रामः

३७

स्वन्नाभीतान्नषार्त्तानपिसोर्द्धवातान ५ आमसप्तारात्रंतरुणंज्वरमाहुर्मनीषिणाः मध्यंद्वादशरात्रं
तुवृद्धमतउत्तरं ६ ज्वरितंज्वरमुक्तंवादिनांतेभोजयेल्लघु श्लेष्मजोद्वादशाहेनज्वरःपाकंप्रप
द्यते ७ दोषाणामेवसाशक्तिर्लंघनेयासहिष्णुता नहिदोषक्षयेकश्चित्सहतेलंघनंमहत ८ न
वज्वरेदिवास्वापस्नानभोजनमैथुनं क्रोधप्रवातव्यायामकषायांश्चविवर्जयेत ९ निर्वातभवा
नावासमुष्णवारिनिषेवनं अभ्यंगंजल्पनंनिःक्रोधकामशोकंचरोगिणां कारयेत्सुखेसं पत्येशी
घ्रंवैद्योविचक्षणाः चक्रदत्तात कफमेदोनिलामघ्नंदीपनंवस्तिशोधनं कासश्वासज्वरहरंपथ्यमु
ष्णोदकंसदा ११ यत्क्वाथ्यमानंनिर्वेगंनिःफेनंनिर्मलंभवेत अर्द्धावशिष्टंभवतितदुष्णोदकमुच्य
ते १२ तत्पादहीनंपित्तघ्नमर्द्धहीनंचवातजित कफघ्नंपादशेषंचपावनंलघुदीपनं १३ शारदंचा
र्द्धपादोनंपादहीनंचहैमनं शिशिरेचवसंतेचग्रीष्मेचार्द्धावशेषितं विपरीतेअतोतत्त्वात्र्यष्टा
वशेषितम भिनत्तिश्लेष्मसंघातंमारुतंचापकर्षति १५ अजीर्णंजरयत्याशुपीतमुष्णोदकंनिशि
धारापातेनविष्टंभिर्द्वजंरेपवनापहं १६ सुतप्तशीतंत्रिदोषघ्नंवाष्पांतमोवशीतलं दिवास्वतंतुयन्तोयं

मसंतापमव्यथंविमलेन्द्रियं पुंसंप्रकृतिसत्वाभ्यांविद्यात्पुरुषमज्वरं ९ दोषप्रकृतिवैकृत्यंलघुताज्व
रदेहयोः इन्द्रियाणांचवैमल्यंदोषपाकस्यलक्षणम् १० निद्रानाशोहृदिस्तंभोविष्टंभोगौरवारुचिः अ
रतिर्वलहानिश्चधातूनांपाकलक्षणं ११ हतप्रभेन्द्रियक्षाममरोचकनिपीडितं गंभीरंतीक्ष्णवेगार्तंज्व
रितंपरिवर्जयेत् १२ हिक्काश्वासतृषायुक्तोमूढोविभ्रांतलोचनः सततोच्छ्वास हीनश्चमत्र्यतेज्वरपी
डितः १३ देहोलघुर्व्यपगतक्लममोहतापःपाकोमुखेकरणसौष्ठवमव्यथत्वं स्वेदःक्षवःप्रकृतियोगि
मनोन्नलिप्साकंडूश्चमूर्ध्निविगतज्वरलक्षणानि १४ इतियोगतरंगिण्यांसंक्षेपतोज्वरनिदाननि
रूपणंनामसप्तदशः सर्गः ॥छ॥ अथक्रमप्राप्तस्यप्रथमंज्वरचिकित्सा ज्वरेलंघनमेवादावुपदिष्टम
तेज्वरात् क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् १ आमाशयस्थोहत्वाग्निंसामोमार्गान्पिधा
पयन् विदधातिज्वरंदोषस्तस्माल्लंघनमाचरेत् २ अनवस्थितदोषाग्नेर्लंघनंदोषपाचनं ज्वरघ्नंदी
पनंकांक्षारुचिलाघवकारकं ३ वलाविरोधिनाचैनंलंघनेनोपपादयेत् वलाधिष्ठानमारोग्यंयदर्थो
यंक्रियाक्रमः ४ चक्रदत्तात् नलंघयेन्मारुतजेज्वरेचक्षयोरुवेचक्षुधितेचजंतौ नगुर्विणीदुर्वलवाल

शोकभयाद्वायुः क्रोधात्पित्तं त्रयो मलाः ७६ भूताभिषंगात्कुप्यंति भूतसामान्यलक्ष (णाः१) दोषोऽल्पोहितसंभू
तो ज्वरोत्सृष्टस्य वा पुनः ७७ धातुमन्यतमं प्राप्य करोति विषमज्वरं यः स्यादनियतात्कालाच्छीतोष्णाभ्यां
तथैव च ७८ वेगतश्चापि विषमः स ज्वरो विषमो मतः संततः सततोन्येद्युस्तृतीयकचतुर्थकौ ७९ संततो रसर
क्तस्थः सततो रक्तधातुगः अन्येद्युष्कः प्रकुरुते दोषः पिशितधातुगः ८० मेदोगतस्तृतीयाख्यमस्थिमज्जा
गतः पुनः कुर्याच्चातुर्थिकं घोरमंतकं रोगसंकरं ८१ सप्ताहं वा दशाहं वा द्वादशाहमथापि वा संतत्या यो वि
सर्गी स्यात्संततः स निगद्यते ८२ अहोरात्रे सततको द्वौ कालावनुवर्त्तते अन्येद्युष्कस्त्वहोरात्रमेककाले
प्रवर्त्तते ८३ तृतीयकस्तृतीयेह्नि चतुर्थेह्नि चतुर्थकः इत्यादयस्तु विज्ञेया ज्वरा नानाविधा बुधैः ८४ श्वा
सो मूर्छा रुचिश्छर्दिस्तृष्णातीसारविड्ग्रहाः हिक्काकासांगभेदाश्च ज्वरस्योपद्रवा दश ८५ तंद्रालालाप्र
सेकश्च स्तब्धताक्षुत्प्रणाशता हृल्लासो मूत्रभूयस्त्वं सामज्वरस्य लक्षणं ८६ सामेन भेषजं देयं नि
रामेन द्विचारतः दाहः स्वेदो भ्रमस्तृष्णा कंपविड्भिरसंज्ञता ८७ कूजनं चातिवेगं च प्रमाक्षतिर्ज्वरमोक्ष
णे स्वेदो लघुत्वं शिरसः कंडूपाको मुखस्य च क्षवथुश्चान्नकांक्षा च ज्वरमुक्तस्य लक्षणं ८८ विगतक्ल

पाताः दोषेप्रबद्धेनष्टेग्नौसर्वसंपूर्णलक्षणाः सन्निपातज्वरोसाध्यःकृच्छ्रसाध्यस्ततोन्यथा ६५ सप्तमे
दिवसेप्राप्तेदशमेद्वादशेपिवा पुनर्घोरतरोभूत्वाप्रशमंयातिहंतिवा ६६ पित्तकफानिलवृध्यादशदिव
सद्वादशाहसप्ताहात् हंतिविमुंचतिपुरुषंत्रिदोषजोधातुमलपाकात् ६७ सप्तमीद्विगुणायावन्नवम्ये
कादशीतथा एषात्रिदोषमर्यादामोक्षायचवधायच ६८ ज्वरस्यपूर्वंज्वरमध्यतोवाज्वरांततोवाश्व
तिमूलशोथः कृमादसाध्यःखलुकृच्छ्रसाध्यःसुखेनसाध्योमुनिभिःप्रदिष्टः ६९ त्रयःप्रकुपितादो
षाउरःश्रोतोनुगामिनः आमाविबद्धायथिताबुद्धींद्रियमनोगताः ७० जनयंतिमहाघोरंअभिन्या
संज्वरंदृढं तेनसंजीयतेरोगीगतःसर्वेंद्रियक्रियः प्रत्याख्येयःसमूपिष्टंकश्चिदेवात्रसिद्ध्यति ७१ अ
भिचाराभिषंगाभ्यामभिघाताभिशापतः आगंतुर्जायतेदोषैर्यथास्वंतंविभावयेत् ७२ श्यावास्य
ताविषकृतेतथातीसारएवच भक्तारुचिःपिपासाचतोदश्चसहमूर्छया ७३ औषधीगंधजेमूर्छाशि
रोरुक्वमथुस्तथा कामजेचित्तविभ्रंशस्तंद्रालस्यमभोजनं ७४ भयात्प्रलापःशोकाच्चभवेत्कोपा
द्विपथुः अभिचाराभिशापाभ्यांमोहस्तृष्णाचजायते भूताभिषंगादुद्वेगोहास्यरोदनकंपनं काम

वाग्भ्रंशं दृष्टिविभ्रहं सरक्तकफनिष्ठीवरुक्छ्वासोत्कंमुहुर्मुहुः प्रमीलश्वासकासानां प्रत्यहं परिवर्द्धनं अनिद्रे छामनोग्लानिः पार्श्वे वाराहतो पमे कफस्यालष्य
माणस्य हृदयाद्प्रवर्तनं पार्श्वदाहं तथा कांडे स्तुद्यते भिद्यते भृशं एषः कर्कटको नाम सन्निपातः सुदारुणः वृद्धमध्यमहीनास्तु कुर्युर्वातादयः क्रमात् एकपक्षा
भिघातं च यत्र लिंगं स्वकं स्वकं कंपमूर्छा भ्रमायासविलापारतिमोहनं संमोहक इतिख्यातः सन्निपातोतिकष्टदः हीनप्रवृद्धमध्याख्य यत्र वातादयः क्रमात् कुर्वन्त्यतो।
नेकगदं स्वंस्वंलिंगे च शान्वितः कफपित्तांशजांसेभ्यो निर्गमः स्फोटसंभवः सर्वस्रोतप्रपाकश्च संग्रामार्ख्ये ज्वरे मतः प्रवृद्ध हीनमध्यस्था यत्र वातादयः क्रमात् स्वंस्वं लिंगं प्र ५

५२ मन्यायां हृदये कंठे मस्तके वदने रुजं हिक्कां गागौरवं ग्लानिं वाक्संगं नेत्रसंगमिः ५३ प्रमीलं च कटीतोदं का
शंस्वासं च जत्रुरुक् उत्पादयकर्णमूलं च स्थूलेशांतिं गता अपि ५४ कुर्वंति कर्णमूला ख्यां पिडिकां कर्णमू
लजां व्यालाकृतिः स विज्ञेयस्तस्माद्दर्वाक् न सिध्यति ५५ मध्यक्षीणाधिका यत्र कुर्युर्वातादयः क्रमात् स्वं
स्वं रूपं स्वशास्त्राच जितांस्तथ्यां स्तुकर्कशां ५६ कंठकूजनमालस्यं मुखेमालक्तकोपमं शूकपूर्णगता।
त्वें रुक्शुष्ककंठोष्ठतालुकः ५७ अंतर्दाहं गुदभ्रंशं कुर्वंति विलापायासकंपनं मन्यास्तंभं च मृत्युं च
'मोहं'मूर्छां'रतिभ्रमं ५८ सन्निपातं स विज्ञेयस्तुंडिः कर्कश संज्ञितः मध्यप्रवृद्धहीनाश्च यत्र वाताद
यः क्रमात् ५९ स्वंस्वं लिंगं प्रकुर्वंति स्तब्धदृष्टिश्च मानवः अंतःपाकं यकृत्प्लीह हृत्क्लोमांत्रोदरेषु च पूय।
स्वा आवं गुदाभ्यां शीर्णो दंतगतिर्न्नेणां मर्मांतरहतस्येव शायनं च विशेषतः ६१ पाक ५ लाख्यः स विज्ञेयो स
न्निपातो निदारुणः वृद्धा वातादयो यत्र स्वैस्वैर्लिंगैः समन्विताः ६२ उच्छ्वासपरतां कुर्युर्मूकतां स्तब्ध।
तां दृशः आस्यदंतश्रुतेर्नाशं स्तब्धो गात्रे विसंज्ञतां ६३ जीवनं च स्पृहेतीते सज्ञेयः कूटपालकः कूटपा
लकिनं दृष्ट्वा व्याहरंत्यल्पबुद्धयः ग्रहभूतपिशाचाद्यैर्विशाद्यैर्वापि वीक्षितं ६४ इति त्रयोदश सन्नि

रुजा ४० मन्यास्तंभः प्रवांतिश्च तन्द्रायाश्च विनिग्रहः सन्निपातेशाकेराख्ये कफवातोल्बणो भवेत ४१
मूर्छाग्लानिर्ज्वरो हिक्का तन्द्रा दाहो बलक्षयः उरःसादो निनिद्रा च स्फुरणं गात्रनिस्तृतिः पर्वशूलं प्र
लापश्च विस्मृतं श्रोणितप्रभं पिडिकोद्वेष्टनं शूले वस्तिकर्षः प्ररोदनं ४२ दाहः सर्वांगसंभेदो दर्श
नस्य च निग्रहः लिंगविस्फुरको ख्यातु सन्निते निलोल्बणो ४४ बहिरंतर्ज्वरो दाहः शीतयोगात्कफा।
निलौ कुरुतः कुपितो श्वासकासहिक्काप्रमीलकान् ४५ पर्वभेदं विसूचीं च प्रलापं गौरवं भ्रमं ना
भिपार्श्वरुजं तस्य छिन्नः श्वासः प्रवर्तते ४६ श्रोतोभ्यः श्रोणितात्यृत्तिः शूलः स्वासस्तृषाभ्रमः स्या
दहोरात्रं जीवितं पित्ताढ्ये शीघ्रकारिणि ४७ तं तु शीतज्वरो दाहो हृद्रोहो मधुरास्यता अरुचि
गौरवालस्य श्लेष्मनिष्ठीवनं भ्रमः ४८ तत्रिर्मूर्छा च विस्तब्धा हिक्का वाक् श्रोत्रनिग्रहः कफस्य।
निग्रहात्पित्तं कुर्यात्सोपद्रवं ज्वरम ४९ पित्तस्य निग्रहात्कुक्षौ मेदोमज्जास्थितोनिलः हृद्देशं वहिरा
यासं कृत्वा हंत्युपवासतः ५० अन्येत्वातिभुंक्तेवा त्रिरात्रं नैव जीवति भवेत्तत्पैत्तिके रूपं सन्निपाते क
फोल्बणो ५१ मध्यक्षीणाधिकाः कुर्युः पित्तवातकफाः क्रमात मध्यं दाहं ज्वरं नित्यं स्वल्पशूलं विसंस्तंभं

२९ सस्वनौ सरुजौ कर्णौ कंठः शूकैरिवावृतः तंद्रा मोहः प्रलापश्च कासश्वासो रुचिर्भ्रमः तदच्छीतं महानिद्रा
दिवाजागरणं निशि सदा वा नैव निद्रा महास्वेदोऽथ नैव वा ३० गीतनर्तनहास्यादिविकृतेहाप्रवर्तनं परिद
ग्धा खरस्पर्शा जिह्वा स्रस्तांगता परं ३१ ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च शिरसो लोठनं तृष्णा नि
द्रानाशो हृदि व्यथा ३२ स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः कृशत्वं नातिगात्राणां प्रततं कंठकूजनं
३३ कोठानां श्यामरक्तानां मंडलानां च दर्शनं मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च ३४ चिरात्पाका
च्च दोषाणां सन्निपातज्वराकृतिः अथ भल्लूकमतेऽत्र त्रुल्वणौ कोल्वणौः षट् स्युर्हीनमध्याधिकैश्च
षट् समैश्चैको विकारास्ते सन्निपातास्त्रयोदश ३५ तन्मात्रं द्राभ्रमः कासस्तालुशोषो ज्वरो रुचिः आ
नाहो गात्रसंभेदः श्वासकंपश्रमभ्रमः ३६ विद्याद्व्यसन्निपाते स्याद्विंगपित्तानिलोल्वणो सं▮भे
दो दक्षिणे पार्श्वे हृदि शीर्षे गलग्रहः ३७ दाहोंतः शीतता बाह्ये निष्ठीवः कफपित्तयोः हिक्का प्रमील
कः श्वासो निद्रा कंठप्रतापकः ३८ तन्मात्रपुरीषसंभेदो वदने तिक्तता रुचिः कफपित्तात्मके चैतत्सस
र्वां भल्लसंज्ञके ३९ क्षुत्समासो जठरे दाहः करिवत्तौश्च दूयनं शिरोगौरवमालस्यं निद्रा शीतज्वरो

मूर्छादाहोमदस्तृषा पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च १९ अथश्लेष्मज्वरलक्षणं स्तैमित्यं स्तिमितो वेग
आलस्यं मधुरास्यता शुक्लमूत्रपुरीषत्वं स्तंभस्तृप्तिस्तथैव च २० गौरवं शीतमुत्क्लेदो रोमहर्षोतिनिद्रता
ह्यंगेषु पिडिकाशीताः प्रसेकश्छर्दितंद्रिके २१ कंडूप्रलापउष्माभिलषिता वह्निमार्दवं प्रतिस्यायो रुचिः
कासः कफेनेक्षणोश्च शुक्लता २२ इतिश्लेष्मज्वरलक्षणं अथवातपित्तज्वरलक्षणं तृष्णा मूर्छा भ्र
मो दाहः स्वप्ननाशः शिरोरुजा कंठास्यशोषो वमथू रोमहर्षो रुचिस्तमः २३ पर्वभेदश्च जृंभा च वातपि
त्तज्वराकृतिः अथवातश्लेष्मज्वरलक्षणं स्तैमित्यं पर्वणां भेदो निद्रा गौरवमेव च शिरोग्रहः प्रतिश्या
यः कासस्वेदप्रवर्त्तनं २४ संतापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः २५ इतिवातश्लेष्मज्वरलक्ष
णं लिप्ततिक्तास्यता तंद्रा मोहकासो रुचिस्तृषा मुहुर्दाहो मुहुः शीतं श्लेष्मपित्तज्वराकृतिः २५ इतिश्ले
ष्मपित्तज्वरलक्षणं सामान्यतो विशेषात्तु जृंभात्यर्थं समीरणात् पित्तान्नयनयोर्दाहः कफान्नान्नाभिनंद
नं सर्वलिंगसमावायुः सर्वदोषप्रकोपजे रूपैरन्यतराभ्यां च संसृष्टे द्वंद्वजं विदुः २७ अथसन्निपात
ज्वरलक्षणं क्षणेदाहः क्षणेशीतमस्थिसंधिशिरोरुजा सास्रावे कलुषे रक्ते निर्भु । ग्ने चापि लोचने

भग्ननाडिकौ भगंदरोपदंसौ च श्लूकदोषस्त्वगामयः ७ शीतपित्तमुदर्दश्चोत्कोठाकश्चाम्लपित्तकं विस
र्पश्च सविस्फोटस्तथैव च मसूरिका ८ क्षुद्रास्यकर्णनासाक्षिशिरःस्त्रीबालकामयाः विषंचेत्ययमुद्देशः सं
ग्रहेस्मिन्प्रकीर्तितः ९ तत्राद्यमप्राप्तस्य प्रथमं ज्वरलक्षणम् देहेंद्रियमनस्तापी सर्वरोगाग्रजो बली ज्व
रः प्रधानो रोगाणामुक्तो भगवता पुरा १० दक्षापमानसंक्रुद्धरुद्रनिश्वाससंभवः ज्वरोष्टधा पृथग्द्वंद्वसं
घातागंतुजः स्मृतः ११ मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू
रसानुगाः १२ श्रमोरतिर्विवर्णत्वं वैरस्यं नयनप्लवः इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु १३ जृं
भांगमर्दो गुरुता रोमहर्षोरुचिस्तमः अप्रहर्षश्च शीतं च भवंत्युत्पत्स्यति ज्वरे १४ स्वेदावरोधः संतापः स
र्वांगग्रहणंक्रमः युगपद्यत्र रोगे तु स ज्वरः परिकीर्तितः इति सामान्यज्वरलक्षणं अथ वातज्वरलक्षणं।
वेपथुर्विषमो वेगः कंठौष्ठमुखशोषणं निद्रानाशः क्षवस्तंभो गात्राणां रौक्ष्यमेव च १६ शिरोहृद्गात्ररुक्
वक्त्रवैरस्यं गाढविट्कता शूलाध्माने जृंभणं च भवंत्यनिलजे ज्वरे १७ अथ पित्तज्वरलक्षणं वेगस्तीक्ष्
णोतिसारश्च निद्राल्पत्वं तथा वमिः कंठौष्ठमुखनासानां पाकः स्वेदश्च जायते १८ प्रलापो वक्त्रकटुता।

दशमूलमितिख्यातं पूर्वार्द्धं तु लघुस्मृतं परार्द्धं महदाख्यं स्यात्
तच्च मूलमिति द्विधा २

शर्कराश्मरिनाशनाः ५८ इति क्षारो शालिपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरैः बिल्वाग्निमंथशोना
क काश्मरी पाटलायुतैः ५९ दशमूलं सन्निपातशमनं प्रायशः स्मृतं वातपित्तश्वासकासस्मृतिकोटि
गनाशनम ६० दशमूलं सन्निपाते शोफे त्वक्पंचकं तथा तत्तद्योगे तथान्यांश्च वदिष्यामि गुणा।
न्गुनः ६१ न्यग्रोधोदुंबरश्चत्थपारिशप्लक्षपादपाः पंचैते क्षीरिणो वृक्षास्तेषां त्वक्पंचवल्कलम् ६२
॥ इति योगतरंगिण्यां स्वरसादिकथनं नाम षोडशः सर्गः १६ ॥ अथ स्वरूपनिरूपणाय तत्तद्दोष
प्रतीकाराय च रोगाः संक्षेपतः परिगण्यंते तेयथा ज्वरोतिसारो ग्रहणी ह्यर्शोऽजीर्णविसूचिका सा।
लसा च विलंबी च कृमिरुक्पांडुकामला हलीमकं रक्तपित्तं राजयक्ष्मा उरःक्षत । तं कासो हिक्का तथा स्वा
सः स्वरभेदस्त्वरोचकः २ छर्दिस्तृष्णा च मूर्छा च तथा पानात्ययादयः दाहाख्यश्च तथोन्मादो ह्य
पस्मारो निलामयः ३ वातरक्तमुरुस्तंभं आमवाते च शूलहृत् पक्तिजं शूलमानाहमुदावर्तो य गुल्
महृत् ४ हृद्रोगो मूत्रकृछ्रं च मूत्राघातस्तथाश्मरी प्रमेहो मधुमेहश्च पिडकाश्च प्रमेहजाः ५ मेदोदो
षोदरं शोथो वृद्धिश्च गलगंडकः गंडमाला पची ग्रंथी ह्यर्बुदं श्लीपदं तथा ६ विद्रधी व्रणशोथौ च द्वौ व्रणौ

चव्यचित्रकनागरैः कोलमात्रप्रमाणात्वात्पंचकोलमिदं मतं ४७ पाचनं दीपनं रुच्यं शूलगुल्मोदरा
पहं पंचकोलं समरिचं षड्षणमुदाहृतं ४८ इति पंचकोलं त्रिगंधमेलात्वक्पत्रैश्चातु
र्जातं सकेसरैः त्रिगंधं च चतुर्जातं तीक्ष्णोष्णं लघुपित्तकृत ४९ वर्ण्यं रुचिकरं तीक्ष्णं विषश्लेष्मामयापा
हं ५० इति त्रिसुगंधि चातुर्जातके काकोलीक्षीरकाकोलीजीवकर्षभकौ तथा मेदा चान्या महामेदा जी
वंती मधुके तथा ५१ मुद्गपर्णी माषपर्णी जीवनीयगणो मतः जीवनीयगणः स्वादुर्गर्भसंधान
कृद्गुरुः ५२ स्तन्यकृद्बृंहणो वृष्यः स्निग्धः शीतस्तृषापहः रक्तपित्तं क्षयं सर्वं कासं ज्वरदाहानिलाञ्जयेत ५३ इ
ति जीवनीयोगणः ह्रीमेदे द्वे च काकोल्यौ जीवकर्षभकौ तथा ऋद्धिर्वृद्धिश्चतैः सार्द्धमष्टवर्गमुदाहृतः
५४ अष्टवर्गो बुधैः प्रोक्तो जीवनीयसमो गुणैः इत्यष्टवर्गः सिंधुसौवर्चलं चैव विडं सामुद्रिकं गडं ए
क द्वित्रिचतुःपंचलवणानि क्रमाद्विदुः ५५ मधुरं सृष्टविण्मूत्रं स्निग्धं सूक्ष्मं बलापहं वीर्योष्णं दीपनं ती
क्ष्णं कफपित्तविवर्द्धनं ५६ इति पंचलवणानि स्वर्जिका यावशूकश्च क्षारयुग्ममुदाहृतं ज्ञेयौ वह्निसमौ
क्षारौ स्वर्जिका यावशूकजौ ५७ क्षाराश्चान्येपि गुल्मार्शो ग्रहणीरुक्छिदः सदा पाचनाः कृमिपुंस्त्वघ्नाः

तस्याश्चूर्णो रजःक्षोदस्तन्मात्रा कर्षसंमिता ३५ चूर्णो गुडः समो देयः शर्करा द्विगुणा मता चूर्णे भर्जितं हिं
गुजीरकं चेति केनच ३६ इति चूर्णकल्पना वटिका अथ कथ्यंते तन्नाम गुटिका वटी मोदको वटिका
पिंडी गुडो वर्तिस्तथोच्यते ३७ लेहवत्साधयेद्वह्नौ गुडो वा शर्करा थवा गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मि
ता वटी ३८ सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः सर्वचूर्णसमः कार्यो गुग्गुलुर्मधुनत्समं ३९ द्रवश्च
द्विगुणो देयो मोदकेषु भिषग्वरैः कर्षप्रमाणं तन्मात्रा बलं दृष्ट्वा प्रकल्पयेत ४० अथावलेहः क्वाथादेर्य
त्पुनः पाकाद्घनत्वं सा रसक्रिया सो वलेहश्च लेहश्च तन्मात्रा स्यात्पलोन्मिता ४१ सिता चतुर्गुणा देया।
चूर्णाच्च द्विगुणो गुडः द्रवश्च तद्गुणो देय इति सर्वत्र निश्चयः ४२ दुग्धमिक्षुरसो यूषपंचमूलकषाय
कः वासाक्वाथश्च तद्योग्यमनुपानं प्रशस्यते ४३ इत्यवलेहविधिः अथ गणाः एका हरीतकी योज्या
द्वौ योज्यौ च विभीतकौ चत्वार्यामलकान्याहुः सिता च द्विगुणा भवेत् ४४ त्रिफला मेहशोथघ्नी कुष्ट
हन्त्री रसायनी सर्पिर्मधुभ्यां संयुक्ता सैव नेत्रामयापहा ४५ इति त्रिफला पिप्पली मरिचं शुंठी त्रि
भिस्त्र्यूषणमुच्यते दीपनं श्लेष्ममेदघ्नं कुष्टपीनसनाशनं ४६ इति त्रिकटुः पिप्पली पिप्पलीमूलं। रामः

२४ दीपनःप्राणदोवस्तिशोधनोरक्तवर्द्धनः ज्वरजित्सर्वदोषघ्नोमंडोष्टगुणउच्यते २५ इत्यष्टगुणमंडः
सुकंडितैस्तथाभृष्टैर्वाट्यमंडोयवैर्भवेत् कफपित्तहरःकंठ्योरक्तपित्तप्रसादनः २६ इतियवाद्यमंडः लाजै
र्वातंडुलैर्भृष्टैर्लाजमंडःप्रकीर्तितः श्लेष्मपित्तहरोग्राहीपिपासाज्वरजिन्मतः २७ इतिलाजामंडः अथ
फांटकल्पना क्षुण्णेद्रव्यपलेसम्यक्जलमुष्णंविनिक्षिपेत् मृत्पात्रेकुडवोन्मानंततस्तुस्रावयेत्पटात्
२८ सस्याच्चूर्णद्रवःफांटस्तन्मानंद्विपलोन्मितम् मधुश्वेतागुडादींश्चक्वाथवत्तत्रनिःक्षिपेत् २९ सयथा
मधूकपुष्पंमधुकंचंदनंसपरूषकं मृणालंकमलंलोध्रंकंभारीनागकेसरं ३० त्रिफलासारिवाद्राक्षाय
वान्क्वाथजलेक्षिपेत् सितामधुयुतःपेयःफांटोवासोहिमोथवा ३१ वातंपित्तंतथादाहंतृष्णामूर्छामत्ति
भ्रमान् रक्तपित्तंमदंहन्यान्नात्रकार्याविचारणा ३२ इतिमधूकपुष्पादिफांटः अथहिमकल्पना क्षुण्णं
द्रव्यपलंसम्यक्षड्भिर्नीरपलैःप्लुतं निःशोषितंहिमःसःस्यात्तथाशीतकषायकः ३३ तन्मानंफांटवद्वेयं
सर्वत्रैवैषनिश्चयः सयथा आम्रजंबूचककुभेचूर्णीकृत्यजलेक्षिपेत् हिमःसस्यात्पिबेत्प्रातःसक्षौ
द्रंरक्तपित्तजित् ३४ इत्याम्रादिहिमः अथचूर्णकल्पना अत्यंतशुष्कंयद्द्रव्यंसुपिष्टंवस्त्रगालितं।

त्वक्कषाये विपचेद्बुधः यवागूः शालिभिर्युक्तां तां भक्ष्याग्रहणीं जयेत् १४ अथ यूषः कल्कद्रव्यपलं शुंठी
पिप्पलीचार्द्धकार्षिकी वारिप्रस्थेन विपचेत्स द्रवो यूष उच्यते १५ सयषा कुलत्थयवकोलैश्च मुद्गैर्मूल
७३ कशुंठकैः शुंठीधान्यकयुक्तैश्च यूषः श्लेष्मानिलापहः १६ सप्तमुष्टिक इत्येष सन्निपातज्वराञ्जये
त् इति सप्तमुष्टिको यूषः अथैषां प्रक्रियात्रैव प्रोच्यते नातिविस्तरात् यवागूः षड्गुणा जले सिद्धा स्या
त्कृशरा घना १७ तंडुलैर्मुद्गमाषैश्च तिलैर्वा साधिता हिता यवागूर्ग्राहिणी बल्या तर्पिणी वातनाशि
नी १८ अथ विलेपी विलेपी त्वघना सिक्थैः सिद्धा नीरे चतुर्गुणे विलेपी तर्पणी हृद्या मधुरा पित्तनाशिनी
१९ अथ पेया द्रवाधिका स्वल्पसिक्था चतुर्दशगुणे जले सिद्धा पेया बुधैर्ज्ञेया यूषः किंचिद्घनस्ततः २०
पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिदा यूषो बल्यस्ततः कंठ्यो लघुपाकः कफापहः २१ इति पेयायू।
षौ अथ भक्तं जले चतुर्दशगुणे तंडुलानां चतुःपलं विपचेत्स्रावयेन्मंडं स भक्तो मधुरो लघुः २२ इति
भक्तः अथ मंडः नीरे चतुर्दशगुणे सिद्धो मंडस्त्वसिक्थकः शुंठीसैंधवसंयुक्तः पाचनो दीपनो लघुः
२३ इति शुद्धमंडः धान्यत्रिकटुसिंधूत्थयुक्तः स्तक्रेण योजितः भ्रष्टश्च हिंगुतैलाभ्यां स मंडोष्टगुणः स्मृतः

वस्त्रनिःपीडनोयस्तु स्वरसोरसउच्यते २ कुडवंचूर्णितंद्रव्यंक्षिप्तंतद्विगुणेजले अहोरात्रस्थितेयस्माद्ध
वेद्धारसउत्तमः ३ आदायशुष्कद्रव्यंवास्वरसानामसंभवे जलेष्टगुणितेसाध्यंपादशिष्टंचगृह्यते
४ स्वरसस्यगुरुत्वाच्चपलमर्द्धंप्रयोजयेत् निःशोषितंचाग्निसिद्धंपलमात्रंरसंपिबेत् ५ मधुश्वेताग्र
डक्षारानजीरकंलवणानिच घृतंतैलंचचूर्णादीन्कोलमात्रान्रसेक्षिपेत् ६ सयथा अमृतायारा
सक्षौद्रयुक्तः सर्वप्रमेहजित् हरिद्राचूर्णयुक्तोवारसोधात्र्याःसमाक्षिकः ७ इत्यादि अथकल्कक
ल्पना यःपिंडश्चार्द्रद्रव्याणांसकल्कइतिकीर्तितः वह्नेर्वैद्यवचःसाक्षात्कल्कोदृषदिपेषितः ८ मा
त्रापिचुमितातत्रद्विगुणंमाक्षिकादिकं यथा पचेत्क्षुद्रांसपंचांगांपुट पाकेनतद्रसः पिप्पलीचूर्ण
संयुक्तःकासश्वासक्षयापहः ९ अथक्वाथः पानीयंषोडशगुणंक्षुण्णाद्द्रव्यात्पलंक्षिपेत् मृत्पात्रे
क्वथितंग्राह्यंअष्टमांशावशेषितं १० शृतःक्वाथःकषायश्चनिर्यूहःसनिगद्यते ११ यथा गुडूची
धान्यकारिष्टरक्तचंदनपद्मकैः गुडूच्यादिरयंक्वाथःसर्वज्वरहरःस्मृतः १२ अथयवागूः साध्यंचतु
ष्पलंद्रव्यंचतुःषष्टिपलैर्जले तत्क्वाथेनार्द्धशिष्टेनयवागूंसाधयेद्धरां १३ सायथा आम्राम्रातकजंबू

व्योमसत्वं चानेतरत् १२७ भावयेच्चूर्णितं वज्रं दिनैकं कांजिकेन च रंभासूरणजैर्नीरैर्मूलकोत्थैश्च मर्दयेत्
तुर्यांशटंकणेनैव क्षुद्रमत्स्यैः समं पुनः महिषीमलसंमिश्रान्विधायास्याप्यगोलकान् १२८ खराग्निना
धमेज्जातं सत्वं मुंचति कांस्यवत् सत्वसेवी वयःस्तंभं कृतशुद्धिर्लभेन्नरः १२९ इत्यभ्रकसत्वपातनविधिः ताम्र
भूमध्वमूनागान्निशाविष्ठान्समेनतान् गुडगुग्गुलुक्षौद्र लोर्णामत्स्यपित्तपाकं टंकणैः १३० इदमेतैश्च
संयोज्य मर्दयित्वा धमेत्स्फुटं मुंचंति ताम्रसत्वं तत्तन्मुद्राजलपानतः १३१ नश्यंति जंगमविषाण्यपशेषाण्य
पि सर्वथा इति भूनागसत्वपातनविधिः सर्वेषामुपपूर्वाणां रसानां सत्वमारणं कर्तव्यं भस्मसूतेन गंध
केनाग्निगर्भके १३२ इति सर्वसत्वमारणं ये धातवो येप्युपपूर्वकाश्च रसाश्च मत्स्या इह षट्शिल्पसाध्याः
मुंचंति सत्वं विमलाग्रगोनगुड्डादिना तत्र न संशयोस्ति १३३ यत्रोपरसभागोस्ति रसे तत्सत्वयोजनं क
र्तव्यं तत्स्थूलाधिकाभिघ्नतानिश्चितात्मना १३४ ॐ इति योगतरंगिण्यां रसधातुशोधनमारणविधि
र्नाम पंचदशस्तरंगः १५ ॐ अथ स्वरसादि अथात्र स्वरसः कल्कः क्वाथश्च हिमफांटकौ ज्ञेया योके
याः पंचैते लघवः स्युर्यथोत्तरम् १ तत्र स्वरसकल्पना आहतात्तत्क्षणोत्कृष्टाद्द्रव्यात्क्षुण्णात्समुद्भवेत्

२९

सरात् ११७ इतिताम्रमारणम् दुग्धत्रयं कुमार्यैव गंगापुत्रेन्नसूत्रकं वटश्रुंगमजारक्रमेभिरभ्रं समर्दि
तं ११८ घातधापरितं भस्मजायते पद्मरागवत् निश्चंद्रिकं भवेत्तत्तु शुद्धदेहे रसायनं ११९ रोगान्हंति ह
ठ्यति वपुर्वीर्यं वृद्धिं विधत्ते नारुरायाद्भ्रमयति शतं योषितां नित्यमेव दीर्घायुष्कान्जनयति सुतान्सिंह
तुल्यप्रभावान्मृत्योर्भीतिं हरति च सदा सेव्यमानो मृताभ्रः १२० गौरी तेजः परममभ्रतं वातपित्तक्षयांत
प्रत्तोहेधिप्रशमितजरं वृष्यमायुष्यमग्र्यं बल्ये स्निग्धं रुचिरमकफं दीपनं शीतवीर्यं तत्तद्योगात्सकलगद
जित्योमसूतेवेधी १२१ वयस्तंभकारी जरामृत्युहारी बलारोग्यकारी महाकुष्ठहारी मृतो मेघनादः स्वयो
गेस्तुयोग्यः सदा सूतराजस्य तुल्यो गुणेन १२२ इत्यभ्रकमारणगुणौ व्याघ्रीकंदगतं वज्रं दोलायंत्रे वि
पाचितं सप्ताहं कोद्रवक्वाथे कौलत्थे विमलं भवेत् १२३ त्रिसप्तकृत्वा संतप्तं खरमूत्रेण सेचयेत् मत्कुणो।
स्तालकं पिष्ट्वा तत्कोले कुलिशं क्षिपेत् १२४ प्रध्मातं वाजिमूत्रेण सिक्तं पूर्वक्रमेण च भस्मीभवति तत्तूर्णं व
ज्रवत्कुरुते तनुं १२५ इतिवज्रमारणं वैक्रांतवज्रवच्छोध्यं ध्मातं तद्धयमूत्रके हिमं तद्भस्मसंयोज्यं वज्र
स्थाने विचक्षणैः १२६ इतिवैक्रांतमारणं यदंजननिभं क्षिप्रं बह्लो नो विकृतिं व्रजेत् वज्रसंज्ञो हितयोज्यं

नं रुचिकरं प्रज्ञाकरं शीतलं सौंदर्यैकविवर्द्धनं हृतजरं नीरोगताकारणं धातुस्थौल्यकरं क्षयक्षयकरं स
र्वे प्रमेहापहं वंगं भक्षयतो नरस्य न भवेत्स्वप्नेपि शुक्रक्षयः १११ इति वंगमारणगुणाः काष्ठं हस्तमितं शु
कप्रियभवं मूलं समानीय ततो संस्थाप्य भुजगं च मन्मयशुभे पात्रेण चुल्योपरि तत्राग्निं विदधीत धातुकु
शलैर्वैद्येन संचालितो या ग३वनाध्यायोयं
॥ताम्रपादांशतः सूतं तत्तुल्यं गंधकं क्षिपेत् कन्यारसे
न संपिष्टा ताम्रपत्राणि लेपयेत् ११३ निःक्षिप्य हंडिका मध्ये शरावेण निरोधयेत् हंडिकांय तुनापूर्य
पचेद्यामत्रयं भिषक् ११४ स्वांगशीतं विचूर्णाथ पवां तिदाह विवर्जितम् सर्वदोषहरं ताम्रं सर्वयोगेषु
योजयेत् ११५ अथान्यः प्रकारः सूक्ष्मं ताम्रदलं विमर्द्य पटुनाम्लारेण जंवीरजैर्नीरैर्घस्त्रमिदं त्रिगर्कप
यसा लिप्तं धमेत्सप्तधा निर्गुंडीतुहिमं रसेंद्रकलितं दुग्धार्कगंधेन तत्तुल्येनाथ मृतं भवेत्सउद्धृतं पंचा
मृतेन त्रिधा ११६ वांतिभ्रांतिविवर्जितं ज्वररुजः कुष्ठानि पांडुमयं शूलं मेहगुदांकुरानिलगदान् (कौतु) पाने
जैयेत गुंजामात्रमिदं ततो द्विगुणितं संशुद्धकायेन चेत्स्त्रोक्तं स्थौल्यजराविपत्तिशमनं पथ्याशिनो वत

सायनंवल्यंवृष्यंशीतंक्षयादिजित् स्वर्णंस्वर्णंसवर्णंवर्णंजनकंसर्वक्षयोन्मूलकृत्वल्यंवृष्यमनुत्तम
वीर्यमसत्कृत्स्त्रुद्दर्षनंव्येहरणं निःशेषामयसंघसंहृतिकरंतेजस्करंशुक्रकृच्चक्षूरोगजरापहंनवसुधा
पानोपमंप्राणिनां ९३ इतिस्वर्णमारणं विधायपिष्टिंसूतस्यरजतस्याथमेलयेत तालगंधसमं
पश्चान्मेलयेन्निंवुकद्रवैः ९४ द्वित्रिःपुटैर्भवेद्भस्मयोज्यमेतद्रसादिषु तारंशीतकषायमम्लमधु
रंदोषत्रयच्छेदनंस्निग्धंदीपनमक्षिकुक्षिगदजिद्दाहप्रमेहप्रणुत मेदोभेदिमदात्ययात्ययकरंकांत्या
युरारोग्यकृत्यक्ष्मापस्मृतिपांडुश्लूलपलितश्लीहज्वरध्वंसरं ९५ इतिरूप्यमारणगुणाः तालेनवंगोद
रदेनतीक्ष्णंनागेननिष्कंसिलयाचनागं गंधाश्मनाचैवनिहंतिशुल्वंतारंचमाक्षिकरसेनहन्यात ९६ राजरीतिंतथाघोषं नागम्रवन्मारयेद्भिषक् ९७ इतिरीतिकांश्यमारणम् त्रिभिःकुंभीपुटैर्नागो
वासारसविमर्दितः ससिलोभस्मतामेतितद्रजःसर्वमेहनुत ९८ इतिनागमारणं वंगंसतालमर्कस्य
पिष्ट्वादुग्धेनसंपुटेत शुष्काश्वत्थभवैर्वल्कैःसप्तधाभस्मतांव्रजेत ९९ आयुःप्रदानाबलवीर्यकर्तारो
गापहर्तामदनस्यकर्ता वंगेनतुल्यंनचकिंचिदन्यद्रसायनंश्रेष्ठतमंनराणां १०० वल्यंदीपनपाच

नं कांजिके स्विन्नः शुद्धः स्याद्विषतिंदुकः इति विषतिंदुकशुद्धिः अक्षाग्निदग्धं गोमूत्रे निर्वापितमयोमलं
एकं पृथक् सप्तवारं शुद्धं भवति सर्वथा ८१ इति किट्टशुद्धिः पादांशशालिसंयुक्तमभ्रं वध्वाच कंवले त्रिरा
त्रं स्थापयेन्नीरे तत्क्लिन्नं मर्दयेत्करैः ८२ कंवलाद्गलितं श्लक्ष्णं वालुकारहितं च यत् तद्धान्याभ्रमिति प्रो
क्तं सद्भिर्देहस्य शुद्धये ८३ इति धान्याभ्रकरणविधिः अथ विषशुद्धिः विषं तु खंडशः कृत्वा वस्त्रखंडेन
वद्धयेत गोमूत्रमध्ये निःक्षिप्य स्थापयेदातपे त्र्यहं ८४ गोमूत्रं तु प्रदातव्यं नूतनं प्रत्यहं बुधैः त्र्यहे गते
तदुद्धृत्य शोषयेन्न च पेषयेत शुद्धं त्येवं विषं सेवायोग्यं भवति चार्तिजित ८६ इति विषशुद्धिः कंकुष्ठं
गैरिकं शंखं कासीसं टंकणं तथा नीलांजनं शुक्तिभेदाः क्षुल्लकाश्च वराटिकाः ८७ जंवीरवारिणा खिन्नाः
क्षालिताः कोष्णवारिणा शुद्धिमायांत्यमी योज्याभिषग्भिर्योगसिद्धये ८८ इत्युपरसादिशुद्धिः रसस्य
भस्मना वाथ रसेनालिप्य वै दले हिंगु हिंगुलसिंदूरशिलासाम्येन मेलयेत ८९ संमर्द्य कांचनद्रावे
दिनं कृत्वाथ गोलकं तं भांडस्य तले दत्वा भस्मना पूरयेद्दृढं ९० अग्निं प्रज्वालयेज्जाढं द्विनिशं स्वांग
शीतले उद्धृत्य सावशेषं चेत्पुनर्देयं पुटद्वयं ९१ अनेन विधिना स्वर्णं निरुत्थं जायते मृतं एतद्रू

र्शोगुल्मसश्लूलपीनसक्रमीश्चासप्रमेहारुचीरास्रन्मूलयतिप्रभूतगुणाकृध्वोहंपरंमारितं ८२ इतिलोहमार।
णं॥ वैदसर्वस्वात शुद्धःस्यात्तालकःस्विन्नःकूष्मांडसलिलैस्ततः चूर्णोदकैःपृथक्तैलेभस्मीभूतोनदोष
कृत ८३ इतितालकशुद्धिः वीरणरसैःपिष्टाजयानीरैर्मनःशिला सप्ताहंस्वेदितःशुद्धोरसकोनरवारि।
णा॥ ८४ इति मनशिलारसकशुद्धिः अथजैपालशोधनं जेपालंरहितंत्वगंकुरसन्ज्ञातिमेलेमाहिषे
निक्षिप्तंत्र्यहमुष्णतोयविमलेखल्वेसवासोदितम लिप्तंनूतनखर्परेरुविगतस्नेहंरजःसन्निभंनिंबुकां।
बुविभावितंचवहुशःशुद्धंगुणाढ्यंभवेत ८५ इतिजेपालशोधनं ओतोविषासमंतुत्थंमक्षोदूंटंकणं।
शिग्रुकं त्रिधैवपुरितंशुद्धंवांतिभ्रांतिविवर्जितं ८६ इतितुत्थशुद्धिः विभाविताभेलाद्यैर्मेजरज्जंवीरवा
रिणा॥ मेषशृंग्यंबुनाद्वास्त्रंशुद्धःकर्कोटकाजलैः ८७ इतितारमाक्षिकशुद्धिः तुर्यांशशैंधवोपेतंमाक्षि
कंमर्दयेदढं वीजपूरांबु। नाद्यंसम्यक्पात्रेचलोहजे ८८ इतिस्वर्णमाक्षिकशुद्धिः अम्लद्रव्यद्रवैः
पिष्टोदरदोमाहिषेनतु दुग्धेनसप्तधापिष्टःश्लक्ष्णीभूतोविशुद्ध्यति ८९ इतिदरदशुद्धिः गोदुग्धत्रिफ
लाभृंगद्रवैःपिष्टंशिलाजतु दिनैकंलोहजेपात्रेशुद्धिमा यात्यसंशयं ९० इतिशिलाजितुशुद्धिः त्रिदि

द्रवद्रव्येष्वनुक्रमात् ७१ तैले तक्रे गवां मूत्रे कांजिके च कुलत्थके त्रिफलाक्वाथतोये च संशोध्याः सर्वधा
तवः ७२ इति स्वर्णादिसर्वधातुशुद्धिः स्यात्तीक्ष्णलोहयोः शुद्धिरजमेषपुरैस्त्रिभिः रंभाजलेन च स्वस्य
शिग्रुमूलत्वगेवुना ७३ पुनस्तप्तं हिमीभूतं वार्ह्लीकांबुनि तद्द्रजः भावितं मार्कवद्रावैः सप्तधा शुद्धितेततः
७४ मत्स्याक्षीसलिलेस्तावद्यावन्नीरैर्मृतिर्भवेत् तत्कुष्ठक्षयमंदाग्निपांडुकासादिकान्हरेत् ७५ नाशयं
त्यनुपानैःस्वैर्जरां च पलितं तथा शुद्धिमारणयोरैक्याद्दुक्कमेतन्नदूषणं ७६ इति रसरत्नप्रदीपात् शुद्धं हतं र
सं गंधकयोगतः संछेदेन वारितरमुत्स्यदिनप्रकाशं लोहं निहत्य निलपित्तवलासरोगान्नुक्त्वानुपानसहि
तेन हितायकस्य ७७ अथवा शुद्धं दाडिमजैः क्वाथैरनलेपक्कतोगतं सवरानारिभिः धर्वं नवसादरसंयुतैः
७८ तदर्धं गंधकं तस्याप्यर्द्धं सूतं नियोजयेत् कुमारीवारिभिः खल्वे मर्दितं गोलकीकृतं ७९ शुष्कमेरं
डैः पत्रैर्वेष्टितं तंतु भिस्तथा संपुटे स्थापयित्वा तं वेष्टितं चमरद्रावनः ८० कुशलधान्यमध्यस्थं दिनानि
किल विंशतिः उद्धृत्य च ततो लोहं चूर्णितं सुधयासमं ८१ सर्वामयहरं सम्यग्रसायनमनुत्तमं पांडुखं
डयति क्षयं क्षपयति से रायंक्षिणोति स्मरणात्क्वाशं नाशयति भ्रमं नमयति श्लेष्मा — मयान्खादति श्र

नांसगैरिकानांतुवरीयुतानां ६२ ससैंधवानांसमभागिकानांचूर्णाढकंचोपरितैर्निदद्यात् अम्लेनद
द्मामहिषीभवेनापिष्टंरसोनस्यशरावमेकं ६३ समक्रमेणात्र निधायखंडैर्धौरोदयेनवर्प्परजैर्विसंधिः
चूर्णप्रलिप्तोदरमर्द्धभांडेसंस्थाप्यसंमुद्य दृढंसचुल्ल्यां ६४ प्रज्वालयेद्वह्निमधःक्रमेणसंस्थाप्ययंत्रोपरिव
स्त्रमार्द्रं वह्निंप्रदद्यादिनषट्कमत्रतत्स्वांगशीतंपरिगृह्यबुध्या ६५ तंद्रोणपुष्पीपयसात्रपिष्टंकूप्यांविदध्या
न्नवसादरंच कर्षप्रमाणांप्रहरत्रयंचवह्निंप्रदद्याद्थशीतलांगी ६६ निष्काश्यकूपींसिकताख्ययंत्रादास्फो
ट्यकंठस्यमुखंप्रगृह्णात् कर्पूरनामारसनायकोयंवल्लःपुराणेनगुडेनभुक्तः ६७ निर्वातभाजासहजाच्चप
थ्यशीलेनकुष्ठामयनाशनस्यात् फिरंगकारिकेसरीसफलकुष्टकालानलोखिलव्रणविनाशकृद्गुणाजग
तेरतिप्रदः सवर्णसमवर्णकृद्दलतुलाशतेजस्करःसमस्तगदतस्करोरसपतिःसकर्पूरकः ६८ इतिकर्पूररसः
वौद्धसर्वस्वात् गुर्वेस्तुसर्वधातूनांपत्राणिकृत्वाअग्निमध्येआरक्तानिकृत्वाम्रुदस्ततंसमंतुस्पंदनक्वाथेन
सप्तधा भावयित्वान्यसेत्कूप्यांमुखेमुद्रांचकारयेत ६९ वालुकायंत्रमध्येतुयामार्कंज्वालयेद्दृढं रसक
पूरविख्यातोरवोटवत्तोभवेद्रसः ७० स्वर्णाद्याधातकःसर्वेद्रवीभूतास्तुयोजिताः शुध्यंतिवक्ष्यमाणेषु

इतिरसकपूररसः१

मासिकं शे लोस्यं गरलं मृगेन्द्र कुटिलोद्भूतं च तान्कालिकं ५५ इति लवणाभेदी सुधानिधिः उत्कृत्य मूलं
विषजं विदध्यात् कूर्मैस्य सूतं कनकांशपिष्टं संवेष्टयेत्कोलभवेन तं तु मांसेन पश्चाद्विपचेद्द्वियामं ५६ धत्तूर
बीजोद्भवतैलगर्भे संवर्द्धतां याति सुखस्थितो यं संभोगकाले दृढतां करोति वीर्यस्य दुग्धं भजतो नराणां ५७
इति हिरण्यगर्भगुटिका रसरत्नप्रदीपात् सूतः पंचपलः स्वदोषरहितस्तत्तुर्यभागो बलिर्द्वौ टंकौ नवसाद
रस्य तु वरीकर्षं च संमर्दितः कूप्यां काचकृते स्थितश्च सिकतायंत्रे त्रिभिर्वासरैः पक्वो वह्निभिरुद्भवत्यरुणा
भासिंदूरनामा रसः ५८ वाते सक्षौद्र पिप्पल्यपि च कफरुजि त्र्यूषणं चाग्निचूर्णं पित्ते सैला सितास्याद्रुणा
वति बृहती नागरार्द्रामृतांश पुष्टौ सान्द्या त्रियामा हरनयन फला शाल्मली पुष्पवृत्तं किंवा कोंतालला पा
भरणारसपतेस्यादनूपानमेतत् ५९ अपनयति गिरोगवृंदं दृढयति कायं महद्बलं कुरुते पुत्रशतानि च सूते
सिंदूराख्यो रसः पुंसां ६० स्मरस्यायुर्नानागददहनदावानलशिखासखा वह्नेस्तेजोबलरुचिरता बह्निसु
दिरः अपिप्रौढस्त्रीणामतुलबलहारी निधुवने रसः सिंदूराख्यः सकलरसराजो विजयते ६१ इति वसंतरा
जातरसः सिंदूररसः यंत्रेस्तसिद्धे उ महासमाख्ये निधाय सूतस्य पलानि पंच वल्मीकमृत्स्नाखरिकेषिका

राज्ञेनदधित्यजे चूर्णमेंगेप्रदेयोयंमंत्रल्लवणामीशजः ४६ प्रध्मातःशनकैर्वेधोरसोभवतिनान्यथा वज्रा
स्थोवपुषस्थैर्यंकरोत्यखिलरोगजित ४७ इतिरसबंधनं अथअन्यःप्रकारः राजिकाकलिनीकंदतुलसीरक्त
चित्रकैः [illegible] मुखाले पत्नवर्तेव्योसरागार्दे वछ.सतकः ४८ सास्योरसःस्यात्पटुशिग्रुरूत्यैः रसाजिकैःशोष
णकैःस्त्रिरात्रं पिष्टस्तथास्विन्नतनुःसुवर्णमुखोनयंखादतिसर्वधातून् ४९ इतिमुखकरणं अजीर्णना
शायसुभूर्यपत्रेस्वेद्यस्त्रिरात्रंपटुकांजिकेथ मात्राधिकश्चेत्समतामुपैतियावन्नतावद्रसनाधिकारी ५०
इत्यजीर्णनाशनं सच्छिद्रंसलिलापूर्णंभांडवक्त्रेसरावकं दत्वाछिद्रेपचेन्मुखादेयानीराविर्योगिनी ५१ त
स्यांविडावृतःसूतोदेयोलोहाव्हतेमुखे शनैर्ध्मातोग्रसत्येषःकांचनंसूस्मतांगतं ५२ स्वपुंसपित्ताप्य
नेशनैर्दयंसमावधिः देहार्थेधातुवादार्थेप्रयच्छेत्यल्पबुद्धयः इतिसुवर्णजारणं ५३ पिष्टंपा[.]ऽश्मपटुप्र
गाढमम्लेवज्रौअनावैकसःसूतंधातुयुतंपटीकवलितंतस्मेप्टेरोधयेत् अंतस्थंलवणास्यतस्यचतले
प्रज्वाल्यवह्निंहठात्धस्तंग्या[.]हामयेदुकुंरधवलेमस्मोपरस्थेशनैः ५४ तद्भस्माछितयेल्लवंगसहितं
प्रातःप्रभुक्तेचयेरुदेरेचयतिछियाममसकृत्पेयंजलंशीतलं एतद्भतिचवत्सरावधिविषंषण्मासिकं।

पक्वनाशनस्य संमर्द्य गाढं सकलेस्मभांडे तो काच्जलीकाचक्कतेनिदध्यात् ३५ संरुध्यमल्लकर्पटकैर्द्दटीं।
तां मुखे सच्चूर्णां गुटिकां च दत्वा क्रमाग्निना त्रीणि दिनानि पक्वा ततो वालुकायंत्रगतो ततः स्यात् ३६ वे
धूक ९ ष्या रुणामीशजस्य भस्म प्रयोज्यं सकलामयेषु निजानुपानैर्मरणं जरां च हृत्यस्य वस्त्रक्रमसे
वनेन ३७ निखिलक्षयभ॰ क्ष णादस्ततं व्रणाकुष्टभगंदरमेरुहरं वलधीधृतिशुक्रसमृद्धिकरं रस
भस्म समस्तगदापहरं ३८ इति भस्मसूतः ईष्टकायां सुपक्वायां सुखातं चतुरंगुलं कृत्वा काचेन सं
लिप्तं तस्यां तः पिष्टिकां क्षिपेत् ३९ निवूद्रवार्द्रगंधोस्य देयो मृद्धिंद्धि कार्षिकः मुखे संरुध्य सुष्के यदर्द्ध
स्थावपुटं ततः ४० शीते तस्योपरि भिन्नः पुटं देयं ततोधिकं एवं द्वित्रिचतुः कार्या यावज्जीर्यति गंधकः ४१
जीर्णो भिनस्तथा देयो यावज्जीर्यति षड्गुणः मूर्छितो विधिनानेन भवत्येव रसेश्वरः ४२ इति रसमूर्छनं
जंवीरनिंबुनीरेण मर्द्दितो हिंगुलुर्दिनं ऊर्ध्वपातनयंत्रेण ग्राह्यस्यान्निर्मलो रसः ४३ कंचुकैर्नागवं
गाद्यैर्विमुक्तो रसकर्मणि योज्यः सां वपुट स्विन्नः पूर्वाभावे भिषग्वरैः ४४ इति हिंगुलाकृष्टिः वलाद्रख
भूधात्रीसस्यध्रीजिह्विकां बुभिः मर्द्दितस्तूर्यभावैंन गंधकेन समन्वितः ४५ वेष्टितो हिंगुना फल्गुक्षी

णानि २६ इतिरसचिंतामणिः सदुग्धभांडस्थपटस्थितोयंसिद्धोभवेत्कूर्मपुटेनगंधः आभ्यांकृताक
ज्वलिकानुपानैःसर्वामयघ्नौरसगंधकाभ्यां २७ इतिगंधकशोधनं शुद्धाविशुद्धोथयह जीर्णा गंधो
दीप्तिप्रदःकांचनमृगारक्षः वदंतिचैनंत्रिविधंस्तुवद्धंसंमूर्छितंचापिमृतंरसेंद्रं २८ मूर्छांप्रपन्नोहरते
चरोगान्वद्धस्तथाखेचरतांददाति मृतोमृतिंनाशयतिप्रकर्षाज्जीयादृसेंद्रोगणितप्रभावः २९ मू
र्छादिकर्मेलितयंस्तुखंचसृताढलेःषड्गुणजारणांच अजीर्णनाशंचयथातथंचब्रूमोस्यरूपंप्रति
भानुरूपे ३० सूतप्रमाणांसिकतारव्ययंत्रेदत्वावलिंमर्द्दघटितेल्पभांडे नैलावशेषेत्ररसेनियुंज्या
न्मग्नार्द्धकायंप्रतिलोकभूयः ३१ आषड्गुणांगंधकमल्पमल्पंक्षिपेद्रसौजीर्णवलिर्वलीस्यात रसे
षुसर्वेषुनियोजनीयमसंशयंहंतिगदंजवेन ३२ इतिषड्गुणगंधकजारणविधिः अथान्यःप्रकारः
विलोलितेस्वर्णजलेर्विशुष्केवस्त्रेयदत्वानवनीतगर्भे चूर्णंशिलागंधकतालकानांसपन्नगानां
समभागिकानां ३३ कर्षप्रमाणांचततोऽस्यवर्तिंप्रज्वालयेत्तज्जलितंघृतंस्यात अनेनकुर्याद्रस
नायकस्यसर्वत्रपिष्टिंवलिजारणाय ३४ इतिपिष्टीकरणं भागोरसस्यत्रयएवभागागंधस्यभागः

वलीपलितखालित्यंवारिदोषात्प्रजायते १५ दद्रूश्चगजचर्माणि करोत्येवकपालिका कामलांपांडुरोगंचत
थाकुष्ठंजलोदरं १६ प्रमेहंश्वेतकुष्ठंचकुरुतेश्यामकंचुकः ममेढ्रेदंवस्तिशूलंकालीकुर्यादसंशयम् १७
कापालीवीर्यहानिंचकुरुतेतान्निवारयेत् मूर्छयेद्वह्निसंयुक्तोमलयुक्तश्चतापयेत् १८ तेजोनाशंचभद्रो
षोपुन्मत्तश्चांगभंजनम् कुर्याज्ज्वाड्यंशैलदोषस्तस्मात्तंशोधयेद्रसं १९ रसश्चतुर्विधोज्ञेयोब्रह्मक्षत्रि
विडंत्यजः श्वेतोरक्तस्तथापीतःकृष्णोवर्णाद्विधीयते २० ब्राह्मणःकल्पतेकल्पेगुटिकायांचवाहुजः
धातुवादेतथावैश्यःशूद्रश्चेतरकर्मणि २१ सूतःशोध्योनिशायांमस्तिनिचयकेपिष्टकेचेष्टकायाःधूम्र
लिपाकृतोयेप्यथितुलसिरसेशूरणोशिग्रुपाके वन्हीदुग्धेर्कदुग्धेलुतभजिलशुनेचापिपालाशपंकेसो
ध्यौषधःपानतैलशुनपटुमतिस्वेदयेत्कांजिकेच २२ दिनद्वयंदिनद्वंप्रमर्दयेद्रसाधिपंसमीरितौषधंप्रति
प्रहृष्टमानसोभिषक् २३ एकेनत्रलशुनेनापिशुद्धोभवतिपारदः तम्रखल्वेमासमेकंपिष्टोलवणसंयु
तः २४ सूतेपादमितंसर्वंमक्षिपिच्छौधनौषधम् अष्टमांसंपुनःकेपिकथयंतिमनीषिणः २५ सहा
स्त्रनिंबूफलतोयघृष्टोरसोभवेद्वह्निसमप्रभावः सत्र्योषराजीलवणःसचित्रःसतामदोविंशतिवासे

मल दूषन बल पतेति भिः ३

षिमेत्रपूतोकर्मारभेस्वेदे रसस्यतद्भः ५ निशेषिकाधूमरजोम्लपिष्टोविकंचुकाःस्या(निवृद्भवै)द्दिवसेन(हकेनदिवसेन)सूतः व
रारनालानलकंन्य(चित्रक्रुम्भारि)काभिःस ऋषराणाभिर्मर्दितस्तुसूतः ६ स्विन्नोवराहेरथदोलिकायांदिनेमलाद्दे
रहितस्त्रिभिःस्यात तत्र्यंशतान्नेरणविमर्द्यसूतंतेजे वीरनीरेणततःप्रगाढ ७ संरुध्यभांडद्वयगर्भमा
ध्येपिष्टिंततःसंपुटमत्रणांतत निवेशयच्च [redacted] ल्लांतुशनैःप्रदीपप्रमाणमग्निंचतलेप्रदध्यात ८
ततःशिरस्य(भांडस्य)स्यजलार्द्रमेकंवस्त्रंक्षिपेत्स्वल्पमनुक्षमेव बारत्रयेणोरग [redacted] वंगसंज्ञोनस्तःप्रदिष्टोह्यप
मूर्द्ध(नामैः)पातः १० कदर्थनेनैवनपुंसकत्वंप्राप्नुर्भवेत्स्यरसस्यपश्चात वलप्रकर्षाय(रसस्य वलकारणाय)चदोलिकायांस्वा
द्योजलेसैंधवचूर्णगर्भे १० वंध्याहि(सपर्मूष्टि)नेत्रीभुजमार्कवानांसति(त्रिवा दिपतीरा)क्काना(ं)द्रवसंप्रपक्के स्विन्नःस्थिरत्वंल
भतेम्नितोयेसकांजिके दीप्तगुणोऽस्तितीक्ष्णः ११ इतिरसरत्नप्रदीपानरसशुद्धिः उक्तंच सत्याषाणाज
लाख्याश्चत्रलीकोपालिकातथा श्यामाकपालिकाचेतिपारदेसप्तकंचुकाः १२ मलदोषोवह्निदो
षोमहदोषोन्मतदोषकौ शैलदोषश्चपंचैतेदोषाःसूतेसमीरिताः १३ मद्रूपश्चाश्मरूपश्चजलरूपः
पयोनिभः पंचवर्णाःकृष्णवर्णाःस्तिलवर्णाश्चकंचुकः १४ मन्मयात्कंचुकात्कुष्ठंजाड्यंपाषाणादोषतः

तःसव्यतःसारमेयश्चक्रीवानाप्रवस्तुःशापरिदधिपयोरूप्यगोमाग्रमेषाः प्रेतोनीरोदनश्चज्वलदनला।
शिखाश्वेतवस्त्रोध्वजोवाचिन्नेशास्तेत्रसिद्धिःप्रभवतिभिषजोनान्यथाकिंचिदुक्तैः १० इतिशाकुनाः अ
थस्वप्नाः स्वप्नास्तुप्रथमेयामेसंवत्सरविपाकिनः षड्भिर्मासैर्द्वितीयेतुत्रिभिर्मासैस्तृतीयके ११ अरुणो
दयवेलायांदशाहेनफलप्रदाः आरोहणंगोहयकुंजराणांप्रासादशैलाग्रवनस्पतीनाम् विष्ठानुलेपोरु
दितंमृतंचस्वप्नेषुगम्यागमनंचधन्यम् इतिस्वप्नाः ॐ इतियोगतरंगिण्यांदूतपरीक्षादिकथनंना
मपंचदशस्तरंगः १५ ॐ अथधातुशोधनं तत्रप्रथमंपारदः जयेदयंसंहितयापजैयानेगदान्म
हापातकूजानरसोन शुद्धस्ततःशोधनमस्यकार्यमार्यैरशुद्धेनसुखायसूतः १ श्वेतःसनीलोवहिरु
ज्वलोगोमध्याह्नसूर्यप्रतिमप्रकाशः शस्तोथधूम्रःपरिपांडुरश्चचित्रोथैयोज्योरसकर्मसिद्धै २ स्वाभा
विकाःसंत्यगुणारसेस्मिन्नागादिवंगादिकनामधेयाः नागाद्भवेद्युगलगंदरोगाःकुष्टंचवंगान्मरणं
विशेष ३ मलेनमूर्छादहनेनदाहोवीर्यच्युतिःस्याद्सह्यचलत्वात् स्यात्कंचुकाज्जाड्यमथोदरारिण
ततोविशुद्धोभिमतोरसेंद्रः ४ शुभेह्निकुंडिंपरिचिंत्यसम्यक्कुर्यात्कुमारींवटुकार्चनंच विधायरक्षांवि

अथदृक्परीक्षा रूक्षाधूम्रा तथारौद्री चंचला चांतर्ज्वलंत्यपि दृष्टिर्यदा नदा वातरोगं रोगविदो विदुः १ दीप
द्वेषं च संतप्तं पीतं पित्ते चलो चनं जला ढ्या ज्योतिषा हीनं स्निग्धं मंदं कफेनतत् २ द्वंद्वदोषे भवेन्मिश्रवर्णं त
र्णं विलोचनं श्यामवर्णं च निर्भुग्नं तंद्रा मोहसमन्वितम् ३ रौद्रं च रक्तवर्णं च भवेच्चक्षुः त्रिदोषके एकं
चक्षुर्यदा भीमं द्वितीयं तिमितं भवेत् ४ त्रिभिर्दिनैस्तदा रोगी सयाति यममंदिरं ज्योतिर्विहीनं सहसा रो
गिणो यस्य लोचनं ५ ईषत्कृष्णं सनियतं प्रयाति यमसद्मनि सरक्तं कृष्णवर्णं च रौद्रं च प्रेक्षते तथा ६
इति लिंगैर्विजानीयान्मृत्युरेव न संशयः एकदृष्टिस्चैतन्यो भ्रमुत्स्फुरिततारकः ७ एकरात्रेण नियतं
तं परलोकं प्रयं अजेत यामलात शुष्कोष्ठः श्यामकोठो प्यसितरदनतिः शीतनासाप्रदेशः शोणाक्षश्चे
कनेत्रो ललितकरपदः श्रोत्रपातित्ययुक्तः शीतश्वासोऽथ वोष्णश्वसनसमुदयः शीतगात्रः सकंपः सोद्वे
गो निःप्रपंचः प्रभवति मनुजः सर्वथा मृत्युकाले ८ अथ शकुनाः यानेमातंगविप्रास्तुरगावृषफलछत्र
मांसोदकुंभा योषित्पुत्रान्विता वा स्वरभिरपि तथा खंजरीटा मयूराः वीणा भेरी मृदंगांबुजपटहरवा वेद
मांगल्यघोषाश्चाघोषा सिद्धान्नभूमृत्कुसुमपरवधू चंदनाद्याः प्रशस्ताः ९ एताः काकोपसव्येशुभ उबकथि

छांसशास्तोपरदिशिनग्नषांगारभस्मादिसंस्था रक्तस्रक्गंधवस्त्रास्तृणालग्गुडदलछेदिनःपंकतैलाभ्यंक्ता
वैद्योजनासालकानिहितकारयेचविक्षिप्तकेशा २ रसमंजर्यात् दूतोरक्तकषायकृष्णवसनोदंडीजटी
मुंडितोतैलाभ्यक्तवपुर्भयकरवचोदीनोश्रुपूर्णोक्षणः भस्मांगारकपालपांशुमुशलीसूर्येस्तगेव्याकुलो
यःशून्यस्वरसंस्थितोगदवतोदूतस्तुकालोनिलः इतिदूतलक्षणं अथमलपरीक्षा रुद्रतंत्रात् त्रुटि
तंफेनिलंरुक्षंधूम्रमलंवाततोमतं हरित्पीतंचदुर्गंधिपित्ताद्रश्लेष्मभवेत् ४ शीतंशुक्लंमलंसांद्रंस्नि
ग्धंस्यात्कफकोपतः वातश्लेष्मविकारेचजायतेकपिसंमलं ५ बद्धंसंत्रुटितंपीतंस्यामंपित्तानिला।
द्भवेत् पीतस्यामंश्लेष्मपित्तादीषत्सांद्रंचपिच्छलं ६ श्यामंत्रुटितपीताभंबद्धश्वेतंत्रिदोषतः दुर्गंधः
शिथिलश्चैवविष्ठोत्सर्गोयदाभवेत् ७ तदांजीर्णामलंवैद्यैर्दोषज्ञैःपरिभण्यते कपिलंगुटिकायुक्तं
यदिवर्चोविलोक्यते ८ प्र क्षीणामलदोषेणदूषितःपरिकथ्यते सीतंमहत्पूतिगंधंमलंसेयेजलो
दरे ९ श्यामंक्षिपेत्वामवातेपीतंसकटिवेदने अतिकृष्णंचातिशुभ्रमतिपीतंमथारुणं १० मरणाय
मलंकिंतुभस्मशोषेमत्यवेध्रुवं ॥ इतियोगतरंगिण्यांमलपरीक्षणंनामचपेदशस्तरंगः १३ ॥

दा विंदोः प्रसरः संप्रजायते आरोग्यता तदा नूनं पुरुषस्य न संशयः १९ वारुण्यां प्रसरेद्विंदुः सुखारोग्यं तदादि
शेत् ईशान्यां वर्द्धते विंदुर्ध्रुवं मासेन नश्यति २० आग्नेयां तु तथा हेतेयं नैऋत्यां प्रसरेद्यदा छिद्रितं च भवेत्पश्चा
द्ध्रुवं मरणमेव च २१ वायव्यां प्रसरेद्विंदुः सुधायोपि विनश्यति विकाशितं मत्स्यकूर्मं सोरिभाकार संयुतं २२
कारंडमंडले वापि नरं स्त्रद्धविवर्जितं गात्ररंडं च शस्त्रं च वरवं मुशलपट्टिशे २३ शरं च लकुटं चैव वैत्रिचक्रः पथि तथैव
विंदुरूपं नरं दृष्ट्वा न कुर्वीत क्रियां क्वचित् २४ हंसकारंडनागो कमले गजचामरं छत्रं तोरणं रसांहर्म्यं संपू
र्णो दृश्यते यदि २५ आरोग्यता ध्रुवं ज्ञेया तदा कुर्यात्प्रतिक्रियां तैलविंदुर्यदा सूत्रे चालनी सदृशो भवेत्
२६ कुलदोषो ध्रुवं ज्ञेयः प्रेतदोषसमुद्भवः नराकारं प्रजायेत किंवा स्यान्मस्तकद्वयं २७ भूतदोषं विजा
नीयाद्भूतविद्यां तदाचरेत् ॐ इति योगतरंगिण्यां मूत्रपरीक्षाकथनं नाम द्वादशस्तरंगः १२ ॐ अथ
दूतविचारः सुज्ञातः शुद्धवेषो द्विजातियुतकरः सत्रियो बालको वा तांबूलता ढ्यः सुशीलः शुभवचन
वक्ता स्यात्प्रशस्तोत्र दूतः शस्त्रायोषिन्न दैत्येन च जन युगलं नांगहीनो न रोगी शोकार्तो वा रुदंतं
वान्तहतपतितभ्रष्टशास्त्राई वा रोगः १ आग्नेय्यां विश्रमे घोवेलिप्रथम दिशं पश्चिमा मुत्तरां वा शंभो को
नु

नानावर्णस्वरूपेस्मिन्नुद्वेगोजायतेमहान् पादेगुल्फेचजठरेविनष्टेमृत्युमादिशेत् अर्द्धवर्षेणावर्षेणात्रमाद्
र्द्धयेनचे विनष्टेदक्षिणोबाहौस्ववंधुर्म्रियतेध्रुवं ९ वामेबाहौतथाभार्याविनश्यतिनसंशयः उरोदक्षिण
वाहुभ्यांविनाशेमृत्युमादिशेत् १० अशिरोमासमरणंविनाजंघेदिनाष्टकम् अष्टभिःकंधराणांनाशेछायालो
पेनतत्क्षणात् ११ इतिछायापुरुषविचारः अथमूत्रपरीक्षा परीक्षाविधिवत्कार्यारोगिमूत्रस्यतत्वतः
तस्मिन्दत्वातैलस्यविंदुंतत्रातिलाघवात् १२ विकाशिचेत्तैलमथाशुमूत्रेसाध्यःसरोगीनविशिचेत्त — का॰५
त् स्यात्कष्टसाध्यस्तलगेत्वसाध्योनागार्जुनेनैवकृतापरीक्षा १३ नीलंचरूक्षंकुपितेचवायौपीतारुणंतै
लसमंचपित्ते स्निग्धंकफात्स्वल्वलवारितुल्यंस्निग्धोष्णरक्तंरुधिरप्रकोपात् १४ मातुलुंगरसाभासंसौवी
राभंजलोपमं प्रपाकरहितानांचमूत्रंचंदनसन्निभं १५ अजीर्णप्रभवेरोगेमूत्रंतंडुलतोयवत् नवज्वरे
धूम्रवर्णबहुमूत्रंप्रजायते १६ पित्तानिलेधूम्रजलाभमुष्णंश्वेतंमरुत्श्लेष्मणिबुद्बुदाभं तत्श्लेष्मपित्तेकलु
षंसरक्तंजीर्णज्वरेस्यात्सदृशंचपीतं १७ स्यात्संनिपातादपिमिश्रवर्णंतूर्णंविधिस्तेनविचारणीये — रामः
पूर्वस्यांवर्द्धतेविंदुर्यदाशीघ्रंसुखीभवेत् दक्षिणामांज्वरोनेयस्तथारोग्यंक्रमाद्भवेत् १८ उत्तरस्यांय

यद्दावस्त्रेमवेद्भृधसदितानालर्केरमः नद्दादीर्धः
भवेद्रोगोमत्यतेशवगंधकः ३

परीसेज्व१

जानी पार्क धतोवेयो निश्च
यातष्ट्रुध्वंसजेति छि: १

तद्दवलिप्राप्नोतिवस्त्रेतिष्ठतिनिश्चितं १ वातपित्तकफानांच द्विस्त्रिदोषस्यलक्षणां जायोनीद्रोतोवस्त्रेवे।
द्योवैवंशशुद्धजः २ वातेवस्त्रेसौरभंघ्राणातःस्यात्सौष्यंपैत्तेमत्स्यतुल्यंविगंधं पीकास्योराश्लेष्मरागःसंप्र। छि: पाकं धातो २
कोपाद्वंद्वेदद्धातुल्यरोगस्येकताच ३ अथजिह्वापरीक्षा पीताजिह्वाखरस्पर्शास्फुरितामारुताधिके रक्तार्स
माभवेत्पित्तेकफेशुभ्रातिपिच्छला ४ कृष्णासकंटकाशुष्कासन्निपाताधिकेतुसा मिश्रितेमिश्रिताज्ञेयाशि। मत्पुरस्तकेष
ष्ठैक्ष्मरावर्जिता ५ ॐ इतियोगतरंगिरापांवस्त्रादिपरीक्षाकथनंनाम दशस्तरंगः १२ ॐ अथछायापुरु
षलक्षणम अथातःसंवक्ष्यामिछायापुरुषलक्षणं येनविज्ञानमात्रेणत्रिकालज्ञोभवेन्नरः १ कालोद्गा।
स्थितश्चापियेनोपायेनलक्ष्यते तमहंसंवक्ष्यामियथोद्दिष्टंशिवागमे २ एकांतेविजनेप्रातःस्नात्वादित्यंच
पृष्ठतः निरीक्षेतनिजांछायांकंठदेशेसमाहितः ३ ततश्चाकाशमीक्षेततनःपश्यतिशंकरं ॐ ह्रीं परब्रह्मणो
नमः इतिमंत्रः अष्टोत्तरशतंजप्त्वाततःपश्यतिशंकरं ४ शुद्धस्फटिकसंकाशंनानारूपधरंहरम षण्मासा
भ्यासयोगेनभूचराणांपतिर्भवेत ५ वर्षद्वयेनहेनाथकर्ताहर्तास्वयंप्रभुः तद्रूपंकृष्णवर्णंयःपश्यति।
व्योम्निनिर्मले षण्मासान्मृत्युमाप्नोतिसयोगीनात्रसंशयः पीतेव्याधिभयंरक्तेनीलेहत्याविनिर्दिशेत

ईषत्तिर्यग्भवतिशीघ्रायां द्विवचनं आदरेवीप्सा ॥२॥

इतेचातिवेगतः स्थित्वास्थित्वा तथानाडीसन्निपातेभवेद्ध्रुवम् ॥ वक्रहारीतात् स्पंदतेचैकमानेनत्रिंशद्वारंय
दाधरा स्वस्थानेनूनंतदानूनं रोगीजीवतिनान्यथा ११ स्थित्वास्थित्वावहतियासातेयाप्राणघातिनी जिह्वा
जिह्वंकुटिलंकुटिलं व्याकुलंव्याकुलंवास्थित्वास्थित्वावहतिधमनीयातिनाशंचसूक्ष्मा नित्यंकंठेस्फुरति
पुनरप्यंगुलीः संस्पृशेद्वाभावैरेवंबहुविधनरैस्संनिपातादसाध्या १२ पूर्वंपित्तगतिंप्रभंजनगतिंश्लेष्माण
माबिभ्रतीस्वस्थानाद्भ्रमणंमुहुर्विदधतीचक्राधिरूढेवया भीमत्वंदधतीकलापिकतिका सूक्ष्मत्वमातन्
न्वतीनोसाध्यांधमनींवदंतिमुनयोनाडीगतिज्ञानिनः १३ गंभीरायाभवेन्नाडीसाभवेन्मांसवाहिनी ज्व
रवेगेनधमनीसोष्णावेगवतीभवेत् १४ कामात्क्रोधाद्वेगव[redacted]हासीराणचिंताभयाकुला मंदाग्नेःक्षी
णधातोश्चनाडीमंदतराभवेत् १५ असृक्पूर्णाभवेत्कोष्णा गुर्वीसामागरीयसी लघ्वीवहतिदीप्ताग्नेस्त
थावेगवतीमता १६ चपलाक्षुधितस्यापितृप्तस्यवहतिस्थिरा शीघ्रानाडीमलापातेदिनोर्द्धेग्निसमोज्व
रः दिनैकंजीवितंतस्यद्वितीयेम्रियतेध्रुवं मरणेमृतकस्यैवमभवेदेकदिनेनच १७ ॥ इतियोगतरंगि
ण्यांनाडीपरीक्षानाम पंचदशस्तरंगः ११ ॥ अथवस्त्रपरीक्षा ज्वरव्याप्तशरीरस्यउष्माभवतिदारुणा

सदृशे समान प्या फैलना ग्रंथिरूप
निस्तोदी पवनाद्दस्रक् २१ विस्रता स्याव पीताभं कोस्रं पित्तेन जायते मंदगं वलंहेस्निग्धं मांसपेसीनिभं कफा
त् २२ द्विदोषदुष्टं संसृष्टं त्रिदुष्टं पूतिगंधिकं सर्वलक्षणसंपन्नं कांजिकाभं च जायते २३ विषदुष्टं भवेत्कृष्ण
विस्रं कांजिके तिक्तः वं नासिको न्मार्गगं तथा दुर्गंधिकांजिशंकासं सर्वकुष्टकरं भवेत् २४ इतिशार्ङ्गधरात ःः इतियोगतरंगि
ण्यां रुधिरमोक्षविधिर्नामैकादशमस्तरंगः ःः अथनाडीपरीक्षा सद्यस्नातस्य भुक्तस्य तथास्नेहावगाहिनः
क्षुत्तृषार्तस्य सुप्तस्य सम्यक् नाडी न बुध्यते १ अंगुष्ठमूलमार्गे या धमनी जीवसाक्षिणी तच्चेष्टया सुखं दुः
खं ज्ञेयं कायस्य पंडितैः २ स्त्रीणां भिषग्वामहस्ते पादे वामे च यत्नतः शास्त्रेण संप्रदायेन तथा स्वानुभवेन
वै ३ एकांगुलं परित्यज्य हस्तादंगुष्ठमूलतः परीक्षेद्दक्षवच्चासावभ्यासादेव जायते ४ अग्रे वातवहा ना
डी मध्ये वहति पित्तला अंते श्लेष्मविकारघ्नी नाडी ज्ञेया सदा बुधैः ५ सर्पजलौकादिगतिं वदंति विबुधाः प्रभंज
नेन नाडीं पित्तेन काकलावकमंडूकादिकांस्तथा चपलां ६ राजहंसमयूराणां पारावतकपोतयोः कुक्कुटस्य ग
तिं धत्ते धमिनी कफसंगिनी ७ मुहुः सर्पगतिं नाडी मुहुर्भेकगतिं तथा वातपित्तसमुद्भूतां तां वदंति विचक्षणाः
वर्गी ८ सर्पहंसगतिं तद्वद्वातश्लेष्मगतिं वदेत् हरिहंसगतिं धत्ते पित्तश्लेष्मान्विता धरा ९ काष्ठकुट्टो यथा काष्ठं कु

रक्तपित्ते रक्तस्रावः प्रशस्यते एषु रोगेषु शृंगैर्वा जलौकालाबुकैरपि ९ अथवापि शिरावेधैः रक्तमोक्षः प्रशा
स्यते पंचकर्मविशुद्धस्य पीतस्नेहस्य चार्शसां १० सर्वांगशोथयुक्तानामुदरश्वासकासिनां दुर्बलानां सार
कुष्ठानां पांडूनां स्विन्नदेहिनां १० ऊनषोडशवर्षस्य गतसप्ततिकस्य च आघातस्रुतरक्तस्य शिरामोक्षो न शा
स्यते ११ गृह्णाति शोणितं शृंगं दशांगुलमितं बलात् जलौका हस्तमात्रं तु तुंबं च द्वादशांगुलं १२ पदमंगुलमा
त्रं तु शिरा सर्वांगशोधनी रक्ते दुष्टेव शिष्टे पि व्याधिर्नैव प्रकुप्यति १३ अतः स्वास्थ्यं सावशेषं रक्तेनातिक्रमो
मतः अंध्यमाक्षेपकं तृष्णां तिमिरं चाशिरोरुजं १४ पक्षाघातं श्वासकासौ हिक्कां दाहं च पांडुतां कुरुतेतिस्रुतं र
क्तं मरणं वा करोति हि १५ देहस्योत्पत्तिरसृजा देहस्तेनैव धार्यते विना तेन व्रजेज्जीवो रक्षेद्रक्तमतो बुधः १६
शीतोपचारैः कुपिते स्रुतरक्तस्य मारुते कोष्णेन सर्पिषा शोथं सव्यथं परिषेचयेत् १७ क्षीणस्य रक्तस्रावेण शशो र
क्तहरिणच्छागमांसजः रसः समुचितः पाने क्षीरं वा षष्टिकाहिता १८ पीडाशांतिर्लघुत्वं च व्याधेरुद्रेकसंक्ष
यं मनःस्वास्थ्यं भवेच्चिह्नं सम्यग्विस्राविते सृजि १९ व्यायाममैथुनक्रोधशीतस्नानप्रवातकान् एका
सने दिवानिद्रां क्षाराम्लकटुभोजनं २० शोकं वापि मदाजीर्णं त्यजेद्यावद्बलो भवेत् फेनिरुक्षं भवेत्स्वी

खुरशृंग कर्कटास्थि शुष्कमत्स्यवस्त्ररक्तमिप्रभृति
भिः वामनीयैश्च वामनीयेति शुश्रुतोक्तिः॥१॥१ ॥

चर्मार्घ दद्याद्धूमस्य पानकं व्रणो निंबवच्चादं च धूमदानं प्रशस्यते १३ अन्येपि धूमा गेहे षु कर्तव्या रोगशांतये म
यूरपिच्छं निंबस्य पत्राणि वृहतीफलं १४ मरिचं हिंगु मांशी च बीजं कर्पाससंभवं छागरोमाणि निर्मोकं विष्टा वै
डालकी तथा १५ गजदंतस्य चूर्णं हि किंचित्तद्वत विमिश्रितं गेहेषु धूपनं दत्तं सर्वान्बालग्रहान्जयेत् १६ पिशाचा
न्राक्षसान्हत्वा सर्वज्वरहरं भवेत् इत्यपराजितो धूमः नेत्राणि धातुजान्याहुर्नलवंशभवान्यपि १७ चतुर्विंश
त्यंगुलानि खंडानि त्रीणि युक्तितः योजितानि त्रिखंडैर्येन नलिका नेत्रसंज्ञका १८ इति योगतरंगिण्यां धूमपा
नविधिर्नाम दशमस्तरंगः ॥ अथ रक्तस्रुतिः शरत्काले स्वभावेन कुर्याद्रक्तस्रुतिं नरः त्वग्दोषग्रंथिशो
फाद्यानस्पूरक्तस्रुते र्यतः १ विस्रता द्रवता रागः चलनं विलयस्तथा भूम्यादिपंचभूतानामेते रक्ते गुणाः
स्मृताः २ इंद्रगोपप्रतीकाशं यं प्रकृतिस्थमसंहतं अन्यत्सर्वमशुद्धं हि विज्ञेयं रुधिरं नृणां ३ शोथे दाहेंगपा
के च रक्तवर्णे सृजःस्रुतौ वातरक्ते तथा कुष्ठे सपीडे दुर्जयेनिले ४ पाणिरोगेश्लीपदे च विषदुष्टे च शोणिते
ग्रंथ्यर्बुदापचीक्षुद्ररोगरक्ताधिमंथिषु ५ विदारीस्तनरोगेषु वगुवश्चापि गौरवे रक्ताभिष्यंदतंद्रायां पूतिघ्रा
णास्यहेतवे ६ यकृत्प्लीहविसर्पेषु विद्रधौ पिडकोद्गमे कर्णौष्ठघ्राणवक्त्राणां पाके दाहे शिरोरुजे ७ उपदंशे

विस्रतेति रक्ते भूम्यादीनां गुणाः संतितानाह विस्रता आमगंधता भूमिगुणाः
द्रवता जलगुणाः रागो रक्तता अग्निगुणाः चलनं वायुगुणाः विलयो लीनता
आकाशगुणाः द्विद्रता वा एते गुणा भूम्यादिपंचभूतानां क्रमतः स्मृतः ५

तानिपंचकर्माणिकथितानिमुनीश्वरैः ३७ ॰ इतियोगतरंगिण्यांपानस्यविधिर्नामनवमस्तरंगः ९ ॰
अथधूम्रपानविधिः धूमस्तुषड्विधःप्रोक्तःबृंहणःशमनंतथा रेचनःकासहाचैववामनोव्रणशोधनः १
शमनस्यतुपर्यायोमध्यःप्रायोगिकस्तथा बृंहणस्यतुपर्यायोस्नेहनोमृदुरेवच २ रेचनस्यचपर्यायःशो
धनस्तीक्ष्णएवच अधूमार्हाश्चरवल्वेतेश्रांतोभीतश्चदुःखितः ३ दत्तवस्तिर्विरिक्तश्चरात्रौजागरितस्तथा
पिपासितश्चदाहार्तस्तालुशोषीतथोदरी ४ शिरोभितापीतिमिरीच्छर्द्याध्मानपीडितः क्षतोरस्कःप्रमेही
तःपांडुरोगीचगर्भिणी ५ रूक्षःक्षीणोऽप्यवहिततंक्षीरक्षौद्रघृताऽसनैः भुक्तान्नदधिमत्स्यश्चबालोवृद्धःकृ
शस्तथा ६ अकालेचातिपीतश्चधूमःकुर्यादुपद्रवान् धूमोद्वादशमाद्वर्षाद्दीयतेशीतितोनच ७ कासश्वा
सप्रतिश्यायमन्याहनुशिरोरुजः वातश्लेष्मविकारांश्चहन्याद्धूमस्तुयोजितः ८ धूमप्रयोगात्पुरुषःप्रसन्ने
न्द्रियवाङ्मनाः दृढकेशद्विजश्मश्रुःसुगंधिवदनोभवेत् ९ वदनेनपिबेद्धूमंवदनेनैवसंत्यजेत् नासिका
भ्यांततःपीत्वामुखेनैववमेत्सुधीः १० सरावसंपुटेक्षिप्त्वाकल्कमंगारदीपितं छिद्रेनेत्रंप्रवेश्याथव्रणंतेनैव
धूपयेत् ११ एलादिकल्कंशमनेस्निग्धंसर्जरसंमृदु रेचनेतीक्ष्णकल्कंचकासघ्नेक्षुद्रिकौषधं १२ वामनेस्नायु

मरिचंपिप्पली

तेचैवकेशश्मश्रुप्रपातने युज्यतेव्यंहरांनस्यंस्नेहैर्वामधुरद्रवैः २३ यथा सशर्करंपयःपिष्टंमधुमाज्येनकुं
कुमं नस्यप्रयोगतोहन्यात्वातपित्तभवारुजाः २४ भ्रूशंखाक्षिशिरःकर्णसूर्यावर्तार्द्धभेदकाः नस्यंस्यात्ति
लतैलेनतथानारायणेनवा २५ माषात्मगुप्तारास्नाभिः ...तेषजसाधितैः तैलंकफेस्याद्वातेचकेवलेपवनेवसा
